रुद्राष्टाध्यायी

संस्कृत-हिन्दीव्याख्यया संवलिता

(शिवपूजनविधि-पार्थिवशिवपूजनविधि-
श्रीशिवमहिम्नस्तोत्र-श्रीशिवमानसपूजादिसहिता)

व्याख्याकारः

डॉ० धर्मराजपाण्डेयः

वरिष्ठवेदाध्यापकः
श्रीरणवीरसंस्कृतविद्यालयः (का.हि.वि.वि.)
कमच्छा, वाराणसी.

शारदा संस्कृत संस्थान जगतगंज वाराणसी

शारदा संस्कृत संस्थान

वाराणसी-२२१००२

रुद्राष्टाध्यायी

(संस्कृत-हिंदी व्याख्या सहिता)

व्याख्याकारः

डॉ. धर्मराज पांडेयः

प्रकाशक

शारदा संस्कृत संस्थान

जगतगंज, वाराणसी।

रुद्राष्टाध्यायी

संपादक, व्याख्याकार :
डॉ. धर्मराज पांडेय
वेदाध्यापक,
श्री रणवीर संस्कृत विद्यालय (का.हि.वि.वि.),
कमच्छा, वाराणसी।

सर्वाधिकार : प्रकाशकाधीन

प्रथम संस्करण

मूल्य : 50/-

टंकण :
त्रिनेत्र कम्यूनिकेशन
वाराणसी।
09335350400

मुद्रक :
चिंगारी प्रेस,
जालपादेवी, वाराणसी।

प्रकाशक :
शारदा संस्कृत संस्थान,
सी 27/59, जगतगंज,
वाराणसी-221002
दूरभाष : (0542) 2204168

।। श्रीहरिः ।।

भूमिका

भारत के महामहिंम मनीषियों ने निगमागम शास्त्रों के आधार पर यह सुनिश्चित सिद्धांत स्थिर किया है कि जीवन में पुरुषार्थ-चतुष्टय की सिद्धि के निमित्त ईश्वरोपासना श्रेयस्कर है। श्रुत्यादि ग्रंथों एवं शब्दकोषों का आलोडन करने से विदित होता है कि "ईश्वर" पद का प्रयोग भगवान् शंकर के लिए ही प्रयुक्त होता आया है। यथा— **तमीश्वराणां परं महेश्वरम्, ईशानः सर्वविद्यानामीश्वरः।** शिव पुराण में शिवलिंग का अभिप्राय महाचैतन्य चिन्मय पुरुषादि किया गया है। शिवलिंग की एक विशेषता यह है कि इसपर ही समस्त देवताओं का अर्चन-पूजन किया जा सकता है—

शिवलिङ्गेऽपि सर्वेषां देवानां पूजनं भवेत्।
सर्वलोकमयो यस्माच्छिवशक्तिर्विभुः प्रभुः॥ (वृ.पु., १६)

श्रुति एवं तदानुकू ग्रंथों से विदित होता है कि द्विजों को पूजा-अर्चा आदि कार्यों में वेदमंत्रों का ही उपयोग करना उचित है—**प्र गायत्रेण गायत पवमानम्...** (ऋ., ९/६०/१), **पुरुषं पुरुषसूक्तेन उपतस्थे समाहिताः॥** (भाग., १०/१/२०)।

स्वर और हस्त अर्थ के रहस्य सहित विधिवत् गुरु से अध्ययन कर ही वेद मंत्र का उच्चारण फलदायी होता है। इसी सनातन दृष्टि को ध्यान में रखते हुए वैदिक वाङ्मय के साधक पंडित धर्मराज पांडेय ने अथक परिश्रम से विधि एवं अर्थ के साथ रुद्राष्टाध्यायी का संपादन कर वेद-प्रेमियों का उपकार ही किया है अतः ये शतशः धन्यवाद के पात्र हैं। भूतभावन भगवान् शंकर सर्वाबाध मंगल करते रहें, ऐसी हमारी कामना है।

योगेश ब्रह्मचारी
ज्ञानी मठ,
संकठा घाट, वाराणसी।

रामनवमी,
संवत् २०६३

अथ ध्यानम्

शुद्धस्फटिकसङ्काशं त्रिनेत्रं पञ्चवक्त्रकम्। गङ्गाधरं दशभुजं सर्वाभरण-
भूषितम्॥ नीलग्रीवं शशाङ्काङ्कं नागयज्ञोपवीतिनम्। व्याघ्रचर्मोत्तरीयञ्च
वरेण्यमभयप्रदम्॥ कमण्डल्वक्षसूत्राभ्यामन्वितं शूलपाणिनम्। ज्वलन्तं
पिङ्गलजटाजूटमुद्योतकारिणम्॥ अमृतेनाप्लुतं हृष्टमुमादेहार्धधारिणम्।
दिव्यसिंहासनासीनं दिव्यभोगसमन्वितम्॥ दिग्देवतासमायुक्तं सुरासुर-
नमस्कृतम्। नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम्॥ सर्वव्यापिनमीशानं
रुद्रं वै विश्वरूपिणम्। एवं ध्यात्वा द्विजः सम्यक् ततो यजनमारभेत्॥

अथ षडङ्गन्यासः। **हरिः ॐ। मनोजूतिर्जुषतामाज्यस्यबृहस्पति-
र्य्यज्ञमिमन्तनोत्त्वरिष्टँय्यज्ञꣳ समिमन्दधातु। विश्वेदेवासऽइह-
मादयन्तामो३म्प्रतिष्ठ** ॥ हृदयाय नमः ॥ **ॐ अबोध्यग्निः
समिधाजनानाम्प्रतिधेनुमिवायतीमुषासम्। यह्वाऽइवप्रवया-
मुज्जिहानाः प्रभानवः सिस्रतेनाकमच्छ**॥ शिरसे स्वाहा॥ **ॐ
मूर्द्धानन्दिवोऽ अरतिम्पृथिव्यावैश्वानरमृतऽ आजातमग्निम्।
कविꣳ सम्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः**॥ शिखायै
वषट्॥ **ॐ मर्म्माणिते वर्म्मणाच्छादयामिसोमस्त्वाराजामृतेना-
नुवस्ताम्। उरोर्वरीयोवरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु**॥
कवचाय हुम्॥ **ॐ विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहु-
रुतविश्वतस्पात्। सम्बाहुब्भ्यान्धमति सम्पतत्रैर्द्यावाभूमीजन-
यन्देवऽएकः**॥ नेत्रत्रयाय वौषट्॥ **ॐ मानस्तोकेतनयेमानऽआ-
युषिमानोगोषुमानोऽअश्वेषुरीरिषः। मानोवीरान्रुद्रभामिनोवधी-
र्हविष्मन्तः सदमित्त्वाहवामहे**॥ अस्त्राय फट्॥

॥ श्रीगणेशाय नमः ॥

अथ शुक्लयजुर्वेदीय-

रुद्राष्टाध्यायी

॥ अथ प्रथमोऽध्यायः ॥

॥ हरिः ॐ ॥

गणानांत्वा गणपतिꣳ हवामहे प्रियाणांत्वा प्रियपतिꣳ हवामहे निधीनान्त्वां निधिपतिꣳ हवामहे वसो मम। आहमंजानि गर्भधमात्त्वमंजासि गर्भधम्॥ १॥

व्याख्या—हे ब्रह्मणस्पते = हे गणपते!, वयम् गणानाम् = कूष्माण्डादीनां मध्ये, गणपतिम् = तेषां पालकम्, यद्वा गणनीयानां पदार्थजातानां स्वामिनम्, त्वा = त्वाम्, हवामहे = आह्वयामः। प्रियाणाम् = वल्लभानाम्, इष्टमित्रादीनां मध्ये, प्रियपतिम् = प्रियस्य पालकम्, त्वा = त्वाम्, हवामहे = आह्वयामः। निधीनाम् = पद्मादिनिधीनां मध्ये, निधिपतिम् = तेषां पालकम्, त्वा = त्वाम्, हवामहे = आह्वयामः। विघ्नोपशमाय इष्टलाभाय च त्वामाह्वयाम

इति वाक्यार्थतात्पर्यम् (लोके)। वसो = वसत्यस्मिन् सर्वं जगदिति वसुः, जगद् वा यत्र वसति सः वसुः, तत्सम्बुद्धौ हे वसो = सर्वस्वभूत देव! त्वम् अहम् = मम पालको भूया इति शेषः।

हे गणपते! गर्भधम् = गर्भं दधातीति गर्भधम्, गर्भधारकं रेतः पदवाच्यम्। रेतसः उदकनामसुपठितत्वात् (नि., १/१२) आ अजानि = आकृष्य क्षिपामि, अर्थात् श्रद्धया स्वीकृत्य फलोन्मुखी करोमि। त्वम् = त्वञ्च गर्भधम् = उक्तं रेतः श्रद्धाख्यमुदकम् आ अजासि = आकृष्य क्षिपसि, अर्थात् श्रद्धयाकृष्य तदुदकं क्षिपसि, श्रद्धयाकृष्टाः देवताः कर्मफलप्रदानम् अवश्यं कुर्वन्ति।

अर्थ – हे गणपति! हम कूष्माडादि गणों के पालक होने के कारण अथवा गणनीय पदार्थों के बीच में स्वामीरूप से विद्यमान आपका आवाहन करते हैं। प्रिय इष्ट-मित्रादि के बीच में उन प्रियजनों का पालन करने वाले आपका आवाहन करते हैं। महापद्मादि निधियों के बीच में उन निधियों के पालक आप का आवाहन करते हैं। अर्थात् विघ्नों की शांति, भार्यादि प्रिय-लाभ एवं निधि – धन-धान्यादि के संरक्षण के लिए हम आप का आवाहन करते हैं।

हे वसु! अर्थात् जगन्निवास स्वयंभू देव! आप हमारे पालक हों। हम गर्भ अर्थात् कर्मफल को उत्पन्न करने में समर्थ, श्रद्धा नाम के जल को आकृष्ट कर के फलोन्मुख करते हैं एवं आप उक्त रेतः-पदवाच्य उस जल को आकृष्ट कर उसका फलानुकूल उत्सर्ग करते हैं।

गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह।
बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तु त्वा ॥२॥

व्याख्या – हे गणपते! गायत्री = गायत्रीनामकं छन्दः एवं त्रिष्टुप्, जगती, अनुष्टुप्, पङ्क्त्या = पङ्क्तिश्छन्दसा, सह = सार्धम्, बृहती, उष्णिहा सह = उष्णिह-छन्दसा सार्धं, ककुप् = ककुप्-नामकं छन्दः, एतानि सर्वाणि छन्दांसि, सूचीभिः = दर्भसमूहैः प्रजापते! त्वा = त्वाम्, शम्यन्तु = संस्कुर्वन्तु।

अर्थ – हे गणपति! गायत्री, त्रिष्टुप्, जगती, अनुष्टुप् और पंक्ति के सहित बृहती, उष्णिक् के सहित ककुप् छंद प्रजाओं के द्वारा आपका संस्कारात्मक स्तवन करें।

द्विपदा याश्चतुष्पदास्त्रिपदा याश्च
षट्पदाः। विच्छन्दा याश्च सच्छन्दाः
सूचीभिः शम्यन्तु त्वा॥३॥

व्याख्या – हे गणपते! द्विपदाः = द्वे पदे यासां ताः द्विपदाः, छन्दो जातयः, याः = याश्च, चतुष्पदाः = चत्वारि पदानि यासां ताः चतुष्पदाः, याश्च त्रिपदाः = त्रीणि पदानि यासां ताः त्रिपदा, याश्च षट्पदाः = षट् पदानि यासां ताः षट्पदाः, याश्च विच्छन्दाः = विगतं छन्दः याभ्यः ताः, अर्थात् छन्दोलक्षणहीनाः, याश्च सच्छन्दाः = छन्दोलक्षणसंयुताः ताः सर्वाः छन्दोलक्षणजातयः, सूचीभिः = दर्भसमूहैः, त्वा = त्वाम्, शम्यन्तु = संस्कुर्वन्तु।

अर्थ – हे गणपति! जो दो पदों वाले, चार पदों वाले, तीन पदों वाले, छः पदों वाले तथा जो छंद-लक्षणों से हीन एवं जो छंद-लक्षणों से युक्त जो छंद हैं, वे सब प्रजाओं के द्वारा आप को संस्कृत करें।

अर्थात् प्रजाओं के द्वारा उच्चरित तत्तत् छंदोमयी वाणी आप को संस्कार एवं शांति दे।

सहस्तोमाः सहछन्दसऽआवृतः सहप्रमाऽऋषयः सप्त दैव्याः। पूर्वेषाम्पन्थामनुदृश्श्य धीराऽ अन्वालेभिरे रत्थ्यो न रश्म्मीन् ॥४॥

व्याख्या – **सहस्तोमाः = स्तोमैः सह वर्तमानाः, सहस्तोमाः = त्रिवृत्पञ्चदशादिस्तोमैः सहिताः, सहछन्दसः = छन्दोभिः सह वर्तमानाः, सहछन्दसः = गायत्र्यादिभिः छन्दोभिः सहिता, आवृतः = आवर्तमानाः, सहप्रमाः = प्रमया सह वर्तमानाः, सहप्रमाः = यथार्थज्ञानान्विताः, दैव्याः = देवस्य सम्बन्धिनः, सप्त = सप्तसङ्ख्यकाः अग्रगण्याः, ऋषयः = मन्त्रद्रष्टारः, पूर्वेषाम् = अङ्गिरः प्रभृतीनां ऋषीणाम्, पन्थाम् = अनुष्ठानमार्गम्, अनुदृश्य = पश्चाद् ज्ञात्वा, धीराः = सन्मार्गज्ञाः सन्तः, अन्वालेभिरे = यज्ञानुष्ठानप्रक्रियामारब्धवन्तः, न = यथा, रथ्याः = रथनेतारः, सूताः, रश्मीन् = प्रग्रहान्, अश्वान् सन्मार्गगमनाय हस्तेन अन्वारभन्त इति।**

अर्थ – त्रिवृत्पंचदशादि स्तोम के सम्यक् ज्ञाता, गायत्री आदि छंदों के पुनः-पुनः आवर्तन से यथार्थज्ञान से अन्वित परमदेव प्रजापति के प्राणाभिमानी सप्त ऋषियों ने अपने पूर्वज अंगिरा आदि के द्वारा प्रचलित यज्ञानुष्ठानमार्ग का पुनः परिज्ञान करके उसे प्राप्त तथा प्रचलित किया, जैसे, साथी घोड़ों को सन्मार्ग पर चलाने के लिए उनकी रश्मियों का ग्रहण करते हैं।

यज्जाग्रतो दूरमुदैति दैवन्तदु सुप्तस्य
तथैवैति। दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मे
मनः शिवसङ्कल्पमस्तु ॥५॥

व्याख्या – यत् = यन्मनः, जाग्रतः = जाग्रदवस्थायां वर्तमानस्य पुरुषस्य, दूरम् = विप्रकृष्टम्, उदैति = उद्गच्छति अन्येन्द्रियापेक्षया दूरं गच्छतीति भावः। यच्च मनः दैवम् = आत्मग्राहकम्, तत् = यदः स्थाने तच्छब्दः, उ = उकारश्चकारार्थकः, यच्च मनः इति भावः, सुप्तस्य = सुषुप्त्यवस्थायां गतस्य पुरुषस्य, तथैव = येन प्रकारेण गच्छति तेनैव प्रकारेण, एति = पुनरागच्छति, यच्च मनः, दूरङ्गमम् = दूरं गच्छतीति दूरङ्गमम्, अर्थात् अतीतानागतवर्तमानसमीपस्थदूरस्थव्यवहितादिपदार्थानां ग्राहकम्, यच्च मनः, ज्योतिषाम् = प्रकाशकानाम्, एकम् = अद्वितीयम्, ज्योतिः = प्रकाशकं, तत् = तादृशम्, मे = मम, मनः = मानसम्, शिवसङ्कल्पम् = शिवः कल्याणकारी सङ्कल्पः यस्य तादृशम्, अस्तु = भवतु।

अर्थ – जो मन जागते हुए पुरुष का अत्यंत दूर चला जाता है, जो आत्मग्राहक है तथा जो मन सोते हुए पुरुष का जैसे दूर गया रहता है, वैसे ही लौट आता है, जो अतीत, अनागत, दूरस्थ और व्यवहित पदार्थों का ज्ञापक है, जो समस्त श्रोत्रादि इंद्रियों का प्रवर्तक है, वह मेरा मन कल्याणकारी संकल्प वाला हो।

येन कर्म्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः। यदपूर्वं यक्षमन्तः प्रजानान्तन्मे मनः शिवसङ्कल्पमस्तु ॥६॥

व्याख्या – अपसः = अपो विद्यते येषां ते अपस्विनः = कर्मवन्तः अप इति कर्मनाम। सदा सत्कर्मपरायणा इति, धीराः = धीमन्तः, मनीषिणः = मेधाविनः, यज्ञे = यज्ञाख्ये कर्मणि, येन = मनसा, कर्माणि = कृत्यानि, कृण्वन्ति = कुर्वन्ति, तेषु सत्सु इति जिज्ञासायां विदथेषु = हविरादिपदार्थानां ज्ञानेषु सत्सु यत् = यच्च मनः, अपूर्वम् = न विद्यते पूर्वमिन्द्रियं यस्मात् तदपूर्वम् = आद्येन्द्रियमिति भावः, यच्च = मनः, यक्षम् = यष्टुं शक्तम्, यच्च प्रजानाम् = प्राणिमात्राणाम्, अन्तः = शरीरमध्यस्थं, अस्ति, तन्मे मनः शिवसङ्कल्पमस्तु।

अर्थ – सदा कर्मानुष्ठानरत मेधावी विद्वान् यज्ञ में जिस मन के द्वारा ही प्राधान्येन कर्मों को करते हैं, क्योंकि हवि आदि पदार्थों का ज्ञान होने पर ही यज्ञक्रिया संपन्न होती है, तथा जो मन समस्त इंद्रियों में श्रेष्ठ है तथा जो मन यजन करने में समर्थ है और जो मन प्रजाओं के अंतःकरणरूप से वर्तमान है, वह मेरा मन कल्याणकारी संकल्प वाला हो।

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतम्प्रजासु। यस्मान्नऽऋते किञ्चन कर्म्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ॥७॥

व्याख्या – यत् = यन्मनः, प्रज्ञानम् = प्रकृष्टज्ञानजनकम्, उत् = अपि च, यन्मनः, चेतः = चेतयति सम्यक्ज्ञापयति यत्तद् चेतः = सद्ज्ञापकः, च = अपि च, यन्मनः, धृतिः = धैर्यरूपम्, यत् = यन्मनः, ज्योतिः = सर्वेन्द्रियाणां प्रकाशकम्, यच्च मनः, प्रजासु = जनेषु, अमृतम् = अमरणधर्मि, मनसः आत्मरूपत्वात्, यस्मान्मनसः, ऋते = विना, किञ्चन = किमपि, कर्म = अनुष्ठानम्, न क्रियते = कर्तुं न शक्यते, यतो हि कर्मप्रवृत्तिं प्रति प्रथमं मनस एव हेतुत्वम्, तन्मे मनः शिवसङ्कल्पमस्तु।

अर्थ – जो मन प्रकृष्टज्ञान का जनक है, जो मन सद्ज्ञान का स्फुरण कराता है, जो मन धैर्यरूप है, जो मन प्रजाओं में अविनाशशील है, जो मन प्रकाशस्वरूप है, जिस मन के विना कोई भी अनुष्ठान नहीं किया जा सकता, वह मेरा मन कल्याणकारी संकल्प वाला हो।

येनेदम्भूतम्भुवनम्भविष्यत्परिगृहीतममृतेन सर्व्वम्। येन यज्ञस्तायते सप्त होता तन्मे मनः शिवसङ्कल्पमस्तु॥८॥

व्याख्या – येन, अमृतेन = अविनाशशीलेन, मनसा इदं सर्वम् = एतत्सम्पूर्णम्, भूतम् = भूतकालसम्बन्धि, भुवनम् = वर्तमानकालसम्बन्धि, भविष्यत् = भविष्यत्कालसम्बन्धि च वस्तुजातम्, परिगृहीतम् = ज्ञानविषयत्वेन स्वायत्तीकृतम्, येन = येन च मनसा, सप्तहोता = सप्त सङ्ख्यकाः होतारो यत्र तादृशः, यज्ञः = अग्निष्टोमादियज्ञः, तायते = विस्तार्यते। तत् मे मनः शिवसङ्कल्पम् अस्तु।

अर्थ – विनाशरहित जिस मन के द्वारा इस जगत् के समस्त भूत, वर्तमान और भविष्यत् घटनाचक्र अपने ज्ञान के विषय बना लिए जाते हैं और जिस मन द्वारा अग्निष्टोमादि यज्ञ के सात हवनकर्ता यज्ञ की क्रिया का विस्तार करते हैं, वह मेरा मन कल्याणकारी संकल्प वाला हो।

यस्मिन्नृचः साम यजूꣳषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः। यस्मिꣳश्चित्तꣳ सर्वमोतम्प्रजानान्तन्मे मनः शिवसङ्कल्पमस्तु ॥९॥

व्याख्या – **यस्मिन् = मनसि, ऋचः = ऋग्वेदमन्त्राः, साम = सामवेदमन्त्राः, यजूँषि = यजुर्वेदमन्त्राश्च, प्रतिष्ठिताः = ज्ञानविषयत्वेन स्थिताः सन्ति, किमिव, रथनाभौ = रथचक्रकेन्द्रे, आराः = चक्राङ्गभूतकाष्ठविशेषाः, इव = यथा। यस्मिन् = मनसि, प्रजानाम् = जनानाम्, सर्वम् = सम्पूर्णम्, चित्तम् = ज्ञानम्, ओतं = प्रोतं, गुम्फितमिति भावः, तत् मे मनः शिवसङ्कल्पम् अस्तु।**

अर्थ – जिस मन में ऋग्वेद, यजुर्वेद और सामवेद, उसी प्रकार प्रतिष्ठित हैं जिस प्रकार रथचक्र के केंद्र में आर संश्लिष्ट रहते हैं, तथा जिस मन में प्रजाओं का संपूर्ण ज्ञान पिरोया हुआ है, वह मेरा मन कल्याणकारी संकल्प वाला हो।

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेभीशुभिर्वाजिनऽइव। हृत्प्रतिष्ठं यदजिरञ्जविष्ठन्तन्मे मनः शिवसङ्कल्पमस्तु ॥१०॥

व्याख्या – यत् = मनः, सुषारथिः = शोभनः सारथिः, अभीशुभिः = वल्गाभिः, वाजिनः = वेगयुक्तान्, अश्वान् = घोटकान्, इव = यथा, मनुष्यान् = नरान्, नेनीयते = स्वाभीष्टस्थले नयति, यच्च मनः, हृत्प्रतिष्ठम् = हृद्देशे प्रतिष्ठितम्, अजिरम् = जरारहितम्, जविष्ठम् = अतिवेगवत् अस्ति, तत् मे मनः शिवसङ्कल्पम् अस्तु।

अर्थ – अच्छा सारथी जैसे वेगशाली अश्वों को लगाम के द्वारा अभीष्ट गंतव्य पर ले जाता है, वैसे ही जो मन मनुष्यों को अभीष्ट कर्मों में प्रवृत्त कराता है, तथा जो मन हृदय में स्थित है, जरा रहित है और वेगवान् है, वह मेरा मन कल्याणकारी संकल्प वाला हो।

(इति प्रथमोऽध्यायः)

॥ अथ द्वितीयोऽध्यायः ॥

॥ हरिः ॐ ॥

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिं सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥१॥

व्याख्या – सहस्रशीर्षा = सहस्रं शिरांसि यस्य सः – सहस्रशीर्षा = असंख्यमूर्धावान्, सहस्रशब्दोऽत्रासंख्यवाचकः ज्ञातव्यः, सहस्राक्षः = सहस्रम् अक्षीणि यस्य सः – सहस्राक्षः = असंख्यनेत्रवान्, सहस्रपात् – सहस्रं पादाः यस्य सः सहस्रपात् = असंख्यपादवान्, एवंभूतः सः, पुरुषः = भगवान्नारायणस्वरूपः पुरुषपदवाच्यः

परमात्मा, भूमिम् = पृथिव्यादिपञ्चभूतात्मकं जगत्, सर्वतः = विश्वतः, स्पृत्वा = आवेष्ट्य, दशाङ्गुलम् = दशाङ्गुलपरिमितं देशम्, नाभितः दशाङ्गुलोर्ध्वं हृद्देशे इति भावः, अत्यतिष्ठत् = अतिक्रम्य स्थितोऽभूत्।

अर्थ – वह असंख्य शिरोंवाला, असंख्य नेत्रोंवाला एवं असंख्य पैरों वाला परमपुरुष परमात्मा पृथिवी आदि पंचमहाभूतों को चारों ओर से व्याप्त कर के नाभि से दस अंगुल ऊपर हृदयदेश में स्थित हुआ।

पुरुषऽएवेदꣳ सर्व्वँय्यद्भूतँय्यच्च भाव्यम्।
उतामृतत्त्वस्येशानो यदन्नेनातिरोहति॥२॥

व्याख्या – एतत्कालवच्छिन्नं यद् भूतम् = यदतीतकालिकम्, यच्च भाव्यम् = यद् च भविष्यत्कालिकम्, तत्, सर्वम् = सम्पूर्णम्, पुरुषः = परमात्मा, एव अर्थात् वर्तमानभूतभविष्यत्कालिकमेतज्जगत् परमपुरुषरूपम् एव। उत = अपि च, अमृतत्वस्य = मृत्युरहितत्वस्य, देवत्वस्य इति भावः, ईशानः = ईशः, सः पुरुषः, यत् = यतो हि, अन्येन = जगज्जीवनाधायकेन निमित्तभूतेन फलेन, अतिरोहति = जगद्रूपेण परिणमते।

अर्थ – जो यह दृश्यमान वर्तमानकालिक, भूतकालिक और भविष्यत् कालिक जगत् है, वह सब परमपुरुष परमात्मास्वरूप ही है। साथ ही अमृतत्व का स्वामी वह परमपुरुष ही अन्न के द्वारा जगद्रूप में परिणमित होता है, अर्थात् अपनी कारणावस्था को विपरिणमित कर के परिदृश्यमान कार्यात्मक जगदवस्था को प्राप्त होता है।

एतावांनस्यमहिमातोज्यायाँश्चपूरुषः ।
पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ॥३॥

व्याख्या — एतावान् = पूर्वमन्त्रवर्णितवर्तमानभूतभविष्यद्रूपजगत्स्वरूपः, अस्य = पुरुषस्य, महिमा = स्वकीयसामर्थ्यविशेषः न तु एतावानेव सः पुरुषः, पुरुषः = परमात्मा च, अतः = पूर्वोक्तमहिम्नोऽपि, ज्यायान् = गरीयान्, अस्य = पुरुषस्य, विश्वा = सर्वाणि, भूतानि = त्रिकालवर्तीनि प्राणिजातानि, पादः = चतुर्थांश एव, अस्य = पुरुषस्य, त्रिपात् = अवशिष्टानि त्रीणि पादानि, अमृतम् = विनाशरहितम्, सत्, दिवि = प्रकाशात्मके स्वस्वरूप एवावतिष्ठते इति भावः।

अर्थ — पूर्वमंत्र में वर्णित, वर्तमान और भूतभविष्यत्कालिक जगत्रूप तो इस विराट् पुरुष की महिमामात्र है, वह पुरुष तो इससे भी अधिक ज्यायान् है। यह संपूर्ण विश्व तो उसका एक पाद-मात्र है, अवशिष्ट तीन पाद विनाश-रहित हैं और अपने द्योतनात्मक (प्रकाशात्मक) स्वरूप में अवस्थित हैं।

त्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः ।
ततो विष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥४॥

व्याख्या — त्रिपात् = दिवि अृतात्मकत्रिपादस्वरूपः, पुरुषः = संसारस्पर्शरहितः, प्रकाशरूपः, ऊर्ध्वः = एकपादस्वरूपात् संसारात् अस्पृष्टः उत्कर्षशाली सन्, उदैत् = स्थितवान्, अस्य =

पुरुषस्य, पुनः = तदनन्तरम् इह, पादः = वर्तमानभूतभविष्यत्-कालात्मकं जगत्, आभवत् = पुनः पुनः जातः जायते च। ततः = जगदात्मकपादे जाते. विष्वङ् = समन्तात्, साशनानशने, साशनश्च अनशनश्च इति साशनानशने, साशनम् = अशनेन भोजनादिव्यवहारेण सहितं चेतनं प्राणिजातम्, अनशनम् = अशनरहितम् गिरिनद्यादिकमचेतनवस्तुजातम्, अभि = स्वयमेव विविधो भूत्वा, व्याक्रामत् = व्याप्तवान्।

अर्थ – अमृतात्मक तीन पादों वाला परमपुरुष, इस एक पाद-स्वरूप दृश्यमान जगत से अस्पृष्ट रहते हुए अपने प्रकाशात्मक उत्कर्षशाली स्वरूप में स्थित रहता है। उसका उक्त स्वरूप ही जगत में व्याप्त भोजनादि व्यवहारशील चेतन एवं भोजनादि व्यवहाररहित अचेतन पदार्थों के रूप में व्याप्त हुआ।

ततो॑ वि॒राड॑जायत वि॒राजो॒ऽअधि॒ पूरु॑षः।
स जा॒तोऽअत्य॑रिच्यत प॒श्चाद्भूमि॒मथो॑ पु॒रः ॥५॥

व्याख्या – ततः = तदनन्तरम्, तस्मादादिपुरुषात्, विराट् = ब्रह्माण्डदेहकः, अजायत = उत्पन्नो बभूव, ततश्च विराजः = तस्मात् विराट्-स्वरूपात्, अधि = देहस्योपरि, तमेव ब्रह्माण्डदेहमधिकरणं कृत्वा, पुरुषः = तद्देहाभिमानी पुमानजायत। अयमेव ब्रह्माण्डालकं विराट्देहं सृष्ट्वा ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवदिति तात्पर्यः। सः = विराट्पुरुषः, जातः = उत्पन्नः सन्, अत्यरिच्यत = अस्मात् अतिरिक्त एवाभूत्, अर्थात् विराड्-तिरिक्तः देवतिर्यङ्मनुष्यादिरूपोऽभूत्, पश्चात् = ततः, भूमिम् =

पृथ्वीं, ससर्ज, ततः तेषां जीवानां, पुरः = पूर्यन्ते सप्तभिः धातुभिः इति पुरः = शरीराणि ससर्ज।

अर्थ – इसके बाद उस परमपुरुष से यह ब्रह्मांडात्मक देह उत्पन्न हुआ तथा इस देह का अभिमानी पुरुष उस देह को अधिकृत करके प्रकट हुआ। उत्पन्न हुआ वह विराट पुरुष इस ब्रह्मांड से श्रेष्ठ ही था। तदनंतर उसने भूमि को उत्पन्न किया तत्पश्चात् देव-तिर्यक्-मनुष्य आदि के शरीरों को उत्पन्न किया।

तस्म्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्ज्यम्।
पशूँस्ताँश्चक्रे वायव्यानारण्ण्या ग्ग्राम्म्याश्च ये॥६॥

व्याख्या – तस्मात् = ब्रह्माण्डाधिष्ठातृपुरुषात्, सर्वहुतः = सर्वात्मकः सः पुरुषः हूयते यस्मिन् यज्ञे सोऽयं सर्वहुत् तस्मात्, यज्ञात् = पुरुषमेधयज्ञरूपात् पुरुषात्, पृषदाज्यम् = दधिमिश्रमाज्यम्, सम्भृतम् = समुत्पन्नम्, आज्यादिकं भोगजातं समुत्पन्नमिति भावः। ततः सः तान् = प्रसिद्धान्, वायव्यान् = वायुदेवतया सम्बद्धान्, पशून्, चक्रे = चकार, ये = ये पशवः, आरण्याः = अरण्यनिवासिनो हरिणादयः, ग्राम्याः = ग्रामनिवासिनः अश्वादयश्च सन्ति तानपि चकार।

अर्थ – वह सर्वात्मक परमपुरुष जिस यज्ञ में पूजा जाता है, ऐसे उस पुरुषमेधयज्ञरूप पुरुष से दधिमिश्रित घृतादि भोज्यपदार्थ उत्पन्न हुए। तदनंतर उसने वायुदेवता से संबंधित उन पशुओं को उत्पन्न किया जो वनवासी हरिणादि एवं ग्रामवादी अश्वादि हैं।

तस्म्माद्यज्ञात्सर्वहुतऽऋचः सामानि जज्ञिरे।
छन्दाᳬंसि जज्ञिरे तस्म्माद्यजुस्तस्म्मादजायत ॥७॥

व्याख्या – तस्मात् = पूर्ववर्णितात्, सर्वहुतः = सर्वैः हूयमानात् = यजमानात्, यज्ञात् = यज्ञपुरुषात्, ऋचः = ऋग्वेदाः, सामानि = सामवेदाः, जज्ञिरे = जाताः, ततः, तस्मात् = पुरुषात्, छन्दांसि = गायत्र्यादीनि छन्दांसि, जज्ञिरे = जातानि, ततस्तस्मात् = पुरुषात्, यजुः = यजुर्वेदोऽपि जातः।

अर्थ – सब के द्वारा यज्यमान उस यज्ञपुरुष से ऋग्वेद तथा सामवेद उत्पन्न हुए। उसी पुरुष से गायत्र्यादि छंद और यजुर्वेद भी उत्पन्न हुआ।

तस्म्मादश्वाऽअजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्म्मात्तस्म्माज्जाताऽअजावयः ॥८॥

व्याख्या – तस्मात् = सर्वहुतयज्ञपुरुषात्, अश्वाः = तुरगाः घोटका इति वा, अजायन्त = उत्पन्ना बभूवुः, च = एवम्, ये के = अन्येऽपि ये, उभयादतः = ऊर्ध्वाधो भागयोर्दन्तयुक्ताः अश्वातिरिक्ताः गर्दभादयः तेऽपि उत्पन्ना बभूवुः। ह = इति प्रसिद्धौ, तस्मात् = पुरुषात्, गावः = धेनवः, च यज्ञिरे = अजायन्त, तथा च, तस्मात् = सर्वव्यापकात् पुरुषात्, अजावयः – अजाः = छागाः, अवयः = मेषाः, च, जाताः = उत्पन्नाः बभूवुः।

अर्थ – उसी परमपुरुष से अश्व उत्पन्न हुए तथा और भी नीचे और ऊपर दाँतों वाले गर्दभ आदि जीव उत्पन्न हुए। उसी से गायें उत्पन्न हुईं एवं उसी से बकरियाँ और भेंड़ें उत्पन्न हुईं।

तँय्यज्ञम्बर्हिषि प्रौक्षन्न्पुरुषञ्जातमग्ग्रत:। तेनं देवाऽअंयजन्त साद्ध्याऽऋषंयश्च ये ॥९॥

व्याख्या – अग्रतः = सृष्टेः पूर्वम्, जातम् = उत्पन्नम्, तम् = पूर्ववर्णितम्, यज्ञम् = यज्ञसाधनभूतम्, पुरुषम् = यज्ञपुरुषम्, पशुत्वभावनयाः यूपे निबद्धम्, बर्हिषि = मानसे यज्ञे, प्रोक्षन् = प्रोक्षितवन्तः, तं परमपुरुषाज्जातं यज्ञपुरुषं मानसे यज्ञे पशुत्वेनोपकल्प्य मानसयागं निष्पादितवन्तः इति भावः, तेन = पुरुषेण, साध्याः = सृष्टिसाधनभूताः प्रजापत्यादयः, देवाः = इन्द्रादयः, च = एवञ्च, ऋषयः = मन्त्रद्रष्टारः अङ्गिराप्रभृतयः, अयजन्त = यागं कृतवन्तः।

अर्थ – सृष्टि के पूर्व उत्पन्न हुए यज्ञसाधनभूत उस पुरुष को मानस यज्ञ में प्रोक्षणादि संस्कारों से संस्कृत करके सृष्टि के साध्यभूत प्रजापतियों, इंद्रादि देवों और मंत्रद्रष्टा ऋषियों ने यज्ञ संपन्न किया।

यत्पुरुषँव्व्यदधुः कतिधा व्व्यंकल्प्पयन्। मुखङ्किमंस्यासीत्किम्बाहू किमूरू पादांऽउच्च्येते ॥१०॥

व्याख्या – यत् = यदा, पुरुषम् = विराड्रूपम्, व्यदधुः = सङ्कल्पेनोत्पादितवन्तः, तदा = तस्मिन्नुत्पत्तिक्षणे, कतिधा = विभिन्न प्रकारैः, व्यकल्पयन् = विविधं कल्पितवन्तः। कल्पनाप्रकारं यथा – अस्य = पुरुषस्य, मुखम् = आस्यम्, किम् = किमासीत्, किं बाहू = कौ बाहू आस्ताम्, किम् ऊरू = कौ ऊरू आस्ताम्,

किं पादौ = कौ च चरणौ, उच्येते = कथ्येते, कौ च चरणौ? अभूतामिति भावः।

अर्थ – जब देवादि ने उस विराट पुरुष को संकल्प से उत्पन्न किया उस समय उनके मन में उस पुरुष के विषय में नाना प्रकार के संकल्प-विकल्पात्मक प्रश्न उपस्थित हुए। यथा – इस विराट पुरुष का मुख क्या है? इसकी भुजाएँ कौन हैं? दोनों जाँघें कौन हैं और दोनों पैर कौन हैं?

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्याᳬ शूद्रोऽअजायत॥११॥

व्याख्या – पूर्वमन्त्रोद्भावितानां प्रश्नानामुत्तरमत्र वर्णयति – ब्राह्मणः = ब्राह्मणत्वजातिविशिष्टः मानवः, अस्य = पुरुषस्य, मुखम् = आस्यम् आसीत्, अर्थात् ब्राह्मणोऽस्य मुखत्वेनोत्पन्नः, राजन्यः = क्षत्रियः, बाहूकृतः = बाहुत्वेनोत्पन्नः, अस्य = पुरुषस्य, यत् = यौ, ऊरू तद्वैश्यः = तद्रूपत्वेन वैश्यः समुत्पन्नः, पद्भ्याम् = चरणाभ्याम्, शूद्रः = शूद्रत्वजातिविशिष्टोऽन्त्यजः पुमान्, अजायत = उत्पन्नो बभूव।

अर्थ – पूर्व मंत्र में उत्थापित प्रश्नों के उत्तर देते हुए प्रस्तुत मंत्र में कहा गया है कि – ब्राह्मण उस विराट पुरुष का मुख हुआ, क्षत्रिय उसकी दोनों भुजाएँ हुए, वैश्य उसकी जंघाएँ हुए और उसके पैरों से शूद्र उत्पन्न हुआ।

चन्द्रमा मनसो जातश्चक्षोः सूर्य्योऽअजायत।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत॥१२॥

व्याख्या – अस्य विराट्पुरुषस्य, मनसः = मानसात्, चन्द्रमाः = निशाकरः, जातः = समुत्पन्नः, चक्षोः = नेत्रात्, सूर्यः = दिवाकरः, अजायत = उत्पन्नो बभूव, श्रोत्रात् = कर्णात्, वायुः = पवनः, प्राणश्च = प्राणाः अपि अजायन्त, एवं मुखात् = आस्यात्, अग्निः = पावकः, अजायत = उत्पन्नो बभूव।

अर्थ – उस विराट पुरुष के मन से चंद्रमा उत्पन्न हुआ, नेत्र से सूर्य उत्पन्न हुआ, श्रोत्र से वायु और प्राण उत्पन्न हुए तथा मुख से अग्नि उत्पन्न हुआ।

नाभ्याऽआसीदन्तरिक्षः शीर्ष्णो द्यौः समवर्त्तत।
पद्भ्याम्भूमिर्दिशः श्रोत्रात्तथा लोकाँ२॥ऽअकल्पयन्॥१३॥

व्याख्या – नाभ्याः = तस्य विराट्पुरुषस्य नाभितः, अन्तरिक्षम् = आकाशम्, आसीत् = उत्पन्नं बभूव, शीर्ष्णः = शिरसः, द्यौः = द्युनामकः लोकः, समवर्तत = अजायत, पद्भ्याम् = पादाभ्याम्, भूमिः = पृथिवी, श्रोत्रात् = कर्णात्, दिशः = प्राच्यादयः हरितः, तथा = अनेन प्रकारेण, लोकान् = अन्यावशिष्टसत्यादिलोकान् अपि, अकल्पयन् = ते देवाः निर्धारितवन्तः।

अर्थ – उस विराट् पुरुष की नाभि से अंतरिक्ष, शिर से द्यौ नामक लोक, पैरों से भूमि, कानों स पूर्वादि दिशाएँ उत्पन्न हुईं। इस प्रकार उन देवादि ने अन्य लोकों की उत्पत्ति का भी निर्धारण किया।

यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तो-
स्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥१४॥

व्याख्या – यत् = एवम्प्रकारेण ब्रह्माण्डे उत्पन्ने सति, देवाः = इन्द्रादयः, पुरुषेण = अन्य हव्यपदार्थानामनुपलब्धत्वात् ब्रह्माण्डात्मकपुरुषस्वरूपेणैव मनसा सङ्कल्पितेन हविषाहविर्द्रव्येण यज्ञम् = मानसं यज्ञम्, अतन्वत = विस्तारितवन्तः कृतवन्तः इति भावः। तदा, वसन्तः = वसन्ताख्यो ऋतुः, अस्य = क्रियमाणस्य यज्ञस्य, आज्यम् = घृतम्, आसीत्, ग्रीष्मः = ग्रीष्मर्तुः, इध्मः = समिद्विशेषः, आसीत्, शरत् = शरदृतुः, हविः = हव्यपदार्थः आसीत्।

अर्थ – इस प्रकार ब्रह्मांड के उत्पन्न होने पर इंद्रादि देवताओं ने अन्य हव्य पदार्थों के उत्पन्न न होने के कारण ब्रह्मांड-स्वरूप उस पुरुष को ही मन से हवि मानकर उससे मानस यज्ञ संपन्न किया। उस समय इस यज्ञ में वसंत ऋतु घृत, ग्रीष्म ऋतु समिधा और शरद् ऋतु हवि के रूप में संकल्पित हुए।

सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः।
देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् ॥१५॥

व्याख्या – अस्य = साङ्कल्पिकेन विधिना क्रियमाणस्य यज्ञस्य सप्त = गायत्र्यादीनि सप्त छन्दांसि सप्त सागराः वा, परिधयः = भूमिवेष्टनानि, त्रिःसप्त = एकविंशतिः – द्वादश मासाः, पञ्चर्तवः, त्रयः लोकाः, आदित्यश्च एते एकत्रिंशति पदार्थाः अथवा सप्त छन्दांसि, सप्त उपच्छन्दांसि, सप्त व्याहृतयो वा एकविंशति पदार्थाः, समिधः = यज्ञेन्धनानि, कृताः = उपकल्पितानि, यत् = यदा, देवाः = इन्द्रादयः, यज्ञम् = उक्तरूपं मानसं यज्ञम्, तन्वानाः = कुर्वाणाः आसन् तदा तस्मिन् यज्ञे, पुरुषम् = विराट्पुरुषमेव, पशुम् = मेध्यपशुत्वेन, अबध्नन् = भावितवन्तः।

अर्थ – इंद्रादि देवों के द्वारा सांकल्पिक विधि से क्रियमाण इस याग की गायत्री आदि सात छंद अथवा सात समुद्र ही सात परिधियाँ थीं, बारह मास, पाँच ऋतुएँ, तीन लोक और सूर्य ये इक्कीस पदार्थ समिधा हुए अथवा सात छंद, सात उपछंद और सात व्याहृतियाँ ये इक्कीस पदार्थ समिधा हुए। उस यज्ञ को करने वाले देवों ने उस विराट पुरुष को ही यज्ञ में मेध्य-पशु के रूप में कल्पित किया।

यज्ञेनं यज्ञमंयजन्त देवास्तानि धर्म्माणि
प्प्रथमान्न्यांसन्। ते ह नाकंम्महिमानंः
सचन्त यत्र पूर्वे साद्ध्याः सन्तिं देवाः ॥१६॥

व्याख्या – देवाः = इन्द्रादयः सिद्धसङ्कल्पाः, यज्ञेन = पूर्ववर्णितेन यज्ञसाधनभूतसामग्रीसंभारेण, यज्ञम् = यज्ञस्वरूपम् विराट्पुरुषम् विष्णुं वा "यज्ञो वै विष्णुः" इति श्रुतेः, अयजन्त = पूजितवन्तः,

तानि = ते, धर्माणि = धर्माः, प्रथमानि = प्रधानानि, आसन् = अभूवन्। यत्र = यस्मिन् विराट्पुरुषावाप्तिरूपे स्वर्गे, पूर्वे = पूर्वं जाताः, साध्याः = देवादयः, सन्ति = वर्तन्ते, तम्, नाकम् = स्वर्गम्, ह = निश्चयेन, ते महिमानः = ते यज्ञेन विराट्पुरुषोपासकाः अपि, सचन्ते = पाप्नुवन्ति।

अर्थ – इंद्रादि सिद्ध-संकल्प देवों ने पूर्वसंकल्पित यज्ञसाधनभूत सामग्री के द्वारा यज्ञस्वरूप विराट् पुरुष विष्णु का यजन किया। यह यज्ञ ही आदि एवं प्रधान धार्मिक कृत्य हुआ। उस यज्ञ को करने वाले इंद्र आदि देव जिस स्वर्ग में रहते हैं, उसी स्वर्ग को वे भी प्राप्त करते हैं जो यज्ञ के द्वारा विराट् पुरुष का आराधन करते हैं।

अद्भ्यः सम्भृतः पृथिव्यै रसाच्च
विश्वकर्म्मणः समवर्त्तताग्ग्रे। तस्य
त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य
देवत्त्वमाजानमग्ग्रे ॥१७॥

व्याख्या – पृथिव्याः, अद्भ्यः = जलेभ्यः च, सम्भृतः = परिपुष्टः, अत्र पृथिवीपदम् पञ्चभूतोपलक्षणम्, विश्वकर्मणः = विश्वं कर्म यस्य सः, तस्य = कालस्य, रसात् = तत्त्वभूतात् रसात्, अग्रे = सर्वप्रथमम्, समवर्तत = समभवत्, तस्य रसस्य, रूपम् = स्वरूपम्, विदधन् = धारयन्, त्वष्टा = आदित्यः, एति = प्रतिदिनमुदेति, अयमेव, अग्रे = सर्वप्रथमम्, मर्त्यस्य = मृत्युलोकाधिष्ठातुः, आजानम् = मुख्यम्, देवत्वम् = सुरत्वमभूत्।

अर्थ – पृथिवी-जलादि पंचभूतों से विश्व को रचने वाले कालक रसरूप तत्त्व परिपुष्ट होकर समुद्भूत हुआ। उसी रस का रूप धारण करता हुआ सूर्य प्रतिदिन उदित होता है। मृत्युलोक के अधिष्ठाता इस सूर्य को ही सर्वप्रथम देवरूप में परिज्ञात किया गया।

वेदाहमेतम्पुरुषम्महान्तमादित्यवर्ण्णन्तमसः
परस्तात्। तमेव विदित्वातिमृत्युमेति
नान्यः पन्था विद्यतेयनाय ॥१८॥

व्याख्या – अहम्, महान्तम् = महत्ववन्तम् सर्वोत्कृष्टम्, आदित्यवर्णम् = सूर्यवद्भास्वरवर्णम्, तमसः = अन्धकारस्य, परस्तात् = दूरतरम्, तमोरहितम् अज्ञानरहितमिति भावः, पुरुषम् = विराट्पुरुषम् विष्णुम्, वेद = जानामि। तम् = आदित्यवर्णं पुरुषम्, विदित्वा = ज्ञात्वा, मृत्युम् = मरणम्, अत्येति = अतिक्रामति, जन्ममृत्युबन्धनात् मुक्तो भवति इति भावः, अयनाय = आश्रयणाय सद्गतये वा, अन्यः = परमपुरुषज्ञानातिरिक्तः, पन्था = मार्गः, न विद्यते = नैव वर्तते। अस्य परमपुरुषस्य ज्ञानमेव जन्ममरणबन्धनात् मोचयितुं समर्थम् एतदिरिक्तः अन्यः कश्चिदपि मार्गः मुक्तये नास्ति इति तात्पर्यार्थः।

अर्थ – मैं उस महान् सूर्य के समान भास्वरवर्ण वाले एवं अंधकार से परे स्थित (अज्ञानरहित) विराट् पुरुष (विष्णु) को जानता हूँ, उसको जानकर ही जीव मृत्यु को पार कर सकता है, जन्म-मरण के बंधन से मुक्त होने का अन्य कोई मार्ग नहीं है।

प्रजापंतिश्चरति गर्ब्भेऽअन्तरजायमानो
बहुधा व्विजायते। तस्य योनिम्परिपश्श्यन्ति
धीरास्तस्मिन्ह तस्थुर्ब्भुवनानि व्विश्श्वा ॥१९॥

व्याख्या – प्रजापतिः = प्रजानां पति सः विराट्पुरुष एव, अन्तः = हृन्मध्ये स्थितः सन्, गर्भे = शरीरान्तःजीवात्मतया, चरति = प्रविशति, सः अजायमानः = यतो हि नित्यः अतः जनिमलभ्यमानोऽपि, बहुधा = नाना चराचरजीवरूपेण, जायते = उत्पन्नो भवति, अथवा अजायमानोऽपि भगवान्रामादि-अवताररूपेण बहुधा विजायते। धीराः = परमात्मज्ञानिनः, तस्य = प्रजापतेः, योनिम् = वास्तविकं स्वरूपम्, परिपश्यन्ति = सम्यगवगच्छन्ति, तस्मिन् = तस्मिन् पर-ब्रह्मण्येव, ह = निश्चयेन, विश्वा = सर्वाणि, भुवनानि = चतुर्दश भुवनानि तद्गतानि जीवजातान्यपि, तस्थुः = स्थितानि सन्तीति भावः।

अर्थ – प्रजाओं का स्वामी वह विराट् पुरुष समस्त देहधारियों के हृदय में जीवात्मारूप में निवास करता है। यद्यपि नित्य होने के कारण वह अजन्मा है तथापि नाना चराचर जगत् के रूप में उत्पन्न होता है। अथवा अजन्मा होता हुआ भी विभिन्न रामादि के रूप में अवतरित होता है। ब्रह्मज्ञानी उसके स्वरूप को अच्छी तरह जानते हैं। उस पर-ब्रह्म में ही समस्त भुवन और उनमें रहने वाले चराचर जीव स्थित हैं।

यो देवेब्भ्यऽआतपंति यो देवानाम्पुरोहितः।
पूर्व्वो यो देवेब्भ्यो जातो नमो रुचाय ब्राह्मये ॥२०॥

व्याख्या – **यः = प्रजापतिः, देवेभ्यः = देवानां प्रयोजनाय, आतपति = सूर्यरूपेण आ-समन्तात् द्योतते, यः = प्रजापतिः, देवानाम् = इन्द्रादीनां देवानाम्, पुरोहितः = यज्ञादि कृत्येष्वग्रे नीतः, हविमादातुम् अग्निरूपेणाग्रगामी इति भावः, यः = प्रजापतिः, देवेभ्यः = देवानां सकाशात्, तेषामुपकाराय वा, पूर्वम् = सर्वप्रथमम्, जातः = उत्पन्नः, तस्मै, रुचाय = दीप्यमानाय, ब्राह्मये = ब्रह्मभूताय, नमः = नमोऽस्तु।**

अर्थ – जो प्रजापति परब्रह्म देवताओं के प्रयोजन को सिद्ध करने के लिए सूर्यरूप में परितः प्रकाशित होता है, जो इद्रादि देवताओं का पुरोहित है (यज्ञ से हवि को लाने के कारण अग्नि ही देवताओं का पुरोहित है), जो देवताओं के कल्याण के लिए सर्वप्रथम उत्पन्न हुआ, उस परब्रह्म को नमस्कार।

रुचम्ब्राह्म्जनयंन्तो देवाऽअग्ग्रे तदंब्रुवन्। यस्त्वै वम्ब्राह्मणो विद्यात्तस्यं देवाऽअंसन्वशें॥२१॥

व्याख्या – **देवाः = इन्द्रादयः, रुचम् = दीप्तिमन्तम्, शोभनं वा, ब्राह्मम् = ब्रह्मणोऽपत्यम्, आदित्यम्, जनयन्तः = उत्पादयन्तः, तत् = तस्य, अग्रे = पुरः, अब्रुवन् = उक्तवन्तः, किमब्रुवन् इत्याकाङ्क्षायाम् – यः ब्राह्मणः = ब्राह्मकर्मकर्ता, त्वा = त्वाम्, एवम् = पूर्वोक्तप्रकारेण, विद्यात् = जानीयात्, तस्य = ब्राह्मणस्य, देवाः = इन्द्रादयः, वशे = अधिकारे, असन् = भवन्ति।**

अर्थ – इंद्रादि देवताओं ने दीप्तिमान ब्रह्मज्योतिवरूप आदित्य को प्रकट करके उनके समक्ष कहा – जो ब्राह्मण आपको पूर्वोक्त पुरुष-

सूक्त में वर्णित प्रकार से जानता है, देवता उसके आधीन हो जाते हैं।

श्रीश्श्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ॥२२॥

व्याख्या – **हे पुरुषोत्तम! श्रीः = सम्पत्तिः, लक्ष्मीः च = सौन्दर्यञ्च, ते = तव, पत्न्यौ = जाये, पत्नीस्वरूपे इत्यर्थः, अहोरात्रे = दिवा-निशे, पार्श्वे = पार्श्वस्थानीये, अथवा अहः प्रकाशरूपत्वात् विद्या, रात्रिश्च तमोरूपत्वादविद्या एवं विद्याविद्ये तव पार्श्वस्थानीये, नक्षत्राणि = ताराः, रूपम् = मूर्तिः, अश्विनौ = द्यावापृथिव्यौ, व्यात्तम् = विकसितं तव मुखम् अस्ति। इष्णन् = ईप्सितं कर्म-फलम्, मे = मह्यम्, इषाण = इच्छ, अमुं = लोकम्, इषाण, किं वा, सर्वम् = इहलोकपरलोकादिकम्, सर्वमभीप्सितं, मे = मह्यम्, इषाण = इच्छ।**

अर्थ – हे पुरुषोत्तम! श्री और लक्ष्मी आप की दो पत्नियाँ हैं, अहोरात्र (दिन-रात) आपके पाश्वस्थानीय है, आकाश में स्थित नक्षत्र आप का रूप है, पृथिवी और आकाश आप का मुख हैं। आप मेरे अभिलषित पदार्थों की इच्छा करें, मेरे इहलोक और परलोक में प्राप्तव्य पदार्थों की इच्छा करें, अर्थात् ऐसी इच्छात्मक कृपा करें कि मुझे समस्त प्राप्तव्य उपलब्ध हों।

(इति द्वितीयोऽध्यायः)

॥ अथ तृतीयोऽध्यायः ॥

॥ हरिः ॐ ॥

आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम्। सङ्क्रन्दनोनिमिषऽएकवीरः शतः सेनाऽअजयत्साकमिन्द्रः ॥१॥

व्याख्या – आशुः = क्षिप्रकारी शीघ्रगामी वा, शिशानः = शातनकर्ता, वृषभः = बलीवर्दः, न = इव बलवानिति भावः, भीमः = भयानकः, घनाघनः = शत्रूणामतिशयेन घातकः, चर्षणीनाम् = मनुष्याणाम्, क्षोभणः = सञ्चालकः, संक्रन्दनः = सम्यक्क्रन्दनं कर्ता, अनिमिषः = निमेषरहितः देवः आलस्य-प्रमादरहितो वा, एकवीरः = शूरतमः, इन्द्रः = इन्द्रनामको देवः, शतं सेनाः = शतसंख्याकः सेनाः, साकम् = एकवारमेव, अजयत् = जितवान्।

अर्थ – शीघ्रगामी अथवा कार्यकुशल, विनाश करने वाला, वृषभ (सांड़) के समान बलवान्, भयंकर शत्रुओं का हनन करनेवाला, पापियों के लिए क्षोभकारी गर्जन करने वाला, देवता होने के कारण निमेषरहित अथवा आलस्यरहित, अद्वितीय वीर इंद्र ने असंख्य सेना को एक बार में ही जीत लिया।

सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना। तदिन्द्रेण जयत तत्सहद्ध्वँ युधो नरऽइषुहस्तेन वृष्णा ॥२॥

व्याख्या – युधः = हे युद्धकर्तारः, नरः = मनुष्याः, धृष्णुना = भयरहितेन, संक्रन्दनेन = सम्यग्गर्जनकारिणा, युत्कारेण = युद्धकारिणा, अनिमिषेण = एकान्तचित्तेन, इषुहस्तेन = बाणकरेण, जिष्णुना = जयशीलेन, दुश्च्यवनेन = अच्युतशीलेन, वृष्णा = वर्षणशीलेन, इन्द्रेण = इन्द्रनामकदेवेन, तत् = क्रियमाणं युद्धम्, जयत = विजयत, तत् = शत्रुबलम्, सहध्वम् = पराजयध्वम्।

अर्थ – हे युद्धकर्ता मनुष्यो! भयरहित, गर्जन करने वाले, निरंतर युद्ध करने वाले, निमेष रहित अथवा सतत जागरूक, हाथ में बाण धारण करने वाले, सदा जयशील, जल बरसानेवाले, धैर्य से कभी च्युत न होनेवाले इंद्र की सहायता से युद्ध जीतो और शत्रुओं को पराजित करो।

सऽइषुहस्तैः स निषङ्गिभिर्वशी सँस्रष्टा स युधऽइन्द्रो गणेन। सँसृष्टजित्सोमपा बाहुशर्द्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥३॥

व्याख्या – वशी = सर्वसमर्थः, सः = इन्द्रः, इषुहस्तैः = बाणकरैः, निषङ्गिभिः = निषङ्गम् अस्यास्तीति निषङ्गी, तैः = खड्गवद्भिः योद्धारौ, संस्रष्टा = आवेष्टितः, स, गणेन = रिपुसमूहेन, सह, युधः = युद्धकर्ता, इन्द्रः, संसृष्टजित् = संसृष्टान् – सङ्गतान् शत्रून्

जयति यः सः तादृशः, सोमपाः = सोमपानकर्ता, बाहुशर्द्धिः = बाहुबलसम्पन्नः, उग्रधन्वा = उत्कटशरासनवान्, प्रतिहिताभिः = परिहिताभिः, इषुभिः, अस्ता = रिपूणामस्तकारी, शत्रुनाशकः, एतादृशेनेन्द्रण जयतीति संबन्धः।

अर्थ – जितेन्द्रिय वह इंद्र हाथों में बाण और तलवार लिये हुए योद्धाओं से घिरा हुआ शत्रु-समूह के साथ युद्ध करता है, वह इंद्र संगठित हुए शत्रुओं को जीतने वाला, सोमरस का पान करने वाला, बाहुबल से परिपूर्ण, उद्यत धनुष वाला और स्वयं के द्वारा छोड़े गये बाणों के द्वारा शत्रुओं का नाश करने वाला है (उस इंद्र के द्वारा विजय प्राप्त करो!)।

बृहंस्प्पते परिंदीया रथेंन रक्क्षोहा मित्राँ२ँ॥ऽ
अपबाधंमानः। प्रभुञ्जन्त्सेनाः प्प्रमृणो युधा
जयंन्नस्म्माकंमेद्ध्यविता रथांनाम् ॥४॥

व्याख्या – बृहस्पते = बृहतां = वाणीनां, पतिः = स्वामी, तत्संबोधने, इन्द्रः व्याकरणशास्त्रकर्तेति सः बृहस्पतिः, हे इन्द्र, रक्षोहा = रक्षसाम् = असुराणाम्, हा = हन्ता, रथेन, परिदीयाः = सर्वतो गच्छ, अमित्रान् = शत्रून्, अपबाधमानः = सर्वतो पीडयन्, सेनाः = शत्रुसम्बन्धिन्यः वाहिन्यः, प्रभञ्जन् = प्रकर्षेण भग्नाः सन्, युधा = युद्धेन, प्रमृणः = हिंसकान्, जयन्, अस्माकम् = पाठकर्तॄणाम्, रथानाम्, अविता = रक्षकः, एधि = वर्धस्व।

अर्थ – हे वाणीपति ! राक्षसों का विनाश करने वाले इंद्र ! आप रथ के द्वारा चारों तरफ भ्रमण कर तथा शत्रुओं का विनाश करते हुए, शत्रुओं की सेनाओं का मथन करते हुए, युद्ध के द्वारा हिंसकों को जीतते हुए, हम लोगों के रथों के रक्षक होते हुए, वृद्धि को प्राप्त हों।

बलविज्ञाय स्थविरः प्रवीरः सहस्वान्वाजी सहमानऽउग्रः। अभिवीरोऽअभिसत्त्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित् ॥५॥

व्याख्या – **इन्द्र = हे इन्द्र ! त्वम् बलविज्ञायः = सर्वेषां भूतानां बलं विजानातीति बलविज्ञायः = सर्वभूतबलविज्ञाता, स्थविरः = चिरन्तनतमः, प्रवीरः = प्रकृष्टबलशाली, सहस्वान् = बल-वान्, वाजी – वाजम् = अन्नम् अस्यास्तीति वाजी, उग्रः = चण्डः, अभिवीरः = वीरान् अभि = लक्ष्यीकृत्य गच्छतीति अभिवीरः = वीराभिमुखगन्ता, अथवा अभिगताः वीराः यस्य सः, अभि-सत्त्वा – सत्त्वम् = आत्मबलम्, अभितिष्ठति य सः = आत्मबल-सम्पन्नः, सहोजा – ओजसा = वीर्येण सहितः, गोवित् – गां = वाणीं वेति इति गोवित् = वाग्वेत्ता, सहमानः = आत्मसम्मान-सहितः, जैत्रम् = जयशीलम्, रथम्, आतिष्ठ = अस्माकं सहाय-तायै आरूढो भव !**

अर्थ – सबके बल को जाननेवाले, अतिशय, बलवान् अन्नवाले, वीरों को लक्ष्य करके प्रयाण करनेवाले, वीरों से घिरे हुए, सत्त्वसंपन्न, ओजवान्, वाणी के विज्ञाता और शत्रुओं को पराजित करनेवाले हो। हमारी सहायता के लिए जयशील रथपर आरूढ़ हो जाइए।

गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृण-न्तमोजसा। इमꣳ सजाताऽअनु वीरयध्व-मिन्द्रꣳ सखायोऽअनु सꣳरभध्वम् ॥६॥

व्याख्या – **सजाताः = इन्द्रेण सहैवोत्पन्नाः, सखायाः = मित्राणि हे देवाः! यूयम्, गोत्रभिदम् = वृष्टिमभिलक्ष्य गोत्रान् = मेघान्, भिन्नति-तम्, अथवा पर्वतानां भेत्तारम्, गोविदम् = वाग्वेत्तारम्, वज्रबाहुम् = पविहस्तम्, अज्म = सङ्ग्रामम्, जयन्तम्, ओजसा = बलेन, प्रमृणन्तम् = प्रमर्दनकारकम्, इमम् इन्द्रम् = देवपतिम्, अनुवीरयध्वम् = अनुगम्य वीरोचितकर्म कुरुध्वम्, अनुसंरभध्वम् = अनुगम्य वेगवन्तः भवत।**

अर्थ – हे इंद्र के साथ उत्पन्न होने वाले इंद्र के मित्र देवताओ! तुम लोग वृष्टि के लिए मेघों का भेदन करने वाले, पर्वतों का भेदन करने वाले, वाणी के विज्ञाता, हाथ में वज्र धारण करने वाले, संग्राम को जीतने वाले, बल के द्वारा शत्रुओं का मर्दन करने वाले, इस इंद्र का अनुगमन करते हुए वीरोचित युद्ध करो, वेग से प्रहार करने वाले का अनुगमन करते हुए तुम भी वेग से प्रहार करो।

अभि गोत्राणि सहसा गाहमानोदयो वीरः शतमन्युरिन्द्रः। दुश्च्यवनः पृतनाषाडयु-द्ध्योऽस्माकꣳ सेनाऽअवतु प्र युत्सु ॥७॥

व्याख्या – अदयः = दयारहितः, निर्भयो वा, वीरः = शूरः, शतमन्युः = शताश्वमेधयज्ञकर्ता, बहुक्रोधशीलो वा, दुश्च्यवनः = अच्युतः, पृतनाषाट् = शत्रुसेनानां शातयिता, अयुध्यः = योद्धुमशक्यः, इन्द्रः, युत्सु = युद्धेषु, गोत्राणि = घनानि, असुरकुलानि, पर्वतकुलानि वा, सहसा = तीव्रबलेन, अभिगाहमानः = परितः गाहनं क्रियमाणः, अस्माकम्, सेनाः = वाहिन्यः, प्रावतु = रक्षतु।

अर्थ – हे शत्रुओं के प्रति निर्दय, वीर, सौ अश्वमेध यज्ञ करनेवाले, अत्यंत क्रोधी, कभी च्युत न होने वाले, शत्रुसेना के विनाशक, अयुध्य (जिसके साथ कोई युद्ध नहीं कर सकता), इंद्र! युद्धों में असुरों के मध्य में बलपूर्वक विचरण करते हुए हमारी सेनाओं की रक्षा करो।

इन्द्रंऽआसान्नेता बृहस्पतिर्द्दक्षिणा युज्ञः
पुरऽएंतु सोमंः। देवसेनानांमभिभञ्जतीनाञ्जयंन्तीनाम्मरुतों युन्त्वग्ग्रंम् ॥८॥

व्याख्या – आसाम् = पुरोदृश्यमानानामस्मत्सहायिकानाम्, अभिभञ्जतीनाम् = शत्रूणामभितो मर्दनं कुर्वन्तीनाम्, जयन्तीनाम् = विजयमासादयन्तीनाम्, देवसेनानाम् = देवतानां वाहिनीनाम्, इन्द्रः = इन्द्रनामको देवः, नेता = नायकः भवतु, बृहस्पतिः = देवगुरुः, पुरः = अग्रतः, एतु = आगच्छतु, यज्ञः = यज्ञाख्यो देवः, सोमः = सोमदेवश्च, पुरः = अग्रे, एतु = आगच्छतु, मरुतः = मरुद्गणाः, अग्रम् = सेनायाः पुरोभागे, यन्तु = गच्छन्तु।

अर्थ – हमारी सहायता के लिए आयी हुईं, चारों ओर से शत्रुओं का

मर्दन करने वालीं, विजय प्राप्त करने वालीं, इन देवसेनाओं के नेता इंद्र हों, बृहस्पति, यज्ञ और सोमदेव युद्ध में आगे से आयें और मरुद्गण सेना के आगे जायें।

इन्द्रस्य वृष्णो वरुणस्य राज्ञऽआदित्यानां-
म्मरुताᳬं शर्द्धऽउग्रम्। महामनसाम्भुवन-
च्च्यवानाङ्घोषो देवानाञ्जयतामुदस्थात् ॥९॥

व्याख्या – **वृष्णः = शरवर्षणशीलस्य, मनोऽभिलाषवर्षणशीलस्य वा, इन्द्रस्य = देवराजस्य, राज्ञो वरुणस्य = वरुणराजस्य, आदित्यानाम् = आदित्यसञ्ज्ञकदेवानाम्, मरुताम् = मरुद्गणानां देवानाम्, शर्द्धः = गजाश्वपदातिरूपं बलम्, उग्रम् = भयङ्करम् भवतु, महामनसाम् = सुस्थिरचित्तानाम्, भुवनच्यवानाम् = भुवनपातसामर्थ्यवताम्, जयताम् = विजयशालिनाम्, देवानाम् = देवतानाम्, घोषः = विजयद्योतकः जितञ्जितमिति शब्दः, उदस्थात् = उत्तिष्ठतु।**

अर्थ – मनोरथों की वर्षा करनेवाले, बाणों की वर्षा करनेवाले इंद्र की, राजा वरुण की, आदित्यों की और मरुद्गणों की हाथी, घोड़ा और पैदल से युक्त सेनाएँ उग्र हों। उत्कृष्ट मन वाले, भुवनों को भी च्युत करने की सामर्थ्य वाले, विजयशाली देवताओं का विजयसूचक घोष हो।

उद्धर्षय मघवन्नायुधान्युत्सत्वनाम्मामकानाम्म-
नाᳬसि। उद्वृत्रहन्वाजिनाँवाजिनान्युद्रथानाञ्जयताँ
य्यन्तु घोषाः ॥१०॥

व्याख्या – **मघवन् = हे इन्द्र, आयुधानि = अस्मदीयान्यस्त्रशस्त्राणि, उद्धर्षय = उद्गतहर्षवन्ति कुरु-प्रहारसामर्थ्यवन्ति कुरु इति भावः, मामकानाम् = अस्मत्सम्बन्धिनाम्, सत्त्वानाम् = प्राणिनाम्, सैनिकानामिति भावः, मनांसि = स्वान्तानि, उत् = उन्नतानि हर्षवन्ति च कुरु। वृत्रहन् = हे वृत्रासुरहन्ता देवेन्द्र! वाजिनाम् = अश्वानाम्, वाजिनानि = बलानि, उत् = उन्नतं कुरु, जयताम् = विजयं कुर्वताम्, रथानाम् = स्यन्दनानाम्, घोषाः = जयसूचकशब्दाः, उद्यन्तु = उद्गच्छन्तु, वियद्व्यापिनो भवन्त्विति भावः।**

अर्थ – हे इंद्र! हमारे अस्त्र-शस्त्रों को उन्नत और प्रहारसामर्थ्य से युक्त करो, हमारे जीव सैनिकों के मन उन्नत करो, हे वृत्रहंता देवेन्द्र! हमारे अश्वों का बल बढ़ाओ, हमारे जीतने वाले रथों का विजय-सूचक शब्द चारों तरफ व्याप्त हो।

अस्म्माकमिन्द्रꣳ समृतेषु ध्वजेष्ष्वस्म्माकँ-
ब्याऽइषंवस्ता जंयन्तु। अस्म्माकँव्वीराऽउत्तंरे
भवन्त्वस्म्माꣳ॥ऽउं देवाऽअवता हवेंषु ॥११॥

व्याख्या – **अस्माकम्, ध्वजेषु = युद्धेषु, समृतेषु = सङ्गतेषु – शत्रुध्वजसंयुक्तेषु, इन्द्रः = देवेन्द्रः, अवतु, अस्माकम्, याः इषवः = ये बाणाः, ताः = बाणाः, जयन्तु = विजयिनो भवन्तु, तथा अस्माकम् वीराः = योद्धारः, उत्तरे = उन्नतावस्थायाम् भवन्तु, देवाः = हे देवाः, आहवेषु = युद्धेषु, अस्मान् = प्रार्थीः, उ = निश्चयेन, अवत = रक्षत।**

अर्थ – हमारे युद्धों में मरे हुए सैनिकों की इंद्र रक्षा करें। हमारे ये जो

बाण हैं, वे विजयशाली हों। हमारे वीर सैनिक उन्नत हों, हे देवताओं! युद्धों में आपलोग हमारी रक्षा करें।

अमीषांश्चित्तम्प्रतिलोभयन्ती गृहाणाङ्गान्य-
प्वे परेहि। अभि प्रेहि निर्दह हृत्सु
शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥१२॥

व्याख्या – **अप्वे = हे पापाधिष्ठातृत्रासदायिनि देवते, अमीषाम् = अस्मच्छत्रूणाम्, चित्तम् = हृदयम्, प्रतिलोभयन्ती = आकर्षयन्ती सती, एषाम्, अङ्गानि = अवयवान्, गृहाण = स्वीकुरु, स्वीकृत्य च, परेहि = दूरङ्गच्छ, अभिप्रेहि = परितो गच्छ, तेषां समीपञ्च गत्वा हृदयेषु, शोकैः = करुणाभिः, निर्दह = ज्वालय, अमित्राः = अस्माकञ्च ये शत्रवः, ते, अन्धेन = गाढेन, तमसा = अन्धकारेण, अज्ञानान्धकारेण वा, सचन्ताम् = संयुक्ताः भवन्तु।**

अर्थ – हे पाप की अधिष्ठातृ त्रास देने वाली व्याधि देवता! हमारे शत्रुओं के हृदय को प्रतिलोभित करती हुई उनके कटे हुए अंगों को ग्रहण करो, ग्रहण करके दूर जाओ, चारों तरफ भ्रमण करो, शत्रुओं के हृदयों को जलाओ और हमारे जो शत्रु हैं उन्हें घने अंधकार (अज्ञानांधकार) से युक्त करो।

अवसृष्टा परापत शरव्ये ब्रह्मसंशिते।
गच्छामित्रान्प्रपद्यस्व मामीषाङ्कञ्चनोच्छिषः ॥१३॥

व्याख्या – **ब्रह्मसंशिते = हे ब्रह्मणा = मन्त्रेण संशिते = तीक्ष्णीकृते, शरव्ये = अरिमारणपटो बाणहेते! त्वम् अवसृष्टा = प्रक्षिप्ता सती,**

परापत = शत्रूणामुपरि पत! गच्छ = शत्रुं प्रति याहि, गत्वा च, अमित्रान् = शत्रून्, प्रपद्यस्व = प्राप्तं कुरु, अमीषाम् = शत्रूणाम्, कश्चन् = एकमपि, मा उच्छिषः = मा त्यज, अर्थात् शत्रुषु एकमपि जीवितं मा त्यज!

अर्थ – हे मंत्रों के द्वारा तेज किये गए शत्रुविनाशकुशल बाण! तुम हमारे द्वारा प्रक्षिप्त होकर शत्रुओं पर गिरो। जाओ, इन शत्रुओं के पास जाकर इनमें से एक को भी जीवित मत छोड़ो।

प्रेता जयंता नरऽइन्द्रों वः शर्म्मं यच्छतु।
उग्ग्रा वंः सन्तु बाहवोंनाधृष्ष्या यथासंथ ॥१४॥

व्याख्या – **प्रेताः = युद्धाय प्रकर्षेण गताः, नरः = हे योद्धारः, यूयम्, जयत = शत्रून् विजयत, इन्द्रः = देवेन्द्रः, वः = युष्मान्, शर्म = शरणम्, यच्छतु = ददातु। वः = युष्माकम्, बाहवः = भुजाः, तथा उग्राः = उद्यतायुधाः, सन्तु = भवन्तु, यथा यूयम् अनाधृष्याः = शत्रुभिरपराजेयाः, असथ = भविष्यथ।**

अर्थ – युद्ध के लिए प्रस्थित योद्धा मनुष्यो! तुम शत्रुओं को जीतो, इंद्र तुम्हें शरण प्रदान करें। तुम्हारी भुजाएँ ऐसी उग्र (उद्यतास्त्र) हों, जिससे तुम लोगों पर शत्रु कभी भी आक्रमण न कर सकें।

असौ या सेनां मरुतः परेषामब्भ्यैतिं नऽ
ओजंसा स्प्पर्द्धमाना। ताङ्गूहत तमसा-
पंव्व्रतेन यथामीऽअन्न्योऽअन्न्यन्न जानन् ॥१५॥

व्याख्या – मरुतः = हे मरुद्गणदेवाः, परेषाम् = शत्रूणाम्, असौ = पुरोदृश्यमाना, या सेना = येयं वाहिनी, ओजसा = बलेन, स्पर्धमाना = स्पर्धां कुर्वाणा, नः = अस्माकम्, अभ्येति = सम्मुखमागच्छति, ताम् = शत्रुसेनाम्, अपव्रतेन = अपकर्मकारिणा, तमसा = अन्धकारेण, तथा, गूहत = व्याप्तं कुरु, यथा = येन, अमी = शत्रवः, अन्यः = एकः, अन्यम् = अपरम्, न जानन् = न जानीयात्। अन्धकाराच्छन्नेषु तेषु परस्परं एकोऽपरं न जानीयात् परस्परमेव युद्धं कृत्वा ते नष्टाः स्युरिति भावः।

अर्थ – हे मरुद्गण देवो! शत्रुओं की यह जो सामने दिखने वाली सेना बल से स्पर्धा करती हुई हमसे युद्ध करने के लिए आ रही है, उसको अपकर्म (उलटा कर्म) कराने वाले अंधकार से ऐसे आच्छादित करो जिससे कि वे शत्रु आपस में एक-दूसरे को ही न पहचान पायें और आपस में एक-दूसरे से युद्ध करते हुए ही नष्ट हो जायें।

यत्रं बाणाः सम्पतन्ति कुमारा विंशिखाऽइव। तन्नऽइन्द्रो बृहस्प्पतिरदितिः शर्म्म यच्छतु विश्श्वाहा शर्म्म यच्छतु ॥१६॥

व्याख्या – यत्र = यस्मिन् युद्धे, विशिखाः = विशिष्टशिखावन्तः, कुमाराः = ब्रह्मचारिणः, इव = यथा, बाणाः = शराः, सम्पतन्ति = अस्माकमुपरि निपतन्ति, तत् = तस्मिन् युद्धे, इन्द्रः = इन्द्रदेवः, बृहस्पतिः = सुराचार्यः, अदितिः = देवमाता च, नः = अस्मान्, शर्म = कल्याणम्, यच्छतु = ददातु, अस्माकं कल्याणं करोत्विति भावः, विश्वाहा = विश्वतः, शर्म = कल्याणम्, यच्छतु = ददातु।

अर्थ—जिस युद्ध में विशिष्ट (बड़ी) शिखा वाले ब्रह्मचारियों के समान शत्रुओं के बाण चारों तरफ गिर रहे हैं, उस युद्ध में इंद्र, बृहस्पति और देवमाता अदिति हमारा कल्याण करें। वे हमारा सब तरफ से कल्याण करें।

मर्म्माणि ते व्वर्म्मणा च्छादयामि सोमस्त्वा राजामृतेनानुवस्ताम्। उरोर्व्वरीयो व्वरुणस्ते कृणोतु जयन्तन्त्वानु देवा मदन्तु ॥१७॥

व्याख्या—**ते = तव, मर्माणि = मर्मस्थानानि, येषु स्थानेषु विद्धः सद्यः म्रियते तानि शिरो-हृदयादीनि मर्मस्थानानि, वर्मणा = कवचेन, छादयामि = आवृणोमि, सोमः राजा = सोमाख्यो देवराजः, त्वा = त्वाम्, अनु = कवचाच्छादनानन्तरम्, अमृतेन = अमृताख्येन द्रव्येण, वस्ताम् = आच्छादयतु, वरुणः = वरुणनामधेयो देवः, ते = तव वर्म, उरोर्वरीयः = श्रेष्ठादपि श्रेष्ठतरम्, कृणोतु = करोतु, एवञ्च, जयन्तम् = विजयन्तम्, त्वा = त्वाम्, देवाः = देवताः, अनु-मदन्तु = प्रहर्षयुक्तं कुर्वन्तु।**

अर्थ—हे योद्धाओ! तुम्हारे सिर-हृदय आदि मर्मस्थानों को कवचों से आच्छादित कर रहा हूँ। कवचों से आच्छादित होने के बाद सोमराजा तुम लोगों को अमृत से आच्छादित (सिंचित) करें। वरुणदेव तुम्हारे कवचों को और अधिक श्रेष्ठ बनाएँ। विजयशाली तुम्हारे आनंद को देवता और बढ़ाएँ।

(इति तृतीयोऽध्यायः)

॥ अथ चतुर्थोध्यायः ॥

॥ हरिः ॐ ॥

विभ्राड्बृहत्पिबतु सोम्यम्मध्वायुर्दधद्यज्ञ-
पतावविहुतम् । वातजूतो योऽअभिरक्षति
त्मना प्रजाः पुपोष पुरुधा विराजति ॥१॥

व्याख्या – **यज्ञपतौ = यज्ञकर्तरि यजमाने, अविहुतम् = खण्डता-रहितम्, सम्पूर्णम्, आयुः = जीवनम्, दधत् = विदधत्, विभ्राट् = सूर्यः, विशेषेण भ्राजते दीप्यते यः सः विभ्राट्, बृहत् = महत्, सोम्यम् = सोममयम्, मधु = मधुरस्वादम्, पिबतु। यः = सूर्यः, वातजूतः = वातेन प्रेरिता, त्मना = आत्मना – स्वस्वरूपेण, अभि-रक्षति = समन्तात् पालति, सः सूर्यः, प्रजाः = प्रजाः, पुपोष = यथाकाले उदयेनास्तेन वृष्टिदानेन च अपालयत्, पुरुधा = अनेकप्रकारैः, विराजति = विशेषेण भ्राजते।**

अर्थ – यज्ञ करने वाले यजमान में खंडता रहित (संपूर्ण) आयु का आधान करते हुए दीप्तिमान सूर्य सोमरसात्मक महान् मधु का पान करें। जो सूर्य वायु के द्वारा प्रेरित होकर अपने स्वरूप के द्वारा प्रजा का पोषण करते हैं, प्रजा की रक्षा करते हैं और अनेक प्रकार से सुशोभित होते हैं।

उदु त्यञ्जातवेदसन्देवंवहन्ति केतवः ।
दृशे विश्वाय सूर्यम् ॥२॥

व्याख्या – **केतवः = सूर्यरश्मयः, जातवेदसम् = जातवेदस्नामकं वह्निं दीप्तिमन्तम्, अथवा जातं वेदः कर्मफलं यस्मात् तम्, उत्यम् = उ इति विख्यातम्, सूर्यम् देवम् = द्योतमानं सूर्याख्यं देवम्, विश्वाय = सम्पूर्णजगतः, दृशे = दर्शनाय, उद्वहन्ति = उच्चैः कृत्वा धारयन्ति।**

अर्थ – सूर्य की किरणें अथवा सूर्य के अश्व, अग्नि के समान तेजस्वी, कर्मफल के दाता इस प्रसिद्ध सूर्यदेव को संपूर्ण जगत् को प्रकाशित करने के लिए ऊपर धारण करते हैं।

येना पावक चक्षसा भुरण्यन्तञ्जनाँ२।।ऽअनु। त्त्वँव्वरुण पश्श्यसि ॥३॥

व्याख्या – **पावक = पावयति पवित्रयति शोधयति इति पावकः, तत्सम्बोधने – हे पावक! वरुण = विपरीतरोधक अनिष्टनिवारक! सूर्य! त्वम् = भवान्, येन = अनिर्ज्ञातेन, चक्षसा = प्रकाशेन, जनान् = प्राणिनः, भुरण्यन्तम् = पालयन्तम्, इमं लोकम्, अनुपश्यसि = क्रमशः प्रकाशयसि, तेनैव प्रकाशेन अस्मानपि प्रकाशय इति तात्पर्यार्थः।**

अर्थ – हे पवित्र और शुद्ध करने वाले अनिष्टनिवारक सूर्य! आप जिस दिव्य प्रकाश के द्वारा प्राणियों का पालन करने वाले इस लोक को क्रमशः प्रकाशित करते हैं, उसी दिव्य ज्ञानात्मक प्रकाश से हमें भी प्रकाशित करें।

दैव्यांवदध्वर्य्यूऽआगंतꣳ रथेन सूर्य्यंत्त्वचा। मद्ध्वायज्ञꣳ समञ्जाथे। तम्प्रत्क्नथायँ व्वेनश्चित्रन्देवानाम् ॥४॥

व्याख्या – **दैव्यौ = देवानामिमौ, देवसंबन्धिनौ, अध्वर्यु = यज्ञेऽध्वर्युस्वरूपौ अश्विनीकुमारौ! युवाम्, सूर्यत्वचा = सूर्य इव कान्तिमता, रथेन आगतम् = आगच्छतम्, आगत्य च, मध्वा = मधुरिव स्वादवता, मधुरूपया वा हविषा, यज्ञम् = अस्माभिः क्रियमाणं यज्ञम्, समञ्जाथे = संरक्षणपूर्वकम् ऋद्धहविर्मन्तं कुरुतम्।**

अर्थ – हे देवों के अध्वर्यु स्वरूप अश्विनिकुमारो! आप दोनों सूर्य के समान कांतिवाले रथ पर बैठकर आयें, आकर मधु के समान या मधुरूप हवि के द्वारा हमारे यज्ञ में संरक्षण-पूर्वक हवन करें।

तम्प्रत्क्नथा पूर्वथा व्विश्वथेमथा ज्येष्ठतातिम्बर्हिषदꣳ स्वर्व्विदम्। प्रतीचीनँव्वृजनन्दोहसे धुनिमाशुञ्जयन्तमनु यासु वर्द्धसे ॥५॥

व्याख्या – **हे इन्द्र! प्रत्नथाः = पूर्व्यम्, भृग्वादयः, पूर्वथाः = पूर्वं जाताः, विश्वथाः = सर्वे प्राणिनः, इमथाः = इदानीं वर्तमानाश्च ये नराः, यथा तव स्तुत्या फलं लभन्तेस्म लभन्ते च, तथैव, ज्येष्ठतातिम् = ज्येष्ठतमम् सुरश्रेष्ठम् इति भावः, वर्हिषदम् = वर्हिदातारम्, स्वर्विदम् = स्वर्गप्रदातारम्, प्रतीचीनम् = अत्यन्तज्येष्ठम्, वृजनम् = बलवन्तम्, आशुम् = शीघ्रकारिणम्, जयन्तम् = सर्वत्र**

जयशीलम्, धुनिम्=शत्रुकम्पनम्, त्वां वयं स्तुमः, त्वं हि, दोहसे=अस्मत्कामान् पूरयसि, यासु=स्तुतिषु सत्यासु, वर्धसे= अस्मान् वर्धयासि।

अर्थ – हे इंद्र! अत्यंत प्राचीन भृगु आदि पूर्वज एवं विश्व के समस्त वर्तमान यजमान आपकी स्तुति द्वारा फल प्राप्त करते थे, उन्हीं के समान हमलोग भी सब से ज्येष्ठ, बर्हिदाता, स्वंर्गवेत्ता, स्वर्गदाता, सर्वपुरातन, वृजन, शीघ्रकर्मफलदाता, विजयशील और शत्रुओं को कँपानेवाले आपकी स्तुति करते हैं। स्तुतियों के अनंतर आप हमारे मनोरथों को पूरा करते हुए हमारी वृद्धि करते हैं।

अ॒यँवे॒नश्चो॑दय॒त्पृश्नि॑गर्भा॒ ज्योति॑र्जराय॒ू रज॑सो वि॒माने॑। इ॒मम॒पाᳬ्ँ॑ स॒ङ्ग॒मे सूर्य॑स्य॒ शिशु॒न्न विप्रा॑ म॒तिभी॑ रिहन्ति ॥६॥

व्याख्या – **ज्योतिर्जरायुः=ज्योतिः=प्रकाशः एव जरायुः= गर्भस्थशिश्वावेष्टकजरायुः इव आवेष्टनं यस्य सः, अर्थात् प्रकाशावेष्टितः, वेनः=कान्तिमान् चन्द्रः, रजसः=जलस्य, विमाने= निर्माणकाले, ग्रीष्मान्ते वर्षादौ, पृश्निगर्भाः=अपः, चोदयत्= प्रेरयति, अथवा पृश्निः द्युलोकः आदित्यो वा गर्भधारयिता यासां ताः अपः वर्षति। विप्राः=विद्वांसः विप्राः, इमम्, अपाम्= जलम्, सूर्यस्य=सूर्यदेवस्य, सङ्गमे=संयोगे सति, शिशुम्= बालम्, न=इव, मतिभिः=मतिमद्भिः वाग्भिः, रिहन्ति=स्तुवन्ति।**

अर्थ – प्रकाश या विद्युत्‌रूप जरायु से आवेष्टित कांतिमान चंद्र ग्रीष्म

ऋतु के अंत में जलों के निर्माणकाल में जल को प्रेरित करता है। विद्वान् ब्राह्मण सूर्य का संगम होने के कारण बाद में बरसने वाले इस जल की बालक के समान सार्थक वाणी से स्तुति करते हैं।

चित्रन्देवानामुदंगादनीकञ्चक्षुर्म्मित्रस्य वरुण-स्याग्नेः। आप्रा द्यावापृथिवीऽअन्तरिक्षꣳ सूर्य्यऽ आत्मा जगतस्तस्थुषश्च ॥७॥

व्याख्या – **देवानाम् = रश्मीनाम्, देवानाम् वा, अनीकम् = तेज-समूहः, चित्रम् = विचित्रम् आश्चर्यभूतम्, मित्रस्य = मित्रनामक-देवस्य सूर्यस्य वा, वरुणस्य = वरुणदेवस्य, अग्नेः = अग्निदेवस्य, त्रयाणामेव देवानाम्, चक्षुः = नेत्रस्वरूपः, असौ सूर्यः, उदगात् = उदितो बभूव, उदितश्चासौ सूर्यः, द्यावापृथिवी = दिवञ्च पृथिवीञ्च, अन्तरिक्षम् = आकाशम् च, आप्राः = आ-समन्तात् पूरितवान्, एतादृशोऽयं सूर्यः, जगतः = जगमस्वरूपस्य लोकस्य, तस्थुषश्च = स्थवरात्मकलोकस्य च, आत्मा = आत्मस्वरूपः, अयं सूर्य एव स्थावरजङ्गमस्वरूपस्य जगतः सकलव्यवहारप्रवर्तक-त्वात् प्रकाशकत्वाच्चात्मा।**

अर्थ – मित्र, वरुण और अग्नि देवताओं का नेत्रस्वरूप, तेजःसमूह यह सूर्य उदित होता है। उदित होने के बाद द्यौ, पृथिवी और आकाश को अपने प्रकाश से भर देता है। इस प्रकार प्रकाशात्मक और व्यवहार-प्रवर्तक होने के कारण यह सूर्य समस्त जंगम और स्थावर जगत का आत्मा है।

आनुऽइडांभिर्व्विदथें सुशुस्ति विश्श्वानंरः सविता देवऽएंतु। अपि यथां युवानो मत्संथा नो विश्श्वञ्जगंदभिपित्वे मंनीषा ॥८॥

व्याख्या – **विश्वानरः = विश्वस्य पालकः, सवितादेवः = सूर्यदेवः, नः = अस्माकम्, विदथे = यज्ञे, सुशस्ति = कल्याणकारी, इडाभिः = किरणैः, आ एतु = समागच्छतु। सूर्यानन्तरं देवान् निवेदयति – युवानः = नित्ययौवनवन्तः देवाः! अपि अभिपित्वे = आगमनानन्तरम्, यथा = येन प्रकारेण, यैः साधनैर्वा, मत्सथ = तृप्यथ, तथा नः = अस्माकम्, विश्वम् = सम्पूर्णम्, जगत् = जीवलोकं, मनीषा = बुध्या पूर्णं कुरुत। यथा अस्माभिः यूयं तृप्यथ तथैव युष्माभिरपि वयं तर्पणीयाः इति भावः।**

अर्थ – हे कल्याणकारी विश्वपालक सविताख्य सूर्यदेव! आप हमारे यज्ञ में किरणों के द्वारा आगमन करें। हे देवताओ, आप भी यहाँ आकर हम लोगों के द्वारा जैसे तृप्त किये जाएँगे, वैसे ही आप हमारे संपूर्ण परिजनों को बुद्धि-विचारपूर्वक तृप्त करें।

यदुद्य कच्चं वृत्रहन्नुदगांऽअभि सूंर्य्य। सर्व्वन्तदिन्द्र ते वशें ॥९॥

व्याख्या – **वृत्रहन् – वृत्रस्य = अन्धकारस्य, हन्ता = नाशकः, तत्संबोधने, सूर्य = जगत्प्रकाशक, अद्य = अस्मिन् दिने, यत् कच्च = येन केनापि प्रकारेण वर्तमानं पदार्थजातम्, अभि = पुरस्कृत्य,**

उदगाः = उदितोऽसि, हे इन्द्र, तत्सर्वम् = तत्सम्पूर्णं स्थावरजङ्गमात्मकं जगत्, ते = तव, वशे = वशगतमस्ति।

अर्थ – हे अंधकार के विनाशक सूर्य! आप आज जिस जगत के पदार्थसमूह को प्रकाशित करते हुए उदित हुए हैं, वह समस्त स्थावरजंगमात्मक जगत् आप के आधीन है।

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य।
विश्वमाभासि रोचनम् ॥१०॥

व्याख्या – **हे सूर्य = हे जगत्प्रकाशक देव! त्वं तरणिः = उपासकान् भवसागरात्तारकः, विश्वदर्शतः – विश्वैः = संपूर्णैः जीवैः दर्शनीयः, अथवा विश्वस्य = जगतः, दर्शतः = प्रकाशकः, ज्योतिष्कृत् = प्रकाशकर्ता, अथवा ज्योतिषां = नक्षत्राणाम्, कर्ता = सञ्चालकः, विश्वम् = संसारम्, रोचनम् = प्रकाशवन्तम्, आभासि = दीप्यसे।**

अर्थ – हे सूर्य, आप उपासकों को भवसागर के पार कराने वाले हैं, सभी प्राणियों के दर्शनीय, जगत के प्रकाशक, नक्षत्रमंडल के संचालक हैं तथा इस समस्त संसार को प्रकाशित करते हुए प्रकाशित होते हैं।

तत्सूर्यस्य देवत्वन्तन्महित्वम्मध्या कर्त्तोर्विततं सञ्जभार। यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ॥११॥

व्याख्या – सूर्यस्य = सर्वव्यवहारप्रवर्तकस्य, जगत्प्रकाशयितुः, तत्, देवत्वम् = विबुधत्वम्, महत्त्वम् = माहात्म्यम् ऐश्वर्यं वा, यत्, कर्तोः = द्यावापृथिव्योः, मध्या = अन्तरा, विततम् = विस्तीर्णम्, स्वकिरणजालम्, सञ्जभार = अस्तगमनवेलायामात्मनि संहृतवान्, यदा = एवञ्च, यस्मिन् काले, हरितः = जलहरणशीलान् स्वरश्मीन्, हरिद्वर्णकान् अश्वान् वा, सधस्थात् = अस्माल्लोकादादाय, ईत् = एव, अयुक्त = अन्यत्र संसक्तान् करोति। अथवा सह तिष्ठत्यास्मिन्निति सधस्थो रथः तस्मात्, अयुक्त = अमुञ्चत्, आत = समनन्तरमेव, रात्री = निशा, वासः = स्ववसनस्वरूपं तमः, सिमस्मै = सर्वस्मै, तनुते = विस्तारयति।

अर्थ – सर्वव्यवहार-प्रवर्तक जगत्प्रकाशक सूर्य का यही देवत्व और महत्त्व है कि आकाश और पृथ्वी के मध्य में विस्तीर्ण अपने किरण-जाल को अस्त होते समय जब वह समेट लेते हैं एवं रथ सहित अश्वों को इस लोक से लेकर अपर लोक में प्रस्थान करते हैं, तो तत्काल ही रात्रि अपने अंधकाररूपी वस्त्र से सब को आच्छादित कर देती है।

तन्मि॒त्रस्य॒ वरु॑णस्याभि॒चक्षे॒ सूर्यो॑ रू॒पङ्कृ॑णुते॒ द्योरु॒पस्थे॑। अ॒न॒न्तम॒न्यद्रुश॑दस्य॒ पाजः॑ कृ॒ष्णम॒न्यद्धरि॒तः सम्भ॑रन्ति ॥१२॥

व्याख्या – सूर्यः = रविः, द्योः = स्वर्गस्य, उपस्थे = अधिष्ठानकाले, मित्रस्य = मित्राख्यदेवविशेषस्य, वरुणस्य = वरुणनामकदेवस्य च, तत् = तादृशम्, रूपम् = स्वरूपम्, कृणुते = कुरुते धारयति

वा, तथा च तेनैव रूपेण, अभिचक्षे = जनानभितो विलोकयति, अर्थात् मित्ररूपेण सुकृतिनो जनान् पश्यति अनुगृह्णाति च एवं वरुणरूपेण दुष्कृतिनो पीडयति। अस्य = सूर्यस्य, अन्यत् = उभयेभ्यः भिन्नमपि, पाजः = रूपमस्ति, यत्, अनन्तम् = देश-कालाद्यपरिच्छेद्यम्, रुशत् = दीप्यमानं विज्ञानघनानन्दम्, अस्ति। अन्यत् = एभ्यः भिन्नञ्च, कृष्णम् = देवरूपं सगुणं रूपमप्यस्ति, यत् हरितः = दिशः इन्द्रियाणि वा, सम्भरन्ति = धारयन्ति।

अर्थ – स्वर्गलोक के अधिष्ठाता सूर्य, मित्रदेव और वरुणदेवरूप में दो स्वरूपों को धारण करते हैं। वह अपने मित्रात्मक स्वरूप से पुण्यात्माओं का कल्याण करते हैं और वरुणरूप से पापात्माओं को दंडित करते हैं। इनका एक तीसरा रूप भी है वह देशकालादि से अपरिच्छिन्न शुद्ध-प्रकाशात्मक अद्वैत है। उससे भी भिन्न इनका एक द्वैतात्मक कृष्णस्वरूप है जिसे इंद्रियस्वरूप दिशाएँ धारण करती हैं।

बण्णमुहाँ२॥ऽअंसि सूर्य्य बडांदित्त्य मुहाँ२॥ऽअंसि। मुहस्ते सुतो मंहिमा पंनस्यतेुद्धा देंव मुहाँ२॥ऽअंसि ॥१३॥

व्याख्या – **सूर्य = हे सूर्य! त्वम्, वट् = सत्यमेव, महान् = महत्व-शाली, असि = वर्तसे, आदित्य = हे आदित्य! त्वम्, वट् = सत्य-मेव, महान् असि। अपि च, महः = महत्त्वशालिनः ज्योतिष्मतः, सतः ते = तव, महिमा = माहात्म्यम्, पनस्यते = सर्वैः जनैः गीयते पूज्यते च अतः, देव = हे देव! त्वम्, अद्धा = निश्चितमेव तत्त्वतः,**

महान्=महत्तावान् असि। पुनः पुनः महत्त्वप्रतिपादनं नैकगुण-वत्वनिरूपणाय।

अर्थ—हे सूर्य! आप निश्चित ही महान् हैं। हे आदित्य! आप सत्य ही महान् हैं। महत्त्वशाली प्रकाशस्वरूप आपकी महिमा समस्त प्राणियों द्वारा गायी जाती है। इसलिए हे देव! आप अवश्य ही महान् हैं।

बट्सूर्य्य श्रवंसा महाँ२॥ऽअंसि सत्रा देव
महाँ२॥ऽअंसि। मह्ना देवानांमसुर्य्यः पुरो-
हिंतो विभु ज्योतिरदांब्भ्यम् ॥१४॥

व्याख्या—सूर्य=हे आदित्य! बट्=ऋतम्, श्रवसा=श्रव्येण बलेन, महान्=महत्त्ववान्, असि=वर्तसे, हे देव=हे दीप्तिमान्! सत्रा=सत्येन ओजसा, महानसि=महत्त्ववानसि। अपि च, मह्ना=स्वकीयेन तेजसा, देवानाम्=अमराणाम्, असुर्यः=हित-कर्ता, पुरोहितः=प्रथमपूज्यः, विभुज्योतिः=सर्वसंयुक्तज्योति-षाम्, अदाभ्यम्=अनभिभवनीयम्।

अर्थ—हे सूर्य! आप सर्वज्ञात बल और सत्य तेज से महान हैं। आप आपने तेज से देवताओं के हितकर्ता, प्रथमपूज्य, सर्वसंयुक्त-ज्योति वाले एवं किसी के भी द्वारा पराजेय नहीं हैं।

श्रायंन्तऽइव सूर्य्यं विश्वेदिन्द्रंस्य भक्षत। वसूंनि
जाते जनंमानऽओजंसा प्रतिं भागन्न दींधिम॥१५॥

व्याख्या – हे सूर्योपासकाः जनाः यथा सूर्यस्य रश्मयः सूर्यम् = रविम्, श्रायन्तः = आश्रयन्तः इव सूर्यं भजन्ते तथैव यूयमपि, इन्द्रस्य = सुरपतेः, विश्व = अखिलानि धनानि इन्द्रदत्तानीति भावः, इद् = पादपूर्णार्थः, भक्षत = भजन्ते। वसूनि = धनानि पुत्राश्वादीनि, जनमाने = उत्पाद्यमाने सति, ओजसा = बलेन, प्रतिभागम् = प्रविभक्तभागम्, न = इव, दीधिमः = स्थापयामः।

अर्थ – जैसे सूर्य की रश्मियाँ सूर्य का ही आश्रय लेती हैं वैसे ही हम भी इंद्र के द्वारा दी गयी समस्त धन-संपत्ति का भोग करें। पुत्र-पौत्रादि अभिलषित धनों की प्राप्ति के अनंतर अपने सामर्थ्य के अनुसार हम उसे आपस में बाँटकर धारण करें। (अथवा) विभक्त कर अपने बलानुरूप देवों के निमित्त हवि स्थापित करें।

अ॒द्या दे॑वा॒ऽउदि॑ता॒ सूर्य्य॑स्य॒ निरꣳहस॑ꣳ पिपृ॒ता निर॑व॒द्यात्। तन्नो॑ मि॒त्रो वरु॑णो मामहन्ता॒मदि॑ति॒ꣳ सिन्धु॒ꣳ पृथि॒वीऽउ॒त द्यौः ॥१६॥

व्याख्या – सूर्यस्य = आदित्यस्य, उदिता = उदयकालिका प्रातः-कालीनाः, देवाः = द्योतमानाः रश्मयः, यूयमस्मान्, अंहसः = पापात्, निष्पिपृतः = निर्मुक्तान् कुरुत, अवद्यात् = निन्दनीयात् दुर्यशयोऽपि रहितान् कुरुत। एवञ्च नः = अस्माकम्, तत् = ख्यातः, मित्रः = मित्राख्यो देवः, वरुणः = वरुणदेवः, अदितिः = देवमाता, सिन्धुः = जलाधिष्ठातृदेवता, उत् = अपि, मा = माम्, महन्ताम् = तेजस्विनं महत्त्ववन्तं कुर्वन्तु।

अर्थ – हे उदयकालीन सूर्य की रश्मियों! आप हम लोगों को पाप और निंद्य दुर्यश से निर्मुक्त करें। साथ ही हमारे पूज्य मित्र, वरुण, अदिति, सिंधु, पृथिवी और स्वर्ग के अधिष्ठातृदेवता भी मुझे तेजस्वी और महान् बनाएँ।

आकृष्ष्णेन रजंसा वर्त्तमानो निवेशयंन्न-
मृतम्मर्त्त्यंञ्च। हिरण्ययेंन सविता रथेना
देवो यांति भुवंनानि पश्श्यंन् ॥१७॥

व्याख्या – **सविता = सूर्यः, देवः = देवता, दीप्तिमान् वा, कृष्णेन = सूर्यागमनात् पूर्वं कृष्णवर्णेन, रजसा = लोकेन, अन्तरिक्षाख्येन, आवर्तमानः = पुनः पुनः परिक्रमणं क्रियमाणः, अमृतम् = अमरणशीलं देवम्, मर्त्यम् = मरणशीलं मनुष्यम्, च, निवेशयन् = स्वस्वव्यापारे नियोजयन्, भुवनानि = सर्वान् लोकान्, पश्यन् = अवेक्षणपूर्वकं प्रकाशयन्, हिरण्ययेन = स्वर्णमयेन, रथेन = स्वयानेन, आयाति = अस्मत् समीपमुपगच्छति।**

अर्थ – वह दीप्तिमान सूर्य, सूर्य के अभाव में पहले कृष्णवर्ण के अंतरिक्ष लोक से पुनः-पुनः परिक्रमण करते हुए, देवताओं और मनुष्यों को अपने-अपने व्यापारों में नियोजित करते हुए, समस्त लोकों को निरीक्षणपूर्वक प्रकाशित करते हुए, अपने स्वर्णमय रथ के द्वारा आते हैं।

(इति चतुर्थोऽध्यायः)

॥ अथ पञ्चमोऽध्यायः ॥

॥ हरिः ॐ ॥

नमस्ते रुद्र मन्यवऽउतो तऽइषवे नमः।
बाहुभ्यामुत ते नमः ॥१॥

व्याख्या – हे रुद्र – रु = दुःखं द्रवयति इति रुद्रः, वा पापिनो जनान् रोदयति दुःखभोगेन इति रुद्रः, तत्सम्बोधने, हे रुद्र = हे दुःखनाशक! ते = तव, मन्यवे = क्रोधाय, नमः, उतः = तदनन्तरं, ते = तव, इशवे = बाणाय, नमः = नमस्करोमि, उत = अपि च, ते = तव, बाहुभ्याम् = भुजाभ्याम्, नमः = नमस्करोमि। क्रोधयुक्तः बाणहस्तश्च त्वमस्मच्छत्रुविनाशकोऽसि इति तव क्रोधाय, बाणाय, बाहुभ्याञ्च नमः।

अर्थ – पुण्यात्माओं के दुःख-निवारक और पापियों के दुःख-कारक हे रुद्र! आपके क्रोध को नमस्कार, आप के बाण को नमस्कार एवं आप की दोनों भुजाओं को नमस्कार। (हे रुद्र! आप क्रोध से युक्त होकर हाथों में बाण लेकर हमारे शत्रुओं का संहार करते हैं अतः आप के क्रोध, बाण एवं बाहुओं को नमस्कार है – यह तात्पर्यार्थ है।)

या ते रुद्र शिवा तनूरघोरापापकाशिनी।
तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥२॥

व्याख्या – रुद्र = हे दुःखनाशक देव! ते = तव, अघोरा = अभयङ्करा अर्थात् सौम्या, अपापकाशिनी = न पापः अपाप = पुण्यः, तस्य काशिनी = प्रकाशिनी अर्थात् पुण्यफलदायिनी, शिवा = मङ्गलकारिणी; तनुः = शरीरम् अस्ति, तया = पूर्ववर्णितया, गिरिशन्ता – गिरि = वाचि, शं = कल्याणं तनोति या सा तया, अथवा गिरौ = पर्वते, कैलाशाख्ये स्थितः प्राणिनां शं = कल्याणम् तनोतीति या सा तया, शन्तमया = सुखतमया, तन्वा = शरीरेण, नः = अस्मान्, अभिचाकशीहि = समन्ताद् दीप्तिमान् कुरु।

अर्थ – हे रुद्र! आप का यह जो सौम्य, पुण्य को प्रकाशित करने वाला मंगलकारी शरीर है, उस कल्याणकारी वाणी को देने वाले, कैलाश पर स्थित रहकर प्राणियों का कल्याण करने वाले, सुखस्वरूप शरीर के द्वारा हमें चारों ओर प्रकाशित करें।

यामिषुंङ्गिरिशन्तु हस्तें बिभुर्ष्यस्तंवे।
शिवाङ्गिरित्र ताङ्कुरु मा हिं॑सीः पुरुंषुञ्जगंत् ॥३॥

व्याख्या – गिरिशन्त = हे पर्वतस्थ कल्याणकारी देव! याम् इषुम् = यं बाणम्, अस्तवे = शत्रूणां विनाशाय, हस्ते = करे, बिभर्षि = धारयसि, गिरित्र = हे कैलाशस्य त्रातः! ताम् = इषुम्, शिवाम् = मङ्गलकारिणीम्, कुरु = विधेहि, अपि च, पुरुषम् = प्राणिसमवायम्, जगत् = स्थावरजङ्गमात्मकमन्यदपि गवादिप्राणिजातम्, मा हिंसीः = मा अवधीः, मा नाशयेति भावः।

अर्थ–हे पर्वतवासी कल्याणकारी रुद्रदेव! जिस बाण को आप शत्रुओं के विनाश के लिए हाथ में धारण करते हैं, उस बाण को हमारे लिए मंगलकारक बनाएँ तथा मनुष्यों एवं जगत के अन्य प्राणियों को न मारें।

शिवेन वचसा त्वा गिरिशाच्छा वदामसि।
यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत् ॥४॥

व्या.–**गिरिश**–गिरौ=पर्वते कैलाशे शेते इति गिरिशः, तत्सं-बुद्धौ–हे कल्याणकारिन्, **शिवेन**=कल्याणकारिणा, **वचसा**=वचनेन, **अच्छा**=निर्मलम्, **त्वा**=त्वाम्, **वदामसि**=प्रार्थयामहे, **यत्**, **नः**=अस्माकम्, **सर्वम्**=सम्पूर्णम्, **जगत्**=स्थावरजङ्गमात्मकम् संसारम्, **यथा**=येन प्रकारेण, **अयक्ष्मम्**=यक्ष्मादिरोगरहितम्, **सुमनाः**=शोभनान्तःकरणवच्च, **असत्**=स्यात्।

अर्थ–हे कैलाशवासी देव! हम मंगलकारिणी वाणी के द्वारा निर्मलस्वरूप वाले आप की स्तुति करते हैं। अप ऐसा विधान कीजिए, जिससे हमारा यह संपूर्ण जगत राजयक्ष्मादि रोगों से रहित और शुद्ध मन वाला हो।

अध्यवोचदधिवक्ता प्रथमो दैव्यो
भिषक्। अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च
यातुधान्योऽधराचीः परासुव ॥५॥

व्याख्या – अधिवक्ता = निगमागमव्याख्यानपरः, प्रथमः = सर्वदेवाग्रगण्यः, दैव्यः = देवानां हितकर्ता, भिषक् = भवरोगनिवारकत्वात् वैद्यरूपः, अध्यवोचत् = मामुपदिष्टवान् सद्ज्ञानमिति शेषः। प्रत्यक्षं स्तौति – हे रुद्र, सर्वान् = निखिलान्, अहीन् = विषवतः जन्तून् च, जम्भयन् = संहारयन्, सर्वाः = सम्पूर्णाः, अधराचीः = अधोगमनशीला निकृष्टकर्मकारिणः, यातुधान्यः = राक्षसाः च, परासुव = अस्मत्तो दूरीकुरु।

अर्थ – निगमागम-व्याख्यानपटु, सभी देवों के अग्रगण्य, देवों के हितकर्ता, स्मरण से ही भवरोग के निवारक वैद्यस्वरूप रुद्रदेव ने मुझे सद्ज्ञान का उपदेश किया है। दें रुद्रदेव! आप संपूर्ण हमारे शत्रुभूत सर्पादि जंतुओं का संहार करते हुए, अधःगामी, निकृष्टकर्म करने वाले राक्षसों को भी हमसे दूर करें।

असौ यस्ताम्म्रोऽअंरुणऽउत बुभ्रुः सुमङ्गलः। ये चैनः रुद्राऽअभितो दिक्षु श्रिताः संहस्रशोवैषाः हेडऽईमहे ॥६॥

व्याख्या – मन्त्रेऽस्मिन् आदित्यरूपं रुद्रं स्तौति – यः असौ = योऽयं प्रत्यक्षं दृश्यमानः आदित्यरूपी रुद्रः, ताम्रः = उदयकाले ताम्रवर्णः, च = एवं, अरुणः = मध्याह्नकाले अरुणवर्णः, उत = अपि च, बभ्रुः = अस्तगमनवेलायां बभ्रुवर्णः, सः, सुमङ्गलः = शोभनमङ्गलकारी अस्ति। च = अपि च, ये सहस्रशः = सहस्राधिकाः अनन्ताः, रुद्राः = रश्मयः, एनम् = सूर्यम्, अभितः = सर्वतः, दिक्षु =

प्राच्यादिषु हरित्सु, श्रिताः = व्याप्ताः सन्ति, एषाम् = रुद्राणाम्, हेडः = दाहम्, क्रोधं वा, ईमहे = भक्त्या वयं निवारयामः।

अर्थ – इस मंत्र में सूर्यरूपी रुद्र की स्तुति करते हुए कहा गया है – यह तो प्रत्यक्ष दृश्यमान आदित्यरूप रुद्र हैं, ये प्रातः उदयकाल में ताम्रवर्ण के, मध्याह्नकाल में अरुणवर्ण के और सायं अस्तकाल में बभ्रुवर्ण के रूप को धारण कर हम सबके मंगलकारी हैं। और यह जो हजारों दीप्तिमान किरणें इनके चारों ओर दिशाओं में व्याप्त हैं, इन किरणों के क्रोधरूप दाह को हम भक्तिपूर्वक स्तवन से निवारित करते हैं।

असौ योऽवसर्प्पति नीलग्ग्रीवो विलोहितः।
उतैनङ्गोपाऽअदृश्श्रन्नदृश्श्रन्नुदहार्य्यः स दृष्टो मृडयाति नः ॥७॥

व्याख्या – यः असौ = योऽयम् आदित्यरूपः, नीलग्रीवः = विषाश्रयत्वान्नीलगलवान् सूर्यश्चास्तकाले नीलग्रीव इव लक्ष्यमाणः, उत = अपि च, विलोहितः = विशिष्टलोहितवर्णः, अवसर्पति = अस्ताचलं गच्छन् अधःसर्पति, एतादृशमेनम् रुद्रम्, गोपाः = गोपालकाः शायं परावर्तनकाले, अथवा वेदोक्तसंस्कारहीनाः वेदपराङ्मुखाः गोपालनमात्रकुशलाः, अदृश्रन् = पश्यन्ति, अपि च, उदहार्यः = जलमानाय जलाशयेषु गताः नार्यः, अदृश्रन् = पश्यन्ति, सः = एतादृशः सूर्यरूपः रुद्रः, नः = अस्मान्, मृडयाति = आनन्दयति।

अर्थ – अस्तकाल में नीले आकाश में नीले कंठ वाले शिव के समान परिलक्षित, साथ ही रक्तवर्ण का यह सूर्य अस्त होता हुआ नीचे सरक रहा है। इस प्रकार के इस सूर्य को घर को लौटते समय गाय चराने वाले ग्वाले एवं जल लेकर पनघट से लौटती हुई स्त्रियाँ देखती हैं। इस तरह देखे गये यह सूर्य हम लोगों को आनंद देते हैं।

नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे।
अथो येऽअस्य सत्त्वानोहन्तेभ्योऽकरन्नमः ॥८॥

व्याख्या – नीलग्रीवाय = नीलकण्ठाय, सहस्राक्षाय = सहस्रनेत्रवते इन्द्रस्वरूपाय, मीढुषे = जलवर्षकारिणे पर्जन्यरूपाय, नमः = नमस्कारः, अस्तु = भवतु, अथो = अपि च, अस्य = नीलकण्ठस्य, ये सत्वानः = नमेरुप्रमुखा ये सेवकाः गणाः, तेभ्यः अपि, अहम् = निवेदकः, नमः = नमस्कारम्, अकरन् = करोमि।

अर्थ – नीले कंठवाले, इंद्र के समान हजार नेत्रवाले एवं वर्षा करने वाले पर्जन्यरूप रुद्र को नमस्कार हो। और भी इस नीलकंठ रुद्र के जो नमेरु आदि सेवकगण हैं, उनको भी मैं नमस्कार करता हूँ।

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम्।
याश्च ते हस्तऽइषवः परा ता भगवो वप ॥९॥

व्याख्या – भगवः = हे कल्याणकारिन्, ऐश्वर्यसम्पन्न! त्वम्, इदानीम् अस्मत्स्तवनकाले, धन्वनः = शरासनस्य, उभयोः = द्वयोः, आर्त्न्योः = कोटयोः स्थिताम् संलग्नामिति वा, ज्याम् = प्रत्यञ्चां,

मौर्वीम्, प्रमुञ्च = त्यज, च = अपि च, याः = प्रसिद्धाः, ते = तव, हस्ते = करे, इषवः = बाणाः सन्ति, ताः = बाणाः अपि, परा वप = दूरं प्रक्षिप।

अर्थ – हे कल्याणकारी ऐश्वरर्यसंपन्न रुद्र! आप इस हमारे स्तवन के समय धनुष के दोनों किनारों पर चढ़ी हुई इस डोरी को खोल दें एवं विख्यात इन अपने हाथ में स्थित बाणों को फेंक दें।

विज्ज्यन्धनुः कपर्दिनो विशल्यो बाणवाँ२॥ऽउत।
अनेशन्नस्य याऽइषवऽआभुरस्य निषङ्गधिः॥१०॥

व्याख्या – कपर्दिनः – कपर्दः = जटाजूटः अस्यास्तीति कपर्दी, तस्य कपर्दिनः = शिवस्य, धनुः = शरासनम्, विज्यम् – विगता ज्या = प्रत्यञ्चा यस्मात्तादृशम् = प्रत्यञ्चारहितम्, भवतु, उत = अपि च, बाणवान् = शरवान् धनुः, विशल्यः = शल्यरहितः व्रण-करणसामर्थ्यरहितः विफलः भवतु। अपि च, अस्य = रुद्रस्य, याः इषवः = बाणाः, ता अपि, निषङ्गधिः = खड्गकोषः, आभुः = खड्गरहितः भवतु। अस्माकं स्तवनकाले रुद्रः सर्वथा शस्त्र-रहित एव तिष्ठत्विति भावः।

अर्थ – जटाजूटधारी इस रुद्र का धनुष डोरी-रहित होकर, शल्य (घाव) करने में असमर्थ होकर विफल हो। और इस रुद्र के जो बाण हैं, वे भी असमर्थ होकर नष्ट हों। साथ ही इस रुद्र की तलवार रखने की म्यान भी तलवार-रहित हो। हमारी स्तुति के समय रुद्रदेव हमारे समक्ष सर्वथा अस्त्र-रहित ही हों।

या ते॑ हे॒तिर्म्मी॑ढुष्टम॒ हस्ते॑ ब॒भूव॑ ते॒ धनु॑÷ ।
तया॒स्म्मान्वि॒श्श्वत॒स्त्वम॑य॒क्ष्मया॒ परि॑भुज ॥११॥

व्याख्या – **मीढुष्टम् = हे वर्षणशील पर्जन्यरूप रुद्र, ते = त्वदीय, हस्ते = करे, या = पुरोदृश्यमाना, हेतिः = अस्त्रविशेषः, धनुः = शरासनम्, बभूव = धनुरूपेणास्थितास्ति, तया = धनूरूपया, अयक्ष्मया = उपद्रवरहितया, हेत्या, विश्वतः = परितः, अस्मान् = तवस्तुतिगायकान् नः, परिभुज = परिरक्ष।**

अर्थ – हे वर्षा के द्वारा हमारा ताप शांत करने वाले पर्जन्यरूप रुद्रदेव! आपके हाथ में यह जो हेति नामक अस्त्रविशेष धनुष के रूप में स्थित है, उस उपद्रव-रहित कल्याणकारी हेति के द्वारा चारों ओर से हमारी रक्षा करें।

परि॑ ते॒ धन्व॑नो हे॒तिर॒स्म्मान्वृ॑णक्तु वि॒श्श्वत॑÷ ।
अथो॒ यऽइ॑षु॒धिस्तवा॒रेऽअ॒स्म्मन्निधे॑हि॒ तम् ॥१२॥

व्याख्या – **हे रुद्र! ते = तव, धन्वनः = शरासनात्मिका, हेतिः = आयुधविशेषः, विश्वतः = सर्वतः, अस्मान् = स्तोतॄन्, परिवृणक्तु = सर्वथा मुञ्चन्तु, अथो = अपि च, यः, तव = त्वदीयः, इषुधिः = तूणीरम्, बाणकोषम् अस्ति तमपि, अस्मत् = अस्माकं सकाशात्, आरे = दूरे, निधेहि = स्थापय।**

अर्थ – हे रुद्र! आपका यह जो धनुषात्मक हेति नामक आयुध है, वह हम लोगों का परित्याग करे (हमें न मारे)। एवं आपका यह जो बाण रखने का तूणीर है इसे भी हमारे पास से दूर रखें।

अवतत्त्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे। निशीर्य्य शल्यानाम्मुखा शिवो नः सुमना भव॥१३॥

व्याख्या – सहस्राक्ष – सहस्रम् अक्षीणि = नेत्राणि यस्य सः, तत्सं-बुद्धौ = हे सहस्रनेत्र! शतेषुधे – शतम् इषुधयः = तूणीराः यस्य सः तत्सम्बोधने, त्वम्, धनुः = शरासनम्, अवतत्य = विगतज्यं कृत्वा, शल्यानाम् = बाणानाम्, मुखाः = फलकानि, निशीर्य = कुण्ठितानि कृत्वा, नः = अस्मान् प्रति, शिवः = कल्याणकारी, सुमनाः = शोभनमानसवान् च भव।

अर्थ – हे सहस्र नेत्रों वाले एवं सैकड़ों तूणीर वाले रुद्रदेव! आप धनुष को डोरी-रहित करके तथा बाणों के अग्रभागों (फलकों) को कुंठित करके हम लोगों के प्रति कल्याणकारी भावना से युक्त चित्तवाले हों।

नमस्तऽआयुधायानातताय धृष्णवे।
उभाभ्यामुत ते नमो बाहुभ्यान्तव धन्वने॥१४॥

व्याख्या – हे रुद्रदेव! ते = तव, अनातताय = आतङ्करहिताय, धनुष्यनारोपिताय वा, आयुधाय = बाणाय, नमोऽस्तु = नमस्कारः अस्तु, ते = तव, धृष्णवे = प्रगल्भाय सततं रिपुघर्षणतत्पराय, धन्वने = शरासनाय, अपि, नमः, उत = अपि च, ते = तव, आभ्याम् = बाणप्रहारचतुराभ्यामुभाभ्याम्, बाहुभ्याम् = दोर्भ्याम्, नमः = नमस्कारोऽस्तु।

अर्थ – हे रुद्रदेव! आपके आतंकरहित धनुष पर न चढ़े हुए बाण नामक अस्त्र को नमस्कार, आपके प्रगल्भ शत्रु-संहार में तत्पर धनुष को भी नमस्कार, आपकी इन धनुष-बाण धारण करने वाली दोनों भुजाओं को भी नमस्कार।

मा नो॑ म॒हान्त॑मु॒त मा नो॑ऽअर्भ॒कम्मा
न॒ऽउक्ष॑-न्तमु॒त मा न॑ऽउक्षि॒तम्। मा
नो॑ वधीः पि॒तर॒म्मोत मा॒तर॒म्मा नः॑
प्रि॒यास्त॒न्वो॒ रुद्र रीरिषः ॥१५॥

व्याख्या – **हे रुद्रदेव! नः = अस्माकम्, महान्तम् = श्रेष्ठं गुरुपिता-महादिकम्, मा वधीः = मा हन, उत = अपि च, नः = अस्माकम्, अर्भकम् = शिशुम्, मा = मा हन, नः = अस्माकम्, उक्षन्तम् = सिक्तम् गर्भस्थम्, मा = मा हन, नः = अस्माकम्, पितरम् = जनकम्, मा = मा हन, उत = अपि च, नः = अस्माकम्, मातरम् = जननीम्, मा = मा हन, उत = अपि च, नः = अस्माकम्, प्रियाः = स्नेहीः, तन्वः = पुत्रपौत्रादीन् शरीरसदृशान् अपि, मा रीरिषः = मा हन।**

अर्थ – हे रुद्रदेव! हमारे गुरु, पितामह आदि श्रेष्ठ पुरुषों को मत मारिए, हमारे शिशुओं को मत मारिए, हमारे युवाओं को मत मारिए, हमारे गर्भस्थ बालकों को मत मारिए, हमारे पिता को मत मारिए, हमारी माता को मत मारिए और हमारे पुत्र-पौत्रादि को मत मारिए।

मा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः। मा नो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥१६॥

व्याख्या – हे रुद्रदेव! त्वम् नः = अस्माकम्, तोके = पौत्रे, तनये = पुत्रे, मा रीरिषः = सरोषः सन् मावधीः, नः, आयुषि = जीवने मा रीरिषः, नः, पयस्विनीषु = गोषु वा मा रीरिषः, नः, अश्वेषु = हयेषु, मा रीरिषः, नः, भामिनः = क्रोधवतः, वीरान् = शूरान्, मा वधी = मा हन्, वयम्, हविष्मन्तः = हविषा परिपूर्णाः सन्तः, सदमिति = सर्वदैव, त्वा = त्वाम्, हवामहे = यागेषु आवाहयिष्यामः।

अर्थ – हे रुद्रदेव! आप मेरे पौत्रों-पुत्रों पर क्रोधयुक्त न होएँ, हमारी आयु को क्षीण न करें, हमारी गायों (इंद्रियों), अश्वों और क्रोधी वीर योद्धाओं को न मारें। हम लोग हवि से परिपूर्ण यज्ञों में आपका सदा आवाहन करेंगे।

नमो हिरण्यबाहवे सेनान्ये दिशाञ्च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनाम्पतये नमो नमः शष्पिञ्जराय त्विषीमते पथीनाम्पतये नमो नमो हरिकेशायोपवीतिने पुष्टानाम्पतये नमो नमो बभ्लुशाय ॥१७॥

व्याख्या – हिरण्यवाहवे – हिरण्यम् = स्वर्णम्, तदिव दीप्तिमत् बाहुः यस्य सः तस्मै, अथवा हिरण्याभरणाभूषितो बाहुः यस्य सः तस्मै, नमः, सेनान्ये = सेनापतये, दिशाम् = हरितानाम्, पतये = स्वामिने, च, नमः, हरिकेशेभ्यः = पर्णरूपाः हरितवर्णाः केशाः येषान्तेभ्यः, वृक्षेभ्यः = आतपनिवारकत्वात् वृक्षरूपेभ्यः, रुद्रेभ्यः नमः, पशूनाम् = जीवानाम्, पतये = पालकाय, नमः, त्विषीमते – त्विषी = कान्तिः अस्यास्तीति त्विषीमत्, तस्मै = कान्तिमते, शष्पिञ्जराय – शष्पम् = तृणम्, तद्वत् पिञ्जराय = पीतरक्तवर्णाय, रुद्राय, नमः, पथीनाम् = मार्गाणाम्, पान्थानाम् वा, पतये = स्वामिने, नमः, हरिकेशाय = हरितवर्णकेशाय, जरारहिताय वा, उपवीतिने = यज्ञोपवीतसूत्रधारिणे, रुद्राय नमः, पुष्टानाम् = बलवताम् गुणिनाम् वा, पतये = स्वामिने, नमः अस्तु।

अर्थ – सोने के समान दीप्तिमान अथवा स्वर्णालंकारों से अलंकृत भुजाओं वाले सेनापति रुद्र को नमस्कार, दिशाओं के स्वामी को नमस्कार, पत्ते के समान हरे बालों को धारण करने वाले वृक्षरूप रुद्र को नमस्कार, जीवों के पालक रुद्र को नमस्कार, कांतिमान तृण के समान लाल-पीले रंग के रुद्र को नमस्कार, मार्गों के और उनपर चलनेवाले पथिकों के स्वामी रुद्र को नमस्कार, हरे केशों वाले जरारहित और यज्ञोपवीत धारण करनेवाले रुद्र को नमस्कार, बनवान एवं गुणवान व्यक्तियों के पालक रुद्र को नमस्कार।

नमो॑ बभ्लुशाय॑ व्याधिनेऽन्ना॑नाम्पत॑ये॒ नमो॒ नमो॑ भ॒वस्य॑ हे॒त्यै जग॑ता॒म्पत॑ये॒ नमो॒ नमो॑ रु॒द्राया॑त-

तायिने क्क्षेत्राणाम्पतये नमो नमः सूताया-
हन्त्यै वनानाम्पतये नमो नमो रोहिताय ॥१८॥

व्याख्या – **बभ्लुशाय = कपिलवर्णाय, अथवा बिभर्तिरुद्रमिति बभ्लुः = वृषभः, तस्मिन् शेते यः सः बभ्लुशः, तस्मै = रुद्राय, नमः, व्याधिने – विध्यति शत्रूनिति व्याधिन्, तस्मै = शत्रुसंहार-काय, अन्नानाम् = धान्यानाम्, पतये = स्वामिने, नमः, भवस्य = संसारबन्धनस्य, हत्यै = छेदने, आयुधस्वरूपाय रुद्राय नमः, जगताम् = प्राणिनाम्, पतये = स्वामिने, रुद्राय नमः, आततायिने – आततेन = विस्तृतेन धनुषा सह एति = गच्छतीति आततायी = उद्यतधनुः तस्मै रुद्राय नमः, क्षेत्राणाम् = शरीराणाम्, पतये = पालकाय, नमः, अहन्त्ये = अहननशीलाय रक्षकायेति भावः, सूताय = सारथिस्वरूपाय, नमः, वनानाम् = विपिनानाम्, जला-नाम् वा, पतये = स्वामिने, नमः = नमस्कारोऽस्तु।**

अर्थ – कपिलवर्ण के बैलपर बैठनेवाले रुद्र को नमस्कार, शत्रुओं के नाशक एवं अन्नों के स्वामी रुद्र को नमस्कार, संसार-बंधन के छेदन में अस्त्रस्वरूप रुद्र को नमस्कार, प्राणियों के स्वामी रुद्र को नमस्कार, सन्नद्ध-धनुषवाले रुद्र को नमस्कार, शरीरों के पालक, न मारनेवाले (रक्षक) और जलों के स्वामी रुद्र को नमस्कार।

नमो रोहिताय स्थपतये वृक्षाणाम्पतये
नमो नमो भुवन्तये वारिवस्कृतायौषधीना-

म्पतये नमो नमो मन्त्रिणे वाणिजाय कक्षा-
णाम्पतये नमो नम उच्चैर्घोषायाक्रन्दयते
पत्तीनाम्पतये नमो नमः कृत्स्नायतया ॥१९॥

व्याख्या – रोहिताय = रक्तवर्णाय, स्थपतये – स्थपतिः = गृहनिर्माणकर्ता = विश्वकर्मा, तत्स्वरूपाय, नमः, वृक्षाणाम् = उद्भिज्जानाम्, पतये = स्वामिने, नमः, भुवन्तये = भूरादिलोकविस्तारकाय, वारिवस्कृताय = वारिधिविस्तारकाय, नमः, ओषधीनाम् = रोगनाशिनीनाम्, पतये = रक्षकाय, नमः, मन्त्रिणे = सचिवरूपिणे, वाणिजाय = वणिक्कर्मकर्त्रे, रुद्राय नमः, कक्षाणाम् = वनजलतादीनाम्, पतये = रक्षकाय, नमः, उच्चैः = तारम्, घोषाय = नादकराय, आक्रन्दयते = आक्रन्दनकर्त्रे, नमः, पत्तीनाम् = पदातिसेनानाम्, पतये = पालकाय, नमः, नमोऽस्तु।

अर्थ – लोहित वर्ण के विश्वकर्मा-स्वरूप रुद्र को नमस्कार, वृक्षों के रक्षक को नमस्कार, भूमंडल और समुद्र का विस्तार करने वाले रुद्र को नमस्कार, औषधियों के स्वामी को नमस्कार, मंत्री और वणिक्-स्वरूप रुद्र को नमस्कार, लतादि लघुपादपों के स्वामी को नमस्कार, महानाद एवं आक्रंदन करने वाले रुद्र को नमस्कार, पैदल सेनाओं के रक्षणकर्ता रुद्र को नमस्कार।

नमः कृत्स्नायतया धावते सत्त्वनाम्पतये
नमो नमः सहमानाय निव्याधिन आव्या-

धिनीनाम्पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानाम्पतये नमो नमो निचेरवे परिचराया-रण्यानाम्पतये नमो नमो वञ्चते ॥२०॥

व्याख्या – कृत्स्नायतया – कृत्स्नं = सम्पूर्णमायतं विस्तृतं धनुः यस्यां सा कृत्स्नायता, तया कृत्स्नायतया = पूर्णविस्तृत-धनुर्वत्तया, (गत्या) धावते = युद्धे शत्रुमनुगच्छते, रुद्राय नमः, सत्त्वानाम् = शरणागतजीवानाम्, पतये = रक्षकाय, नमः, सह-मानाय = अभिभवकारिणे, निव्याधिने = निःशेषेण रिपुनाश-काय, नमः, आव्याधिनीनाम् = आसमन्तात् शत्रुहननशीलानां सेनानाम्, पतये = स्वामिने, नमः, निषङ्गिणे = निषङ्गधारिणे, ककुभाय = दिक्स्वरूपाय, रुद्राय नमः, स्तेनानाम् = चौर्यादि-कर्मपरायणा-नाम्, पतये = स्वामिने, नमः, निचेरवे = निःशेषेण चरणशीलाय, परिचरायः = परितः भ्रमणशीलाय, नमः, अरण्यानाम् = वनानाम्, पतये = स्वामिने, रुद्राय नमः।

अर्थ – धनुष को पूरा विस्तृत करके शत्रुओं के पीछे दौड़ने वाले रुद्र को नमस्कार, शरणागत के रक्षक को नमस्कार, पराजित करने वाले एवं शत्रुओं का सर्वनाश करने वाले को नमस्कार, वीर सेनाओं के स्वामी को नमस्कार, खड्गधारण करने वाले दिशास्वरूप रुद्र को नमस्कार, चोरों के रक्षक को नमस्कार, निरंतर चारों तरफ भ्रमण करने वाले रुद्र को नमस्कार, वनों के रक्षक रुद्र को नमस्कार।

नमो वञ्चते परिवञ्चते स्तायूनाम्पतये

नमो नमों निषङ्गिणंऽइषुधिमते तस्कंराणा-म्पतंये नमो नमं÷ सृकायिब्भ्यो जिघांꣳसद्भ्यो मुष्णताम्पतंये नमो नमोंसिमद्भ्यो नक्कञ्चरंद्भ्यो विकृन्तानाम्पतंये नमं÷ ॥२१॥

व्याख्या – **वञ्चते – वञ्चयति = प्रतारयति शत्रुं तस्मै, अथवा गमनशीलाय, रुद्राय नमः, परिवञ्चते = परितः शत्रुप्रतारकाय, परितः गमनशीलाय वा, नमः, स्तायूनाम् = चौराणाम्, पतये = स्वामिने, नमः, निखङ्गिणे = खड्गधारिणे, इषुधिमते = तूणीरधारिणे, नमः, तस्कराणाम् = गुप्तचौराणाम्, पतये = स्वामिने, नमः, सृकायिभ्यः – सृकेण = वज्रेण सह यान्ति ये ते सृकायिनः, तेभ्यः, जिघांसद्भ्यः = हन्तुमिच्छद्भ्यः, रुद्रेभ्यः नमः, मुष्णताम् = अपहर्तॄणाम्, पतये नमः, असिमद्भ्यः = असिधारकेभ्यः, नक्तञ्चरद्भ्यः = रात्रिविहारिणेभ्यः, नमः, विकृन्तानाम् = विशेषेण शत्रुकर्तनशीलानाम्, पतये = स्वामिने, नमः = नमोऽस्तु।**

अर्थ – शत्रुओं का वंचन करने वाले, परितः भ्रमण करने वाले को नमस्कार, चोरों के स्वामी रुद्र को नमस्कार, तलवारधारी, तूणीरधारी को नमस्कार, गुप्त चोरों के स्वामी को नमस्कार, वज्र के साथ गमन करने वाले, शत्रुओं को मारने की इच्छा वाले रुद्र को नमस्कार, अपहर्ताओं के स्वामी को नमस्कार, असिधारक एवं रात्रि में विहार करने वाले को नमस्कार, शत्रुओं का खंडन करने वालों के स्वामी रुद्र को नमस्कार।

नमऽउष्णीषिणे गिरिचुराय कुलुञ्चानां-
म्पतये नमो नमऽइषुमद्भ्यो धन्वायिभ्यश्च
वो नमो नमऽआतन्वानेभ्यः प्रतिदधाने-
भ्यश्च वो नमो नमऽआयच्छद्भ्योस्य-
द्भ्यश्च वो नमो नमो विसृजद्भ्यः ॥२२॥

व्याख्या – उष्णीषिणे = उष्णीषं – शिरोवेष्टनमस्यास्तीति उष्णीषी, तस्मै, गिरिचराय = पर्वतचराय, नमः, कुलुञ्चानाम् – कुं = भूमिं लुञ्चन्तीति कुलुञ्चाः, तेषाम् = कुलुञ्चकानाम्, कृषकानां, पतये = स्वामिने, नमः, इषुमद्भ्यः = बाणवद्भ्यः, रुद्रेभ्यः नमः, आतन्वानेभ्यः = धनुषि ज्यामारोपयद्भ्यः, नमः, च = अपि च, प्रतिदधानेभ्यः = धनुषि बाणस्य प्रतिसन्धानं कुर्वद्भ्यः, वः = युष्मभ्यम्, रुद्रेभ्यः नमः, आयच्छद्भ्यः – आयच्छन्ति = आकर्षयन्ति धनूँषि ये ते आयच्छन्तः, तेभ्यः, नमः, अपि च, अस्यद्भ्यः – आस्यन्ति = क्षिपन्ति बाणान् ये ते अस्यन्तः, तेभ्यः वः = युष्मभ्यम्, रुद्रेभ्यः, नमः = नमोऽस्तु।

अर्थ – पगड़ी धारण करने वाले, पर्वतों पर विचरण करने वाले रुद्रों को नमस्कार, पृथ्वी का हरण करने वालों के स्वामी को नमस्कार, बाण धारण करने वाले, धनुष धारण करने वाले तुम लोगों को नमस्कार, धनुष को खींचने वालों को भी नमस्कार, बाण चलाने वाले आप लोगों को नमस्कार।

नमो॑ विसृजद्भ्यो॑ विद्ध्य॑द्भ्यश्च वो नमो॒ नम॑÷ स्वपद्भ्यो॑ जाग्र॑द्भ्यश्च वो नमो॒ नम॒: शया॑नेभ्य॒ऽ आसी॑नेभ्यश्च वो नमो॒ नम॒स्तिष्ठ॑द्भ्यो॒ धाव॑द्भ्यश्च वो नमो॒ नम॑÷ स॒भाभ्य॑÷ ॥२३॥

व्याख्या – विसृजद्भ्यः = बाणविसर्जनकर्तृभ्यः, नमः, च = अपि च, विध्यद्भ्यः = शत्रुवेधनकुर्वद्भ्यः, वः = युष्मद्भ्यं, नमः, स्वपद्भ्यः = स्वप्नावस्थायां गतेभ्यः, जाग्रद्भ्यः = जाग्रदवस्थायाम् गतेभ्यश्च, वः नमः, शयानेभ्यः = सुषुप्त्यवस्थायाङ्गतेभ्यः, आसीनेभ्यः = स्थितेभ्यः, च व नमः, तिष्ठद्भ्यः = गतिरहितेभ्यः, धावद्भ्यः = वेगवद्भ्यः, च वः नमः।

अर्थ – शत्रुओं पर बाण छोड़ने वाले, शत्रुओं का वेधन करने वाले हे रुद्र! आप लोगों को नमस्कार, स्वप्नावस्था में गये हुए और जागते हुए भी आप लोगों को नमस्कार, सोये हुए और बैठे हुए आप लोगों को नमस्कार, स्थित और दौड़ते हुए आप लोगों को नमस्कार।

नम॑÷ स॒भाभ्य॑÷ स॒भाप॑तिभ्यश्च वो नमो॒ नमो॒ऽश्वे॑भ्यो॒ऽश्व॑पतिभ्यश्च वो नमो॒ नम॑ऽआव्या॒धिनी॑भ्यो वि॒विद्ध्य॑न्तीभ्यश्च वो नमो॒ नम॒ऽउग॑णाभ्यस्तृꣳह॒तीभ्य॑श्च वो नमो॒ नमो॑ ग॒णेभ्य॑÷ ॥२४॥

व्याख्या – सभाभ्यः = समितिरूपेभ्यः, सभापतिभ्यश्च = समिति-

स्वामिने, च वः = युष्मभ्यम्, नमः, अश्वेभ्यः = तुरङ्गरूपेभ्यः, अश्वपतिभ्यः = तुरगपतिभ्यः, च वः नमः, आसमन्तात् विध्यन्तीति आव्याधिन्यः, ताभ्यः, आव्याधिनीभ्यः = सेनारूपेभ्यः, विविध्यन्तीभ्यः = विशेषेण विध्यन्ति यास्ता, तेभ्यः = वेधनकर्तृसेनारूपेभ्यः, च वः नमः, उगणाभ्यः = उत्कृष्टगणवद्भ्यः, तृंहतीभ्यः = हन्तुं समर्थेभ्यः रुद्रेभ्यः, वः नमः।

अर्थ — सभारूप और सभापतिरूप रुद्रो! आपको नमस्कार, अश्व रूप और अश्वपतिरूप रुद्रों को नमस्कार, सर्वतः विशेषरूपेण शत्रुओं का वेधन करने वाली सेनारूप रुद्रों को नमस्कार, उत्कृष्ट गण वाले, शत्रुनाश में समर्थ हे रुद्रो! आप लोगों को नमस्कार।

नमो॑ ग॒णेभ्यो॑ ग॒णप॑तिभ्यश्च वो॒ नमो॒ नमो॒
व्राते॑भ्यो॒ व्रात॑पतिभ्यश्च वो॒ नमो॒ नमो॒ गृत्से॑भ्यो॒
गृत्स॑पतिभ्यश्च वो॒ नमो॒ नमो॒ विरू॑पेभ्यो
वि॒श्वरू॑पेभ्यश्च वो॒ नमो॑ नमः॒ सेना॑भ्यः ॥२५॥

व्याख्या — गणेभ्यः = गणरूपेभ्यः, गणपतिभ्यः = गणपालकेभ्यः, च वः = युष्मभ्यम्, नमः, व्रातेभ्यः = विभिन्नजीवानां सङ्घाः तत्स्वरूपेभ्यः, व्रातपतिभ्यः = सङ्घपालकेभ्यः, च वः नमः, गृत्सेभ्यः = मेधाविनेभ्यः, गृत्सपतिभ्यः = मेधाविपालकेभ्यः, च वः नमः, विरूपेभ्यः = विकृष्टनग्नमुण्डितजटिलादिरूपवद्भ्यः, विश्वरूपेभ्यः = समस्तजगद्रूपेभ्यः, अथवा विश्वरूपाः = तुरङ्गवदनहयग्रीवादयः तत्स्वरूपेभ्यः, वः = युष्मभ्यम्, नमः।

अर्थ – गण और गणपतिरूप रुद्रों को नमस्कार, विभिन्न जीवों के समूह-स्वरूप और उस स्वरूप के पालक रुद्रों को नमस्कार, मेधावी और मेधावियों के स्वामी रुद्रों को नमस्कार, (नग्न, मुंड़ित, जटाधारी आदि) विकृतरूप वाले और विश्वस्वरूप अथवा विभिन्न किन्नररूप रुद्रों! आप लोगों को नमस्कार।

नमः सेनाभ्यः सेनानिभ्यश्च वो नमो
नमो रथिभ्योऽअरथेभ्यश्च वो नमो नमः
क्षत्तृभ्यः सङ्ग्रहीतृभ्यश्च वो नमो नमो
महद्भ्योऽअर्भकेभ्यश्च वो नमः ॥२६॥

व्याख्या – **सेनाभ्यः = वाहिनीस्वरूपेभ्यः, नमः, सेनानिभ्यः = सेनानायकेभ्यः, च वः नमः, रथिभ्योः = स्यन्दनवद्भ्यः, नमः, अरथेभ्यः = रथरहितेभ्यः, च वः नमः, क्षत्रिभ्यः = रक्षकेभ्यः, स्थानाधिष्ठातृभ्यः, नमः, सङ्ग्रहीतृभ्यः = सङ्ग्रहकर्तृभ्यः, सारथिभ्यः, च वः नमः, महद्भ्यः = महत्त्ववद्भ्यः, नमः, अर्भकेभ्यः = शिशुभ्यः, च वः नमः।**

अर्थ – सेनास्वरूप रुद्रों को नमस्कार, सेनापतिस्वरूप रुद्रों को भी नमस्कार, रथवान् रुद्रों को नमस्कार, विना रथवाले रुद्रों को भी नमस्कार, रक्षा करनेवाले, रथपति रुद्रों को नमस्कार, संग्रह करने वाले, सारथीरूप रुद्रों को भी नमस्कार, ज्ञान और बल से महान रुद्रों को नमस्कार, बालस्वरूप अल्पज्ञ रुद्रों को भी नमस्कार।

नमस्तक्षंभ्यो रथकारेभ्यंश्च वो नमो
नमः कुलालेभ्यः कर्म्मारेभ्यश्च वो
नमो नमों निषादेभ्यंः पुञ्जिष्टेभ्यश्च वो
नमो नमंः श्वनिभ्यों मृगयुभ्यंश्च वो नमो
नमः श्वभ्यंः ॥२७॥

व्याख्या – **तक्षद्भ्यः = दारुशिल्पकर्तृस्वरूपेभ्यः, रुद्रेभ्यः नमः, रथ-कारेभ्यः = रथनिर्माणकर्तृभ्यः, च वः नमः, कुलालेभ्यः = कुम्भकारेभ्यः, नमः, पुञ्जिष्टेभ्यः = पक्षिघातकेभ्यः, च वः नमः, निषादेभ्यः = किरातेभ्यः, नमः, श्वनिभ्यः = कुक्कुरनायकेभ्यः, नमः, मृगयुभ्यः = व्याधेभ्यः, च वः = युष्मभ्यम् नमः।**

अर्थ – बढ़ई-स्वरूप रुद्रों को नमस्कार, रथनिर्माता-स्वरूप रुद्रों को भी नमस्कार, कुम्हार-स्वरूप रुद्रों को नमस्कार, लोहार-स्वरूप रुद्रों को भी नमस्कार, किरातरूप रुद्रों को नमस्कार, पक्षियों के शिकारी-स्वरूप रुद्रों को भी नमस्कार, कुत्तों द्वारा शिकार करने वालों के स्वरूप वाले रुद्रों को नमस्कार, मृगादि पशुओं के शिकारी स्वरूप रुद्रों को नमस्कार।

नमः श्वभ्यः श्वपंतिभ्यश्च वो नमो नमों भवायं च रुद्रायं च नमंः शर्वायं च पशुपतंये च नमो नीलं-ग्ग्रीवाय च शितिकण्ठांय च नमंः कपर्द्दिने ॥२८॥

व्याख्या – श्वभ्यः = श्वानरूपेभ्यः, रुद्रेभ्यः, नमः, श्वपतिभ्यः = श्वानपालकरूपेभ्यः, च वः नमः, भवाय = भवन्ति जायन्ते जीवाः अस्मादिति भवः, तस्मै = जीवजनकाय, नमः, रुद्राय = रु = दुःखं द्रावयति इति रुद्रः = दुःखनाशकाय, च नमः, शर्वाय = पापहारिणे, च नमः, पशुपतये = जीवपालकाय, च नमः, नीलग्रीवाय – नीला = श्यामा, ग्रीवा = गलः, यस्य सः, तस्मै नमः, शितिकण्ठाय – शितिः = श्वेतः, कण्ठः यस्य सः, तस्मै च नमः।

अर्थ – श्वानरूप रुद्रों को नमस्कार, श्वानपालकरूपं रुद्रों को नमस्कार, जीवों के जनक को नमस्कार, दुःख-नाश करने वाले को भी नमस्कार, पाप का हरण करने वाले को नमस्कार, पशुओं के स्वामी को भी नमस्कार, नीले कंठ वाले को नमस्कार, श्वेत कंठ वाले को भी नमस्कार।

नमः॑ कपर्दिने॑ च व्युप्तके॑शाय च नमः॑
सहस्राक्षाय॑ च शतध॑न्वने च नमो॑
गिरिशयाय॑ च शिपिविष्टाय॑ च नमो॑
मीढुष्टमाय चेषु॑मते च नमो॑ ह्रस्वाय॑ ॥२९॥

व्याख्या – कपर्दिने = जटाजूटवते, नमः, व्युप्तकेशाय = मुण्डितकेशाय च नमः, सहस्राक्षाय = सहस्रनेत्रवते, शतधन्वने = शतं धनुष्मते च नमः, गिरिशयाय = पर्वतशयनकारिणे, शिपिविष्टाय = पशुप्रविष्टाय, विष्णुरूपाय वा, किरणाच्छादि-

ताय वा च नमः, मीढुष्टमाय = सेककर्त्रे मेघरूपाय, इषुमते = बाणयुक्ताय च नमः।

अर्थ – जटाजूटधारी तथा मुंडित केशों वाले रुद्र को नमस्कार, सहस्र नेत्रों वाले तथा सौ धनुषों वाले रुद्र को नमस्कार, पर्वत पर सोने वाले किरणों से आच्छादित विष्णुरूप रुद्र को नमस्कार, सिंचन करने वाले मेघरूप तथा बाणों वाले रुद्र को नमस्कार।

नमो ह्रस्वाय च वामनाय च नमो बृहते
च वर्षीयसे च नमो वृद्धाय च सवृधे च
नमोऽग्र्याय च प्रथमाय च नमऽआशवे ॥३०॥

व्याख्या – ह्रस्वाय = लघुप्रमाणवते, वामनाय = लघ्वाकारवते च नमः, बृहते = प्रौढिमते, वर्षीयसे = अतिवृद्धाय च नमः, वृद्धाय = अधिकवयसे, सवृधे = बुधसहिताय च नमः, अग्र्याय = सर्वप्रथमजाताय, प्रथमाय = मुख्याय, च नमः।

अर्थ – ह्रस्वस्वरूप वाले और लघु आकार वाले रुद्र को नमस्कार, प्रौढ, महान तथा अतिवृद्ध रुद्र को नमस्कार, वृद्ध तथा विद्वानों से युक्त रुद्र को नमस्कार, सर्वप्रथम उत्पन्न तथा सबसे श्रेष्ठ रुद्र को नमस्कार।

नमऽआशवे चाजिराय च नमः शीघ्र्याय
च शीभ्याय च नमऽऊर्म्याय चावस्वन्याय
च नमो नादेयाय च द्वीप्याय च ॥३१॥

व्या. – आशवे = विभवे शीघ्रगामिने, अजिराय = गतिमते, च नमः, शीघ्र्याय = त्वरान्विताय, शीभ्याय = आत्मश्लाघिने जलप्रवाहरूपिणे वा च नमः, ऊर्म्याय – ऊर्मिः = तरङ्गः तासु भवः ऊर्म्यः तस्मै, अवस्वन्याय = जलध्वनिस्वरूपाय च नमः, नादेयाय = नद्यां भवः नादेयः तस्मै, द्वीप्याय = द्वीपे भवः द्वीप्यः, तस्मै च नमः।

अर्थ – शीघ्रगामी तथा गतिशील रुद्र को नमस्कार, त्वरायुक्त आत्मश्लाघी, जलप्रवाहरूप रुद्र को नमस्कार, तरंगाधिष्ठाता तथा जलाधिष्ठाता रुद्र को नमस्कार, नदी तथा द्वीपों में संभूत रुद्रों को नमस्कार।

नमो॑ ज्ज्येष्ठाय॑ च कनिष्ठाय॑ च नम॑÷ पूर्व॒जाय॑ चापर॒जाय॑ च॒ नमो॑ मद्ध्य॒माय॑ चापग॒ल्भाय॑ च॒ नमो॑ जघ॒न्या॒य च बु॒द्ध्न्या॒य च॒ नम॒ऽ सो॒भ्याय॑ ॥३२॥

व्या. – ज्येष्ठाय = वरिष्ठाय, कनिष्ठाय = लघवे, च नमः, पूर्वजाय = सृष्ट्यादौ हिरण्यगर्भरूपेणोत्पन्नाय, अपरजाय = पश्चात् जगदन्ते, कालाग्निरूपेणोत्पन्नाय, च नमः, मध्यमाय = मध्ये प्राणिरूपेण जाताय, अप्रगल्भाय = अचतुराय, च नमः, जघन्याय = जघनोद्भवाय, बुध्न्याय = बुध्नं वृक्षमूलं तत्र भवः तस्मै, च नमः।

अर्थ – ज्येष्ठ तथा कनिष्ठ रुद्र को नमस्कार, पूर्व में उत्पन्न (हिरण्यगर्भरूप) तथा बाद में उत्पन्न (कालाग्निरूप) रुद्र को नमस्कार, मध्य में उत्पन्न प्राणिरूप चातुर्य रहित रुद्र को नमस्कार, जघन से उत्पन्न तथा वृक्षमूल से उत्पन्न रुद्र को नमस्कार।

नम॑: सोभ्या॑य च प्रतिस॒र्या॑य च॒ नमो॒ याम्म्या॑य च॒ क्षेम्म्या॑य च॒ नम॑: श्लोक्क्या॑य चावसा॒न्या॑य च॒ नम॑ऽउर्व॒र्या॑य च॒ खल्ल्या॑य च॒। नमो॒ वन्न्या॑य॥३३॥

व्याख्या – सोभ्याय = सोभं गन्धर्वनगरम्, तत्र भवाय = गन्धर्वनगराधिष्ठातृणे, प्रतिसर्याय = प्रतिसरणकर्त्रे, च नमः, याम्याय = पापीः नरकोचितकष्टदात्रिणे, यमरूपाय, क्षेम्याय = क्षेमकराय, कुशलकारणे वा, च नमः, श्लोक्याय = श्लोकः पद्यं यशो वा तद्योग्याय = स्तुत्याय इति भावः, अवसान्याय = अवसाने वेदान्ते भवाय च नमः, उर्वर्याय = उर्वरा शस्याढ्या भूमिः तत्र भवः तस्मै = धान्यरूपाय, खल्याय = खलः = धान्यशोधनक्षेत्रं तत्स्वरूपाय, च नमः।

अर्थ – गंधर्वनगर के अधिष्ठाता तथा प्रतिसरणकर्ता रुद्र को नमस्कार, पापियों को दंड देने वाले तथा कल्याणकर्ता रुद्र को नमस्कार, वर्णनीय यश वाले वेदांतप्रतिपाद्य रुद्र को नमस्कार, उर्वराभूमि-स्वरूप तथा खलिहान के अधिष्ठाता रुद्र को नमस्कार।

नमो॒ वन्न्या॑य च॒ कक्क्ष्या॑य च॒ नम॑: श्रवा॑य च प्रतिश्श्रवा॑य च॒ नम॑ऽआ॒शुषे॑णाय चा॒शुर॑थाय च॒ नम॑: शूरा॑य चावभे॒दिने॑ च॒ नमो॑ बि॒ल्म्मिने॑॥३४॥

व्याख्या – वन्याय = वने भवः वन्यः तस्मै = वृक्षस्वरूपाय, कक्ष्याय = कक्षं तीरभूमिः तत्रभवः तस्मै = तृणवल्लीरूपाय, च नमः, श्रवाय = शब्दरूपाय, प्रतिश्रवाय = प्रतिशब्दरूपाय च नमः, आशुषेणाय = शीघ्रगामिनिसेनावते, आशुरथाय = शीघ्रगामि रथवते च नमः, सुराय = वीराय, अवभेदिने = समन्तात् शत्रुभेदनकारिणे, च नमः।

अर्थ – वन में उत्पन्न होने वाले वृक्षस्वरूप, तलहटियों में होने वाली लतादि-रूप रुद्र को नमस्कार, शब्द-स्वरूप तथा प्रतिशब्द-स्वरूप रुद्र को भी नमस्कार, शीघ्रगामी सेना वाले, तथा शीघ्रगामी रथवाले रुद्र को नमस्कार, वीर तथा चारों ओर शत्रुओं का भेदन करने वाले रुद्र को नमस्कार।

नमो॑ बि॒ल्मिने॑ च कव॒चिने॑ च॒ नमो॑ व॒र्म्मिणे॑ च वरू॒थिने॑ च॒ नम॑÷ श्रु॒ताय॑ च श्रुतसे॒नाय॑ च॒ नमो॑ दु॒न्दु॒भ्या॒य चाहन॒न्या॒य च॒ नमो॑ धृ॒ष्ण॒वे॑ ॥३५॥

व्याख्या – बिल्मिने – बिल्मं = शिरस्त्राणमस्यास्तीति विल्मी, तस्मै = शिरस्त्राणवते, कवचिने – अङ्गाच्छादकं परस्यूतं कार्पसगर्भं कवचपदवाच्यं तद्वते च नमः, वर्मिणे = लोहमयं शरीररक्षकं वर्म तदस्यास्तीति तस्मै, वरूथिने = रथवते च नमः, श्रुताय = ख्याताय, श्रुतसेनाय = प्रसिद्धसेनावते च नमः, दुन्दुभ्याय = दुन्दुभिनाम – वाद्यविशेषः, तत्स्वरूपाय, आहनन्याय = आहननम् – वाद्यताडकः दण्डः, तत्स्वरूपाय रुद्राय च नमः।

अर्थ – शिरस्त्राणधारी तथा कवचधारी रुद्र को नमस्कार, वर्मधारी तथा रथवाले रुद्र को नमस्कार, प्रख्यात तथा प्रसिद्ध सेना वाले रुद्र को नमस्कार, दुंदुभिनामक वाद्य स्वरूप तथा उसे बजाने वाले दंडस्वरूप रुद्र को नमस्कार।

नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च ॥३६॥

व्याख्या – धृष्णवे = प्रगल्भाय, प्रमृशाय = पण्डिताय च रुद्राय नमः, निषङ्गिणे = करवालवते, इषुधिमते = तूणीरयुताय, च नमः, तीक्ष्णेषवे = तीव्रबाणवते, आयुधिने = अस्त्रधारिणे, च नमः, स्वायुधाय = शोभनास्त्रवते, सुधन्वने = शोभनशरासनवते च नमः।

अर्थ – चतुर तथा पंडित रुद्र को नमस्कार, तलवारधारी तथा तूणीरधारी रुद्र को नमस्कार, तेज बाण वाले तथा भस्मधारी रुद्र को नमस्कार, सुंदरअस्त्रवाले तथा सुंदर धनुषधारी रुद्र को नमस्कार।

नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः कुल्याय च सरस्याय च नमो नादेयाय च वैशन्ताय च नमः कूप्याय ॥३७॥

व्याख्या – स्रुत्याय = स्रुतिः जलप्रवाहः तत्र भवः, तस्मै = जलप्रवाहोद्भवाय, पथ्याय – पथि भवः पथ्यः तस्मै = मार्गभवाय, च नमः, काट्याय = विषममार्गनिवासिने, नीप्याय – नीचैः गच्छन्ति आपः यत्र सः नीपः निम्नगो भूमिप्रदेशः तत्र भवः तस्मै च नमः, कुल्याय – कुल्या = छुद्रनदी, तत्र भवः कुल्यः तस्मै = छुद्रनदीभवाय, सरस्याय = सरसि भवः सरस्यः तस्मै = सरोभवाय च नमः, नादेयाय – नद्यां भवः नादेयः तस्मै = नदीसम्भवाय, वैशन्ताय = वैशन्तः = अल्पसरः तत्र भवः तस्मै अल्पसरसम्भूताय च नमः।

अर्थ – जलप्रवाह से उत्पन्न होने वाले तथा मार्ग में उत्पन्न होने वाले रुद्र को नमस्कार, विषम मार्ग में संभूत तथा निम्न भूमिप्रदेश में उत्पन्न होने वाले रुद्र को नमस्कार, छोटी नदी से उत्पन्न होने वाले तथा सरोवर से उत्पन्न होने वाले रुद्र को नमस्कार, नदी से उत्पन्न होने वाले तथा छोटे सरोवर से उत्पन्न होने वाले रुद्र को नमस्कार।

नमः॒ कूप्प्या॑य चावट्ट्या॒य च॒ नमो॒ वीध्र्या॑य चातप्प्या॒य च॒ नमो॒ मेग्घ्या॑य च विद्युत्त्या॒य च॒ नमो॒ वर्ष्ष्या॑य चावर्ष्ष्याय॑ च॒ नमो॒ वात्त्या॑य॥३८॥

व्याख्या – कूप्याय – कूपे भवः कूप्यः, तस्मै = कूपसम्भवाय, अवट्याय – अवटः = गर्तः, तत्र भवः अवट्यः, तस्मै = गर्तोद्भवाय च नमः, वीध्र्याय = विगतं इध्रः दीप्तिः यस्मात् सः वीध्री, वर्षाकालः, तत्र भवाय = वर्षर्तुसम्भवाय, आतप्याय =

आतपे भवः आतप्यः तस्मै = ग्रीष्मर्तुसम्भवाय, च नमः, मेघ्याय = मेघे भवः मेघ्यः तस्मै = मेघोद्भाव, विद्युत्याय – विद्युति भवः विद्युत्यः, तस्मै = विद्युत्सम्भवाय, च नमः, वर्ष्याय = वर्षासु भवः वर्ष्यः, तस्मै = वर्षासूत्पन्नाय, अवर्ष्याय = वर्षाषु अनुत्पन्नाय च नमः।

अर्थ – कूप से उत्पन्न रुद्र को नमस्कार, गर्त (गड्ढे) से उत्पन्न रुद्र को नमस्कार, वर्षा ऋतु से उत्पन्न रुद्र को नमस्कार, धूप (ग्रीष्म) में उत्पन्न रुद्र को नमस्कार, मेघों से उत्पन्न रुद्र को तथा वर्षारहितकाल में उत्पन्न रुद्र को नमस्कार।

नमो वात्त्याय च रेष्म्म्याय च नमो वास्तव्याय च वास्तुपाय च नमः सोमाय च रुद्राय च नमस्ताम्म्राय चारुणाय च नमः शङ्गवे ॥३९॥

व्या. – वात्याय = वाते भवः वात्यः, तस्मै = वातोद्भवाय, रेष्म्याय = प्रलयकालोद्भवाय, च नमः, वास्तव्याय – वास्तु गृहं तत्र भवः वास्तव्यः, तस्मै = गृहभवाय, वास्तुपाय = गृहपालकाय, च नमः, सोमाय = उषासहिताय, रुद्राय = दुःखनाशकाय च नमः, ताम्राय = ताम्रवर्णाय, अरुणाय = रक्तवर्णाय, च रुद्राय नमः।

अर्थ – वायु से उत्पन्न रुद्र तथा प्रलयकाल में उत्पन्न रुद्र को नमस्कार, घर में उत्पन्न तथा घर की रक्षा करने वाले रुद्र को नमस्कार, उमा सहित रुद्र को नमस्कार, ताम्रवर्ण के तथा रक्तवर्ण के रुद्र को नमस्कार।

नमः॑ शङ्ग॒वे॑ च पशु॒पत॑ये च॒ नम॑ऽउ॒ग्राय॑ च भी॒माय॑ च॒ नमो॑ऽग्रेव॒धाय॑ च दूरेव॒धाय॑ च॒ नमो॑ ह॒न्त्रे च॒ हनी॑यसे च॒ नमो॑ वृ॒क्षेभ्यो॒ हरि॑केशेभ्यो॒ नम॑स्ता॒राय॑ ॥४०॥

व्याख्या – शङ्गवे = शं कल्याणं गमयति ददाति इति शम्भुः, गौः वेदवाणी वा स यस्यास्ति तस्मै = सुखदगोवते, सुखदवाग्वते वा, पशुपतये = पशुपालकाय च नमः, उग्राय = क्रोधिने, भीमाय = भयङ्कराय, च नमः, अग्रे वधाय = अग्रे स्थित्वा हन्ति इति अग्रे वधः, तस्मै, दूरे वधः = दूरे स्थित्वा हन्ति इति दूरे वधः, तस्मै च नमः, हन्त्रे = हननकर्मकाराय, हनीयसे = अतिमारणशीलाय, च नमः, हरिकेशेभ्यः = हरितपर्णरूपकेशवद्भ्यः, वृक्षेभ्यः = तरुरूपेभ्यः, ताराय = संसारतारकाय च नमः।

अर्थ – कल्याणकारी वाणी या गौ वाले तथा पशुओं के स्वामी रुद्र को नमस्कार, क्रोधी तथा भयंकर रुद्र को नमस्कार, युद्ध में आगे रहकर शत्रु का वध करनेवाले रुद्र को नमस्कार, तथा युद्ध से दूर स्थित होकर शत्रु का वध करनेवाले रुद्र को नमस्कार, मारनेवाले तथा अतिशय मारनेवाले रुद्र को नमस्कार, हरे पत्तेरूप केश वाले वृक्षस्वरूप तथा भवसागर पार करानेवाले रुद्र को नमस्कार।

नमः॑ शम्भ॒वाय॑ च मयोभ॒वाय॑ च॒ नमः॑ शङ्क॒राय॑ च मयस्क॒राय॑ च॒ नमः॑ शि॒वाय॑

च शिवतराय च ॥४१॥

व्याख्या – शम्भवाय = शं सुखं भवति यस्मात् असौ शंभवः तस्मै = सुखोत्पादकाय = सुखस्वरूपाय च नमः, शङ्कराय = कल्याणकराय, मयस्कराय – मयः = मोक्षानन्दः, तत्कराय = मोक्षानन्ददातृणे च नमः, शिवाय = मङ्गलस्वरूपाय, शिवतराय = अतिमङ्गलकराय च नमः।

अर्थ – सुख को उत्पन्न करने वाले तथा सुखस्वरूप रुद्र को नमस्कार, कल्याणकारी तथा मोक्षानंद देने वाले रुद्र को नमस्कार, मंगल रूप वाले तथा अतिशयमंगल करने वाले रुद्र को नमस्कार।

नमः पार्य्याय चावार्य्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्त्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च नमः सिकत्याय॥४२॥

व्याख्या – पार्याय – पारे भवः पार्यः, तस्मै = जगतः पारे जीवन्मुक्तरूपेण जाताय, अवार्याय – संसारे जीवरूपेण जाताय च नमः, प्रहरणाय = प्रकर्षेण मन्त्रादिना तरणहेतुः नौकादिर्वा तत्र भवः तस्मै, उत्तरणाय = उत्कृष्टेन तत्त्वज्ञानेन संसारतरणहेतु वीरादिर्वा तत्र भवः तस्मै च नमः, तीर्थ्याय = तीर्थे भवः तीर्थ्यः तस्मै = पुण्यस्थानजाताय, कूल्याय = कूले भवः कूल्यः, तस्मै = तीरजाताय च नमः, शष्प्याय = शष्पे भवः शष्प्यः, तस्मै = तृणजाताय, फेन्याय = फेने भवः फेन्यः, तस्मै = फेनजाताय च नमः।

अर्थ—जगत से परे जीवन्मुक्त-रूप में विद्यमान तथा संसार में जीवरूप में विद्यमान रुद्र को नमस्कार, संसार को पार कराने वाले तथा तत्त्वरूप से विद्यमान रुद्र को नमस्कार, तीर्थ में संजात तथा किनारे पर उत्पन्न रुद्र को नमस्कार, घास में संभूत तथा फेन में उत्पन्न होने वाले रुद्र को नमस्कार।

नमः सिकत्त्याय च प्रवाह्याय च नमः किꣳशिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च नमऽइरिण्याय च प्रपथ्याय च नमो व्रज्याय ॥४३॥

व्याख्या—**सिकत्याय=सिकतासु बालुकासु भवः सिकत्यः, तस्मै, प्रवाह्याय—प्रवाहेषु=स्रोतस्सु भवः प्रवाह्यः, तस्मै, च नमः, किंशिलाय—कुत्सिताः शिलाः किंशिलाः, तत्र भवः तस्मै=कुत्सितशिलाजन्मने, क्षयणाय=जलरूपाय च नमः, कपर्दिने=जटाजूटवते, पुलस्तये—पुरः=अग्रे तिष्ठति यः सः पुलस्तिः तस्मै च नमः, इरिण्याय=तृणरहितभूम्यां स्थिताय, प्रपथ्याय=प्रकृष्टमार्गभवाय च नमः।**

अर्थ—बालुकामय प्रदेश में उत्पन्न तथा जलप्रवाह में उद्भूत रुद्र को नमस्कार, कुत्सित शिलाजात तथा क्षयशील जलरूप रुद्र को नमस्कार, जटाधारी तथा आगे स्थित रुद्र को नमस्कार, ऊषर भूमिजात तथा अच्छे मार्ग में समुद्भूत रुद्र को नमस्कार।

नमो॒ व्रज्ज्या॑य च॒ गोष्ठ्या॑य च॒ नम॒स्तल्प्या॑य च॒ गेह्या॑य च॒ नमो॑ हृद॒य्या॒य च निवे॒ष्प्या॒य च॒ नम॒ꣳ काट्या॑य च॒ गह्वरे॒ष्ठाय॑ च॒ नम॒ꣳ शुष्क्या॑य ॥४४॥

व्याख्या – **व्रज्याय – व्रजे = गोवृन्दे भवः व्रज्यः, तस्मै, गोष्ठ्याय – गोष्ठे = गोनिवासस्थले भवः तस्मै, च नमः, तल्प्याय – तल्पे = शय्यायां भवः तल्प्यः, तस्मै, गेह्याय – गेहे = गृहे भवः गेह्यः तस्मै, च नमः, हृदय्याय – हृदये = अन्तःकरणे भवः हृदय्यः, तस्मै, निवेष्प्याय – निवेषम् = आवर्तः, तत्र भवः निवेष्यः तस्मै च नमः, काट्याय – काटे = दुर्गमवने भवः काट्यः, तस्मै, गह्वरेष्ठाय – गह्वरम् = गिरिगुहादिकम्, तत्र तिष्ठतीति गह्वरेष्ठः, तस्मै च नमः।**

अर्थ – गायों के समूह में तथा गायों के निवास-स्थान में रहनेवाले रुद्र को नमस्कार, शय्या तथा गृह में उत्पन्न रुद्र को नमस्कार, हृदय में विद्यमान तथा जलावर्त में विद्यमान रुद्र को नमस्कार, दुर्गमवन तथा पर्वतों की गुफाओं में स्थित रुद्र को नमस्कार।

नम॒ꣳ शुष्क्या॑य च हरि॒त्त्या॒य च॒ नमः॑ पाꣳस॒व्या॒य च रज॒स्या॒य च॒ नमो॒ लोप्प्या॑य चोल॒प्प्या॒य च॒ नम॒ऽऊर्व्या॑य च॒ सूर्व्या॑य च॒ नमः॑ प॒र्ण्णाय॑ ॥४५॥

व्याख्या – **शुष्क्याय – शुष्के = नीरसकाष्ठे भवः शुष्क्यः, तस्मै, हरित्याय – हरिते = सरसकाष्ठे भवः हरित्यः तस्मै च नमः, पांस-**

व्याय – पांसुसु = धूलिषु भवः पांसव्यः तस्मै, रजस्याय – रजस्सु = परागकणेषु भवः रजस्यः तस्मै च नमः, लोप्याय – लोपे = अदर्शने भवः लोप्यः, तस्मै, उलप्याय – उलपाः = तृणविशेषाः तत्र भवः तस्मै, च मः, ऊर्व्याय – उर्व्यां = पृथिव्यां भवः ऊर्व्यः तस्मै, सूर्व्याय – सूर्व्यः = कल्पवायुः तत्स्वरूपाय च नमः।

अर्थ – सूखे काष्ठ में तथा हरे काष्ठ मे विराजमान रुद्र को नमस्कार, धूलियों में तथा परागकणो में संभूत रुद्र को नमस्कार, अदृष्ट स्थ्लों मे तथा तृणविशेषों में संजात रुद्र को नमस्कार, भूमि में उत्पन्न तथा कल्पांतवायुरूप में विराजमान रुद्र को नमस्कार।

नमः॑ पुर्ण्णाय॑ च पर्ण्णशुदाय॑ च नमः॑ऽउद्गुरमा॑णाय चाभिघ्नते च नमः॑ऽआखिदते च॑ प्रखिदते च नमः॑ऽ इषुकृद्भ्यो॑ धनुष्कृद्भ्य॑श्च वो नमो नमो॑ वः किरि-केभ्यो॑ देवानाꣳ हृद॑येभ्यो नमो॑ विचिन्वत्केभ्यो नमो॑ विक्षिणत्केभ्यो नमः॑ऽआनिर्हतेभ्य॑ः ॥४६॥

व्या. – पर्णाय = पत्ररूपाय, पर्णशदाय = पर्णपातकत्रे च नमः, उद्गुरमाणाय = उद्यमशीलाय, अभिघ्नते = अभिहननशीलाय, च नमः, आखिदते = अभक्तदैत्यखेदसम्पादकाय, प्रखिदते = प्रकर्षेण पापिखेदजनकाय च नमः, इषुकृद्भ्यः – इषुम् = बाणं करोतीति इषुकृत्, तेभ्यः = बाणनिर्माणकर्तृभ्यः, धनुष्कृद्भ्यः = धनुर्निर्माप-केभ्यः च वः नमः। वः = युष्मभ्यम्, नमः केभ्यः? किरिकेभ्यः – कुर्वन्ति पालयन्तीदं जगद् ये ते किरिकाः, तेभ्यः = वाय्वग्निसूर्य-

रूपेभ्यः, देवानां हृदयेभ्यः = इन्द्रादीनां हृदयभूतेभ्यः, नमः, विचिन्वत्केभ्यः – विचिन्वन्ति = पृथक्कुर्वन्ति पापपुण्यकारिजीवान् ये तेभ्यः नमः, विक्षिणत्केभ्यः – पापनाशकेभ्यः, आनिर्हतेभ्यः = सर्गादौ आसन्ताद् निर्गतेभ्यः रुद्रेभ्यः नमः।

अर्थ – पत्ररूप तथा पत्रों का शातन करने वाले रुद्र को नमस्कार, उद्यमशील तथा चारों तरफ से शत्रुओं को मारने वाले रुद्र को नमस्कार, शत्रुओं को दुःखी करने वाले तथा पापियों को कष्ट देने वाले रुद्र को नमस्कार, बाण बनाने वाले तथा धनुष बनाने वाले रुद्रों को नमस्कार। इस संसार के रक्षक इंद्रादि रूप रुद्रों को नमस्कार, देवों वे हृदयभूत रुद्रों को नमस्कार, पापियों और पुण्यात्माओं का विवेक करने वाले रुद्रों को नमस्कार, पापियों का नाश करने वाले रुद्रों को नमस्कार, स्वर्गादि लोकों से बाहर गये रुद्रों को नमस्कार।

द्रापेऽअन्धंसस्प्पते दरिंद्र नीलंलोहित।
आसाम्प्रजानांमेषाम्पंशूनाम्मा भेर्म्मा
रोङ्कमो चं नः किञ्चनामंमत्॥४७॥

व्याख्या – द्रापे – द्रापयति कुत्सयति पापकारीरिति द्रापि, तत्सम्बुद्धौ द्रापे! अन्धसस्पते – अन्धसः = अन्नस्य पतिः तत्संबुद्धौ, दरिद्र = परिग्रहरहित, नीललोहित – नीलः कण्ठे अन्यत्र लोहितश्च यः सः तत्संबुद्धौ। नः = अस्माकम्, आसाम् प्रजानाम् = अमीषां पुत्रादिप्रजानाम्, एषां पशूनाम् = एषा गो-अश्वादीनाम् मा भेः = भयं मा कुरु, मा रोक् = भङ्गं मा कार्षीः, किञ्चन = अपि च मा, आममत् = आमरोगः, तद्युक्तं मा कुरु।

अर्थ – पापियों को कष्ट देने वाले, अन्नों के स्वामी, नीले कंठ और रक्तशरीर वाले परिग्रहरहित हे रुद्र! हमारे इन प्रजारूप पुत्रादिकों को, इन गौ आदि पशुओं को भयभीत मत करो, इनका नाश मत करो तथा इनको रोगी मत बनाओ।

इमा रुद्राय तवसे कपर्द्दिने क्षयद्वीराय प्रभरामहे मतीः। यथा शमसद्द्विपदे चतुष्प्पदे विश्श्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम्॥४८॥

व्याख्या – **यथा = यत्कृते सति मम, द्विपदे = द्विपादवत्सु पुत्रादिषु, चतुष्पदे = चतुष्पादवत्सु गवादिषु, शम् = कल्याणं भवतु, अस्मिन् ग्रामे = अस्माकं निवासस्थले, विश्वम् = सम्पूर्ण प्राणिजातम्, पुष्टम् = स्वस्थं समृद्धम्, अनातुरम् = आतुरता व्यग्रतारहितम्, असत् = जायेत्, तथैव वयम्, इमाः = एताः, मत्संबन्धिनः, मतीः = प्रज्ञाः, तवसे = महत्त्ववते, कपर्दिने = जटावते, क्षयद्वीराय = वीरशत्रुनाशकाय, रुद्राय = रुद्रदेवताय, प्रभरामहे = समर्पयामः।**

अर्थ – जिस कृत्य को करने से मेरे पुत्र-पौत्रादियों, गो-अश्वादियों का कल्याण हो तथा इस हमारे गाँव में संपूर्ण प्राणिसमूह स्वस्थ-समृद्ध हो तथा आतुरता रहित हो तत्कृत्यस्वरूप हम अपनी बुद्धि को महान् जटाधारी शत्रुनाशक रुद्रदेव को समर्पित करते हैं।

या ते रुद्र शिवा तनूः शिवा विश्श्वाहा भेषजी। शिवा रुतस्य भेषजी तया नो मृड जीवसे॥४९॥

व्या. – रुद्र = हे दुःखनाशक शङ्कर! या = येयम्, ते = तव, शिवा = कल्याणस्वरूपा, विश्वाहा = समस्तजगतः, शिवा = मङ्गलकारिणी, भेषजी = औषधस्वरूपा, रुतस्य = रोगस्य, शिवा = शमनकारिणी, भेषजी = औषधि इव, तनूः = शरीरम् अस्ति, तथा तन्वा = तेन शरीरेण, नः = अस्मान्, जीवसे = जीवितुम्, मृड = सुखय।

अर्थ – हे दुःखनाशक शंकर! तुम्हारा यह जो कल्याणस्वरूप, समस्त जगत का कल्याणकर्ता, औषधीरूप रोग को शांत करने वाली औषधी के समान शरीर है उस शरीर के द्वारा हमारे जीवन को सुखी करो।

परि॑ नो रु॒द्रस्य॑ हे॒तिर्वृ॑णक्तु॒ परि॑ त्वे॒षस्य॑
दु॒र्म्मतिर॑घा॒योः। अव॑ स्थि॒रा म॒घव॑द्भ्य-
स्त॒नुष्व॒ मीढ्व॑स्तो॒काय॒ तन॑याय मृड॥५०॥

व्याख्या – रुद्रस्य = शिवस्य, हेतिः = अस्त्रम्, नः = अस्मान्, परिवृणक्तु = परित्यजतु, त्वेषस्य = क्रुद्धस्य, अघायोः = पापशीलस्य, दुर्मतिः = दुष्टमतिः अस्मान् परिवृणक्तु, मीढ्वः = फलदः, मघवद्भ्यः = यजमानानां भयनिवृत्तये, स्थिरा = आरोपितं धनुः, अवतनुष्व = ज्यारहितं कुरु, अपि च, तोकाय = पुत्राय, तनयाय = पौत्राय, मृड = सुखय।

अर्थ – रुद्र का अस्त्र हम लोगों का परित्याग करे। शत्रुओं के प्रति पापशील रुद्र की दुर्मति हम लोगों को छोड़ दे। हे अभिलषित पदार्थ देने वाले! यजमान के प्रति अपने धनुष को प्रत्यंचा-रहित कीजिए तथा पुत्र-पौत्रों को सुख दीजिए।

मीढुंष्टम शिवंतम शिवो नं÷ सुमनां भव।
परमे वृक्षऽआयुंधन्निधाय कृत्तिँवसांनऽ
आचंर पिनांकम्बिब्भ्रदागंहि ॥५१॥

व्याख्या – मीढुष्टम = हे फलप्रद! शिवतम = अत्यन्तकल्याणकर्तः, नः = अस्मान् प्रति, शिवः = कल्याणकर्ता, सुमनाः = शोभनमानसवान् भव, परमे = अत्यन्तदूरस्थे, वृक्षे = अश्वत्थादौ, आयुधम् = हेतिम्, विधाय = स्थाप्य, कृत्तिवसानः = गजचर्मरूपवस्त्रधारी सन्, आचार = विचरणं कुरु, पिनाकम् = पिनाकनामकं ज्यारहितं धनुः बिभ्रत् = धारयत्, आगहि = आगच्छ।

अर्थ – हे फलप्रद! सर्वविधकल्याणकर्ता रुद्र! हम लोगों के प्रति कल्याणयुक्त सुंदर मन वाले होइए। अत्यंत दूर स्थित वृक्ष पर अस्त्र को रखकर गजचर्म धारण करके विचरण कीजिए, केवल ज्या-रहित पिनाक धनुष को लेकर हमारे पास आइए।

विकिंरिद्र विलोंहित नमंस्तेऽअस्तु भगवः ।
यास्तें सहस्त्रंꣳ हेतयोन्न्यमस्म्मन्निवंपन्तु ताः ॥५२॥

व्याख्या – विकरिद्र = विविधानुपद्रवान् द्रावयति इति विकिरिद्रः, तत्सम्बोधने, विलोहित = शुद्धस्वरूपः, विगतक्रोध वा, भगवः = भगवन्, ते = तुभ्यम्, नमः अस्तु। याः, ते = तव, सहस्त्रं हेतयः = असङ्ख्यान्यायुधानि, ताः = हेतयः, अस्मत् = प्रार्थकेभ्यः, अन्यम् = भिन्नम्, निवपन्तु = निःशेषेण घ्नन्तु।

अर्थ – हे उपद्रव निवारक, रक्तवर्ण के क्रोधरहित रुद्रदेव भगवन्! आपको नमस्कार हो। जो आपके ये असंख्य शस्त्र हैं, वे हम लोगों से भिन्न हमारे शत्रुओं को मारें।

स॒हस्रा॑णि सहस्र॒शो बा॒ह्वोस्तव॑ हे॒तय॑÷।
तासा॒मीशा॑नो भगवः परा॒चीना॒ मुखा॑ कृधि॥५३॥

व्याख्या – **भगवः = हे भगवन्! तव, बाह्वोः = भुजयोः, सहस्रशः = सहस्रवारम्, सहस्राणि = सहस्रसङ्ख्यकानि लक्ष्यसङ्ख्यकानीति भावः, हेतयः = आयुधानि, सन्ति = वर्तन्ते। हे ईशानः = हेऽस्मत्पालक! त्वम्, तासाम् = हेतीनाम्, मुखाः = फलकाः, पराचीनाः = अस्मत्तः विपरीतमुखाः, कृधि = कुरु।**

अर्थ – हे परमैश्वर्यसंपन्न रुद्र! आपके हाथों में लाखों अस्त्र हैं। हे ईशान! आप उन अस्त्रों की धारा को हमलोगों के पराङ्मुख कर लें।

असं॒ङ्ख्याता स॒हस्रा॑णि॒ ये रु॒द्राऽअधि॒ भूम्म्यां॑म्।
तेषां॑ᳫ सहस्रयोज॒नेव॒ धन्वा॑नि तन्मसि॥५४॥

व्याख्या – **अधिभूम्याम् = पृथिव्या उपरि, असङ्ख्यातानि सहस्राणि = अगण्य सहस्रपरिमितानि अनन्तानीति भावः, ये रुद्राः = ये रुद्रदेवाः, सन्ति, तेषाम् = रुद्राणाम्, धन्वानि = धनूंषि, सहस्रयोजने = सहस्रयोजनपर्यन्तमार्गे, अवतन्मसि = अवतारयामः, दूरे क्षिपामः।**

अर्थ – पृथ्वी पर जो अनंत रुद्र हैं, उन रुद्रों के धनुष को हजारों योजन पर्यंत दूर मार्ग में प्रक्षिप्त कर हम निर्भय होते हैं।

अस्मिन्न्महत्त्यर्ण्णवेन्तरिक्षे भवाऽअधि।
तेषांᳬ सहस्रयोजनेव धन्न्वानि तन्न्मसि॥५५॥

व्याख्या – **अस्मिन्, महति = विशाले, अर्णवे = समुद्रे, अन्तरिक्षे च, ये भवाः = ये रुद्राः, अधि = अधिश्रिताः, सन्ति, तेषां सर्वेषां धन्वानि सहस्रयोजने अवतन्मसि।**

अर्थ – इस विशाल समुद्र और आकाश में जो रुद्र अधिष्ठित हैं, उनके धनुषों को सहस्र योजन दूर प्रक्षिप्त कर हम निर्भय होते हैं।

नीलग्ग्रीवाः शितिकण्ठा दिवᳬ रुद्राऽउपश्श्रिताः।
तेषांᳬ सहस्रयोजनेव धन्न्वानि तन्न्मसि॥५६॥

व्याख्या – **नीलग्रीवाः = श्यामग्रीवाः, अपि च, शितिकण्ठाः = श्वेतकण्ठवन्तः, रुद्राः = ये रुद्रदेवाः, दिवम् = स्वर्गम्, उपश्रिताः = अधिष्ठिताः, सन्ति, तेषां सर्वेषां धन्वानि सहस्रयोजने अवतन्मसि।**

अर्थ – नीलग्रीवा वाले और सफेद कंठवाले जो रुद्र स्वर्ग में अधिष्ठित हैं, उनके धनुषों को सहस्र योजन दूर प्रक्षिप्त कर हम निर्भय होते हैं।

नीलग्ग्रीवाः शितिकण्ठाः शर्वाऽअधः क्षमाचराः। तेषांᳬ सहस्रयोजनेव धन्न्वानि तन्न्मसि॥५७॥

व्याख्या – नीलग्रीवाः = श्यामग्रीवाः, शितिकण्ठवन्तः, च ये शर्वाः = रुद्राः, अधः = नीचैः भागैः, क्षमाचराः = पाताललोकवासिनः, सन्ति, तेषां सर्वेषां धन्वानि सहस्रयोजने अवतन्मसि।

अर्थ – नीलग्रीवा वाले तथा सफेद कंठवाले जो रुद्र नीचे पाताललोक में अधिष्ठित हैं, उनके धनुषों को सहस्र योजन दूर प्रक्षिप्त कर हम निर्भय होते हैं।

ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः।
तेषांᳬ सहस्रयोजनेव धन्वानि तन्मसि ॥५८॥

व्याख्या – ये शष्पिञ्जराः = शष्प इव पिञ्जरवर्णाः, नीलग्रीवाः = श्यामग्रीवाः, विलोहिताः = विशिष्टरक्तवर्णाः, वृक्षेषु – अश्वत्थादिपादपेषु, उपश्रिताः, सन्ति, तेषां सर्वेषां धन्वानि सहस्रयोजने अवतन्मसि।

अर्थ – जो ये घास के समान पिंजर वर्ण के नीले कंठ वाले विशिष्ट लोहितवर्ण के रुद्र वृक्षों पर अधिष्ठित हैं, उनके धनुषों को सहस्र योजन दूर प्रक्षिप्त कर हम निर्भय होते हैं।

ये भूतानामधिपतयो विशिखासः कपर्दिनः।
तेषांᳬ सहस्रयोजनेव धन्वानि तन्मसि ॥५९॥

व्याख्या – ये = रुद्राः, भूतानाम् = अमराणाम्, अधिपतयः = स्वामिनः, विशिखानः = शिखारहिताः मुण्डिताः इति भावः,

कपर्दिनः = जटाजूटवन्तश्च सन्ति, तेषां सर्वेषां धन्वानि सहस्र-योजने अवतन्मसि।

अर्थ – जो भूतों के अधिपति, शिखारहित तथा जो जटाजूट वाले रुद्र हैं, उनके धनुषों को सहस्र योजन दूर प्रक्षिप्त कर हम निर्भय होते हैं।

ये पथाम्पथिरक्षयऽऐलबृदाऽआयुर्युधः।
तेषाᳬ सहस्रयोजनेव धन्वानि तन्मसि ॥६०॥

व्याख्या – **ये = ये रुद्रदेवाः, पथाम् = मार्गे, परिरक्षकाः = पथिक-पालकाः, ऐलबृतः = इलानाम् अन्नानाम् समूहम् ऐलम् तं बिभ्रति ये ते = अन्नराशिपालकाः, आयुर्युधः = आयुपर्यन्तं युद्धकर्तारः सन्ति, तेषां सर्वेषां धन्वानि सहस्रयोजने अवतन्मसि।**

अर्थ – जो रुद्रदेव मार्ग में पथिकों के रक्षक हैं, अन्नों के समूह के रक्षक हैं तथा आयुपर्यंत युद्ध करने में सक्षम हैं, उनके धनुषों को सहस्र योजन दूर प्रक्षिप्त कर हम निर्भय होते हैं।

ये तीर्त्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः।
तेषाᳬ सहस्रयोजनेव धन्वानि तन्मसि ॥६१॥

व्या. – **ये = रुद्रदेवाः, सृकाहस्ताः = सृकानामकवज्रायुधपाणयः, निषङ्गिणः = खड्गधारिणः, तीर्थानि = पुण्यस्थानानि, चरन्ति = विचरन्ति, सन्ति, तेषां सर्वेषां धन्वानि सहस्रयोजने अवतन्मसि।**

अर्थ – जो रुद्र सृक-नामक अस्त्र हाथ में लेकर तथा तलवार धारण करके तीर्थों में विचरण करते हैं, उनके धनुषों को सहस्र योजन दूर प्रक्षिप्त कर हम निर्भय होते हैं।

येन्नेषु विविद्ध्यन्ति पात्रेषु पिबंतो जनांन्।
तेषांᳬ सहस्रयोजनेव धन्वांनि तन्मसि ॥६२॥

व्याख्या – **ये = रुद्रदेवाः, अन्नेषु = भोज्यपदार्थेषु, जनान् = पापिप्राणीः, विविध्यन्ति = विशेषेण ताडयन्ति, अन्नं विकृतं कृत्वा रोगानुत्पादयनित तथा, पात्रेषु = भाण्डेषु, पिबतः = क्षीरादिपानं कुर्वतः, जनान् = जन्तून्, विविध्यन्ति = विशेषेण वेधयन्ति शूलमुत्पादयन्ति, तेषां सर्वेषां धन्वानि सहस्रयोजने अवतन्मसि।**

अर्थ – जो रुद्र पापियों को अन्नों में विकृति उत्पन्न करके रुग्ण करके ताडित करते हैं तथा पात्रों में दुग्धादि पदार्थों को पीने वालों को ताडित करते हैं, उनके धनुषों को सहस्र योजन दूर प्रक्षिप्त कर हम निर्भय होते हैं।

यऽएतावंन्तश्च्च भूयांᳬसश्च्च दिशों रुद्रा वितंस्थिरे।
तेषांᳬ सहस्रयोजनेव धन्वांनि तन्मसि ॥६३॥

व्याख्या – **अपि च, ये रुद्राः, एतावन्तः = पूर्वमन्त्रेषु वर्णिताः ते ये च भूयांस अनन्ताः, दिशः = दशदिक्षु, वितस्थिरे = व्याप्य स्थिताः सन्ति, तेषां सर्वेषां धन्वानि सहस्रयोजने अवतन्मसि।**

अर्थ – पूर्वमंत्रों में वर्णित हैं जितने उतने तथा इनके अतिरिक्त भी जो बहुत से रुद्र दशों दिशाओं में व्याप्त होकर स्थिर हैं, उनके धनुषों को सहस्र योजन दूर प्रक्षिप्त कर हम निर्भय होते हैं।

नमोऽस्तु रुद्रेभ्यो ये दिवि येषाँवर्षमिषवः ।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमोऽअस्तु
ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च
नो द्वेष्टि तमेषाञ्जम्भे दध्मः ॥६४॥

व्याख्या – ये = रुद्राः, दिवि = द्युलोके, अधिष्ठिताः सन्ति, येषाम् = येषाञ्च रुद्राणाम्, वर्षम् = वृष्टिरेव, इषवः = बाणाः, आयुधानि वा सन्ति, तेभ्यः = रुद्रेभ्यः, नमः = नमस्कारोऽस्तु। तेभ्यः = रुद्रेभ्यः, दशप्राचीः = प्राच्यां दिशि दशाङ्गुल्यात्मकम् अञ्जलिं बद्ध्वा नमः, अस्तु, दशदक्षिणाः = दक्षिणदिशि अपि तथैव दशाङ्गुल्यात्मकमञ्जलिं बद्ध्वा नमः, दशप्रतीचीः = पश्चिमायां दिशि अपि तथैव नमः, दशोदीचीः = उत्तरस्यां दिशि अपि तथैव नमः, दशोर्ध्वाः = ऊर्ध्वदिशि अपि तथैव नमस्कुर्मः। ते = रुद्राः, नः = अस्मान्, अवन्तु = रक्षन्तु, ते नः, मृडयन्तु = सुखयन्तु, ते = रुद्राः, यम् = पुरुषमित्यर्थः, द्विष्मः = द्वेषं कुर्वन्ति, यश्च पुरुषः, नः = अस्मान्, द्वेष्टि = द्वेषं करोति, तम् = पुरुषम् इत्यर्थः, एषाम् = पूर्ववर्णितानाम् रुद्राणाम्, जम्भे = विशाल-दंष्ट्रावते मुखे, दध्मः = स्थापयामः।

अर्थ – जो रुद्र दिवलोक में स्थित हैं और वर्षा ही जिनके बाण हैं, उन रुद्रों को नमस्कार। उन रुद्रों को दस अंगुलियुक्त अंजलि बाँध कर पूर्व में नमस्कार, दस अंगुलि बाँधकर दक्षिण में नमस्कार, दस

अंगुलि बाँधकर पश्चिम में नमस्कार, दस अंगुलि बाँधकर उत्तरदिशा में नमस्कार तथा दस अंगुलि बाँधकर ऊपर की ओर नमस्कार हो। वह रुद्र हमारी रक्षा करें, वे हमें आनंद दें। वे रुद्र जिससे द्वेष करते हैं और जो हम से द्वेष करते हैं, से हम उन रुद्रों के दाँतों वाले भयंकर मुख में रखते हैं।

नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवः। तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः। तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥६५॥

व्याख्या – तेभ्यः रुद्रेभ्यः नमोऽस्तु, ये अन्तरिक्षे = आकाशे अधिष्ठिताः, सन्ति, येषाञ्च, वातः = वायुरेव, इषवः = बाणाः सन्ति। अर्थात् ये वातेन रोगमुत्पाद्य जनान् घ्नन्ति, इषुत्वेन च वातमेवोपयुञ्जन्ते इति भावः। तेभ्यः = रुद्रेभ्यः, दशप्राचीः = प्राच्यां दिशि दशाङ्गुल्यात्मकम् अञ्जलिं बद्ध्वा नमः, अस्तु, दशदक्षिणाः = दक्षिणदिशि अपि तथैव दशाङ्गुल्यात्मकमञ्जलिं बद्ध्वा नमः, दशप्रतीचीः = पश्चिमायां दिशि अपि तथैव नमः, दशोदीचीः = उत्तरस्यां दिशि अपि तथैव नमः, दशोर्ध्वाः = ऊर्ध्वदिशि अपि तथैव नमस्कुर्मः। ते = रुद्राः, नः = अस्मान्, अवन्तु = रक्षन्तु, ते नः, मृडयन्तु = सुखयन्तु, ते = रुद्राः, यम् = पुरुषमित्यर्थः, द्विष्मः = द्वेषं कुर्वन्ति, यश्च पुरुषः, नः = अस्मान्, द्वेष्टि = द्वेषं करोति,

तम् = पुरुषम् इत्यर्थः, एषाम् = पूर्ववर्णितानाम् रुद्राणाम्, जम्भे = विशालदंष्ट्रावते मुखे, दध्मः = स्थापयामः।

अर्थ – उन रुद्रों को नमस्कार, जो अंतरिक्ष में अधिष्ठित हैं, तथा वायु ही जिनका बाण है। अर्थात् वायु के द्वारा ही रोगों को उत्पन्न कराकर शत्रुओं का विनाश करते हैं। बाणों की जगह वायु का उपयोग करते हैं। उन रुद्रों को दस अंगुलियुक्त अंजलि बाँधकर पूर्व में नमस्कार, दस अंगुलि बाँधकर दक्षिण में नमस्कार, दस अंगुलि बाँधकर पश्चिम में नमस्कार, दस अंगुलि बाँधकर उत्तर दिशा में नमस्कार तथा दस अंगुलि बाँधकर ऊपर की ओर नमस्कार हो। वह रुद्र हमारी रक्षा करें, वे हमें आनंद दें। वे रुद्र, जिससे द्वेष करते हैं और जो हम से द्वेष करते हैं, हम उन रुद्रों के दाँतों वाले भयंकर मुख में रखते हैं।

नमोऽस्तु रुद्रेभ्यो ये पृथिव्याँय्येषामन्नमिषवः। तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः। तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ॥६६॥

व्या. – **तेभ्यः = रुद्रेभ्यः नमः, ये रुद्राः पृथिव्याम् = भूम्यामधिष्ठिताः सन्ति, येषाञ्च, अन्नम् = भोज्यपदार्थजातमेव, इषवः = बाणाः सन्ति। अन्नं विकृतं कृत्वा जनान् रोगिण विधाय ये तान् घ्नन्ति। बाणरूपेणान्नमेवोपयुञ्जन्ते इति भावः। तेभ्यः = रुद्रेभ्यः, दश-प्राचीः = प्राच्यां दिशि दशाङ्गुल्यात्मकमञ्जलिं बद्ध्वा नमः, अस्तु,**

दशदक्षिणाः = दक्षिणदिशि अपि तथैव दशाङ्गुल्यात्मकमञ्जलिं बद्ध्वा नमः, दशप्रतीचीः = पश्चिमायां दिशि अपि तथैव नमः, दशोदीचीः = उत्तरस्यां दिशि अपि तथैव नमः, दशोर्ध्वाः = ऊर्ध्व-दिशि अपि तथैव नमस्कुर्मः। ते = रुद्राः, नः = अस्मान्, अवन्तु = रक्षन्तु, ते नः, मृडयन्तु = सुखयन्तु, ते = रुद्राः, यम् = पुरुषमित्यर्थः, द्विष्मः = द्वेषं कुर्वन्ति, यश्च पुरुषः, नः = अस्मान्, द्वेष्टि = द्वेषं करोति, तम् = पुरुषम् इत्यर्थः, एषाम् = पूर्ववर्णितानाम् रुद्राणाम्, जम्भे = विशालदंष्ट्रावते मुखे, दध्मः = स्थापयामः।

अर्थ – उन रुद्रों को नमस्कार हो, जो पृथिवी पर अधिष्ठित हैं और अन्न ही जिनके बाण हैं। अर्थात् अन्न को विकृत करके जो शत्रुओं को रोगी बनाकर उनका विनाश करते हैं। बाण के रूप में अन्न का ही उपयोग करते हैं। उन रुद्रों को दस अंगुलियुक्त अंजलि बाँधकर पूर्व में नमस्कार, दस अंगुलि बाँधकर दक्षिण में नमस्कार, दस अंगुलि बाँधकर पश्चिम में नमस्कार, दस अंगुलि बाँधकर उत्तरदिशा में नमस्कार तथा दस अंगुलि बाँधकर ऊपर की ओर नमस्कार हो। वह रुद्र हमारी रक्षा करें, वे हमें आनंद दें। वे रुद्र, जिससे द्वेष करते हैं और जो हम से द्वेष करते हैं, से हम उन रुद्रों के दाँतों वाले भयंकर मुख में रखते हैं।

(इति पञ्चमोऽध्यायः)

॥ अथ षष्ठोऽध्यायः ॥

॥ हरिः ॐ ॥

व्ययᳯ सोम व्व्रते तव मनस्तनूषु बिब्भ्रतᳯ। प्प्रजावन्तᳯ सचेमहि ॥१॥

व्याख्या – सोम = हे सोमाख्य देव, वयम् = गानकर्तारः, व्रते = तवोपासनालग्नाः, तनूषु = तव शरीरेषु त्वच्छरीरभूतासु जाग्रत्-स्वप्नसुषुप्त्याद्यवस्थासु वा, मनः = चिन्त्यम्, बिभ्रतः = धारयन्तः, प्रजावन्तः = पुत्रपौत्रादिसन्ततिवन्तः, सन्तः, सचेमहि = सुखमनुभवाम, सङ्गच्छेमहि।

अर्थ – हे सोमदेव! आपके यशोगाता हम लोग आपकी उपासना में संलग्न रहकर आपके जाग्रत-स्वप्न-सुषुप्ति आदि अवस्था-स्वरूप शरीरों में मन लगाते हुए पुत्र-पौत्रादि संततिवान् होकर सुख भोगें और साथ चलें।

एष ते रुद्र भागः सह स्वस्राम्बिकया तञ्जुषस्व स्वाहैष ते रुद्र भागऽआखुस्ते पशुः ॥२॥

व्याख्या – रुद्र = हे रुद्रदेव, एषः = अयमस्माभिः दीयमानः पुरोडाशात्मकः, ते = तव, स्वस्रा = भगिन्या, अम्बिकया = अम्बिकानाम्न्या "अम्बिका ह वै नामास्य स्वसा" इति श्रुतेः,

सह भागः = आदातुं योग्यः हव्यांशः अस्ति, तम् = पुरोडाशात्मकम् भागम्, जुषस्व = स्वीकृत्य सेवस्व। अन्यच्चावशिष्टः पुरोडाशात्मकः, ते = तव, भागः = अंश, ते = तव, पशुः = पाल्यः = आखु = मूसकः स्वीकरोतु।

अर्थ – हे रुद्र ! हमारे द्वारा दिये जाते हुए इस पुरोडाश में से अपने भाग को तुम अपनी बहिन अंबिका के साथ ग्रहण करो और बचा हुआ यह अन्य भाग आपका पाल्य पशु चूहा ग्रहण करे।

**अव॑ रु॒द्रम॑दीमह्य्व॑ दे॒वन्त्र्यं॑म्बकम्।
यथा॑ नो॒ वस्यं॑सु॒स्कर॒द्यथा॑ न॒ः श्रेयं॑स॒-
स्कर॒द्यथा॑ नो व्यवसा॒यया॑त् ॥३॥**

व्याख्या – **रुद्रम् अव = रुद्रदेवं सम्यगवत्य सम्भोज्य च, अदीमहि = वयं भक्षयेम, त्र्यम्बकम् अव = त्रिनेत्रवन्तं सम्यग्ज्ञात्वा परितोष्य च, अदीमहि = आदयामः – भोजयामः भवेम, यथा = पूर्वोक्ते कृते सति, नः = अस्मान्, वस्यसः = वस्त्रवन्तः, करत् = रुद्रः कुर्यात्, यथा च, नः = अस्मान्, श्रेयसः = कल्नयाणवन्तः, करत् = कुर्यात्, यथा च नः, व्यवसाययात् = कार्येषु निश्चीयात्।**

अर्थ – रुद्र भगवान को अच्छी तरह जानकर हम लोग भोजन करें, एवं त्र्यंबक देव को भी अच्छी तरह जानकर हम भोजन करें, जिससे कि वह हम लोगों को वस्त्रवान्, कल्याणयुक्त तथा सत्कर्मवान् बनाएँ।

भेषजमसि भेषजङ्गवेऽश्वाय पुरुषाय भेषजम्।
सुखम्मेषाय मेष्यै ॥४॥

व्याख्या – हे रुद्र! त्वम्, भेषजमसि = औषधमसि, यथौषधं सर्वरोगनिवारकं भवति तथैव त्वमपि सर्वोपद्रवनिवारकोऽसि। अतः मामकीनेभ्यः, गवे = धेन्वे, अश्वाय = तुरगाय, पुरुषाय = आश्रितजनेभ्य इति भावः, भेषजम् = निखिलरोगनिवारकमौषधं देहि, मेषाय मेष्यै च, सुखम् = आनन्दम् देहि।

अर्थ – हे रुद्र! आप औषधि-स्वरूप हैं अतः हमारी गायों, अश्वों और आश्रित पुरुषों को सर्वरोगनिवारक औषधि हैं। मेरे भेड़ और भेड़ों को सुख दो।

त्र्यम्बकँय्यजामहे सुगन्धिम्पुष्टिवर्द्धनम्।
उर्व्वारुकमिव बन्धनान्मृत्त्योर्म्मुक्षीय मामृतात्।
त्र्यम्बकँय्यजामहे सुगन्धिम्पतिवेदनम्।
उर्व्वारुकमिव बन्धनादितो मुक्षीय मामुतः ॥५॥

व्याख्या – सुगन्धिम् = दिव्यगन्धवन्तम्, सुगर्वशालिनम् वा, पुष्टिवर्धनम् = धनधान्यादिसमृद्धिवर्धकम्, त्र्यम्बकम् = त्रिनेत्रम्, यजामहे = यजामः, यज्ञेन पूजयामः। यजितस्य त्र्यम्बकस्य प्रसादात् वयं मृत्योः = अकालमरणात्, मुक्षीय = मुक्तो भूयास्म। अमृतात् = स्वर्गात् अभ्युदयनिःश्रेयसादिभ्यश्च, मा मुक्षीय = मुक्तः विरहितः मा भूयास्म। इव = यथा, उर्वारुकम् = अत्यन्तपक्वं

कर्कन्ध्वादेः फलम्, बन्धनात् = स्ववृन्तात् स्वयमेव मुक्तो भवति तथैव मामपि मृत्युतः मुक्तं कुरु। अपि च विवाहप्रवृत्ताः कुमार्यः निवेदयन्ति – पतिवेदनम् – पतिम् = भर्तारम्, वेदयति = प्रापयति यः सः तम् पतिप्रापयितारम्, सुगन्धिम् = दिव्यगन्धवन्तम्, सुगर्वशालिनम् वा, त्र्यम्बकम् = त्रिनेत्रम् रुद्रं यजामहे, इतः = मातृपितृभ्रातृवर्गेभ्यः, मुक्षीय = मुक्ता भूयास्म, उतः = विवाहानन्तरम् पतिगृहतः, मा = मुक्ता मा भूयास्म।

अर्थ – दिव्यगंध वाले, सुगर्व वाले, समृद्धि बढ़ाने वाले, त्रिनेत्र रुद्र का हम यजन करते हैं। यजित त्र्यंबक रुद्र के प्रसाद से हम अकाल मृत्यु से वैसे ही मुक्त हों, जैसे पके हुए बेर आदि फल अपने डंठल से अपने आप मुक्त हो जाते हैं। तथा अमृतस्वरूप स्वर्गादि अभ्युदय-निःश्रेयसादि से रहित न हों। विवाह में प्रवृत्त कुमारी रुद्र से निवेदन करती है – पति प्राप्त कराने वाले त्रिनेत्र, दिव्यगंधयुक्त रुद्र का हम यजन करती हैं। पके फल के समान हम इस माता-पिता के घर से मुक्त हो जायें किंतु पति के घर से कभी भी मुक्त न हों।

एतत्ते रुद्रावसन्तेनं परो मूजंवतोतींहि।
अवंततधन्वा पिनांकावसुः
कृत्तिंवासाऽअहिंꣳसन्नः शिवोतींहि ॥६॥

व्याख्या – **रुद्र = हे रुद्रदेव, एतत् ते = एतत्तव, अवसम् = अवशिष्टहव्यात्मकम् पाथेयं भोज्यम्, एवं नीत्वा, मूजवतः = मूजवान्नामकपर्वतात्, परः = दूरम्, अतीहि = अतिक्रम्य गच्छ! कीदृशस्त्वम् – अवततधन्वा = अवरोपितधनुष्कः ज्यारहितं धनुः**

कृत्वेति भावः, पिनाकावसः = पिनाकाख्यं धनुः वस्त्रादिनाच्छाद्य येन प्राणिषु भयं न जायेत। एवञ्च कृत्तिवासः = गजचर्माम्बरः सन्, नः = अस्मान्, अहिंसन् = अवधन्, शिवः = कल्याणसहितो भूत्वा, अतीहि = पर्वतमतिक्रम्य गच्छ!

अर्थ – हे रुद्र! इस अवशिष्ट हवि को आप पाथेय के रूप में ग्रहण कीजिए और अपने धनुष को प्रत्यंचा-रहित करके पिनाक धनुष को वस्त्रों से आच्छादित करके प्राणियों को निर्भय करते हुए, गजचर्म का वस्त्र धारण करके हम लोगों को न मारते हुए इस मूँजवान् पर्वत से दूर चले जाइए।

त्र्यायुषञ्जमदग्नेः कश्यपस्य त्र्यायुषम्।
यद्देवेषु त्र्यायुषन्तन्नोऽअस्तु त्र्यायुषम्॥७॥

व्याख्या – हे रुद्र! जमदग्नेः = जमदग्निनामकमुनेः, यत् = यादृशम्, त्र्यायुषम् = बाल्ययौवनादित्रयाणामायुषां समाहारः अभूत् तथा, कश्यपश्य = कश्यपनामक ऋषेः यादृशम् त्र्यायुषम् अभूत् एवञ्च, देवेषु = इन्द्राद्यमरेषु यादृशं त्र्यायुषम् अभूत्, तत् = तादृशमेव त्र्यायुषम्, नः = अस्माकं यजमानानामपि, अस्तु = भूयात्। पूर्वोक्त-ऋषीणां यथोक्तावस्थासु यथा चरितमभूत् तथैवास्माकमपि भूयादिति भावः।

अर्थ – हे रुद्र! जमदग्नि ऋषि, कश्यप ऋषि एवं देवताओं की बाल्य, यौवन और वृद्धावस्थाएँ जिन चरित्रों और कर्मों से युक्त थीं वैसी ही हमारी भी तीनों अवस्थाएँ उत्तम चरित्र और कर्मवाली हों।

शिवो नामासि स्वधितिस्ते पिता
नमस्तेऽअस्तु मा मा हिᳬसीः ।
निवर्त्तयाम्म्यायुषेन्नाद्याय प्रजननाय
रायस्प्पोषाय सुप्रजास्त्वाय सुवीर्य्याय ॥८॥

व्याख्या – हे रुद्र! त्वम् शिवोनामा = शिव इति कल्याणकारीनामवान् असि, स्वधितिः = वज्रम्, ते = तव, पिता = पालकः, अस्ति, ते = तुभ्यम्, नमः = नमस्कारोऽस्तु। मा = माम्, मा, हिंसीः = मारय। त्वां वयं यजनानन्तरम् निवर्तयामः = स्वर्लोकगमनाय विसृजामः, किमर्थम् – आयुषे = जीवनाय, अन्नाद्याय = अन्नभक्षणाय, प्रजननाय = सन्तानाय, रायस्पोषाय – रायः = धनम्, तस्य पोषाय = रक्षणाय, सुप्रजास्त्वाय = शोभनसन्तत्युत्पादनाय, सुवीर्याय = शोभनबलाय च।

अर्थ – हे इंद्र! तुम "शिव" इस कल्याणकारी नाम वाले हो, वज्र तुम्हारा रक्षक है, तुमको नमस्कार, हम लोगों को मत मारो। यज्ञ की समाप्ति के बाद हम दीर्घायुष्य प्राप्ति के लिए, भक्षणीय अन्न की प्राप्ति के लिए, प्रजनन के लिए, धन-रक्षण के लिए, शोभन संतति की प्राप्ति के लिए तथा सुंदर बल की प्राप्ति के लिए तुम्हें विसर्जित करते हैं।

(इति षष्ठोऽध्यायः)

॥ अथ सप्तमोऽध्यायः ॥

॥ हरिः ॐ ॥

उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च।
सासह्वाँश्चाभियुग्वा च विक्षिपः स्वाहा ॥१॥

व्या. – उग्रः = उत्कृष्टक्रोधवान्, भीमः = भयङ्करः, ध्वान्तः – ध्वनति शब्दं करोतीति ध्वान्तः = भैरवनादकारी, धुनिः – धूनयति कम्पयति शत्रूनिति धुनिः = कम्पकः, सासह्वान् = शत्रूणामभिभवकारी, अभियुग्वा = अभियोजनकर्ता, विक्षिपः = शत्रूणाम् विक्षेपकर्ता च, स्वाहा = सुहुतमस्तु। एते सप्त मरुतः तेभ्यः स्वाहा।

अर्थ – उग्र, भयंकर, शब्दकारी, शत्रुओं को कँपानेवाले, शत्रुओं का अभिभव करनेवाले, अभियोजनकर्ता और शत्रुओं का विक्षेप करनेवाले मरुतों को स्वाहा (इन सात मरुतों को दी गयी हवि उन्हें प्राप्त हो)।

अग्निꣳ हृदयेनाशनिꣳ हृदयाग्ग्रेण पशुपतिङ्कृत्स्नहृदयेन भवँय्यक्ना। शर्वम्मतस्नाभ्यामीशानम्मन्युना महादेवमन्तःपर्शव्येनोग्ग्रन्देवँव्वनिष्ठुना वसिष्ठहनुः शिङ्गीनि कोश्श्याभ्याम् ॥२॥

व्या. – हृदयेन = हृदयनामकेनाङ्गेन, अग्निम् = अग्निदेवं प्रीणामि, हृदयाग्रेण = हृदयाग्रभागेन, अशनिम् = अशनिदेवम्, कृत्स्नहृद-

येन = सम्पूर्णहृदयेन, पशुपतिम् = पशुपतिदेवम्, यक्ना = यकृतेन, भवम् = भवनामदेवम्, मतस्नाभ्याम् – मतस्ने = हृदयास्थिविशेषौ ताभ्याम्, शर्वम् = शर्वनामकं देवम्, मन्युना = क्रोधेन, अश्व-संबन्धिना, ईशानम् = ईशानदेवम्, अन्तःपर्शव्येन = अन्तःस्थित-पार्श्ववर्त्यस्थिना, महादेवम्, वनिष्ठुना = स्थूलान्त्रेण, उग्रं देवम्, वशिष्ठहनुशिङ्गीनि = उक्तसञ्ज्ञकानि दैवतानि, कोश्याभ्याम् = हृदयकोशस्थमांसपिण्डाभ्याम् प्रीणामि।

अर्थ – हृदय के द्वारा अग्नि को, हृदयाग्र के द्वारा अशनिदेव को, संपूर्ण हृदय के द्वारा पशुपति को, यकृत के द्वारा भव को, हृदय की अस्थियों द्वारा शर्वदेव को, क्रोध के द्वारा ईशानदेव को, अंदर की बगल की हड्डियों द्वारा महादेव को, स्थूल आँतों के द्वारा अशनिदेव को और हृदयकोशस्थ मांसपिंड के क्षरा वशिष्ठ-हनु-शिंगी आदि देवों को प्रसन्न करता हूँ।

उग्रँल्लोहिंतेन मित्रꣳ सौव्रंत्येन रुद्रन्दौर्व्रंत्ये-
नेन्द्रंम्प्रक्क्रीडेनं मरुतो बलेंन साद्ध्यान्प्रमुदां।
भवस्य कण्ठ्यꣳ रुद्रस्यांन्तः पार्श्व्यम्मंहादेवस्य
यकृंच्छर्वस्यं वनिष्ठुः पंशुपतेंः पुरीतत् ॥३॥

व्याख्या – **लोहितेन = रक्तेन, उग्रम् = उग्राख्यं देवम् प्रीणामि, सौव्रत्येन = शोभनव्रतवत्कर्मणा, मित्रम् = मित्रदेवम्, दौर्व्रत्येन = दुःखकारीव्रतकर्मणा, रुद्रम् = रुद्रदेवम्, प्रक्रीडेन = प्रकृष्टक्रीडा-वताकर्मणा, इन्द्रम् = इन्द्रदेवम्, बलेन = सामर्थ्येन, मरुतः =**

मरुत्संज्ञकान् देवान्, प्रमुदा = प्रकृष्टमोदेन, साध्यान् = साध्य-संज्ञकान् देवान्, प्रीणामि। भवस्य = भवनामकरुद्रस्य, कण्ठ्यम् = कण्ठे भवं मांसमस्तु, रुद्रस्य = रुद्रदेवस्य, अन्तःपार्श्व्यं = पर्शव्योरन्तःभवं मांसमस्तु, महादेवस्यस्य = महादेवनामकरुद्रस्य, यकृतः = यकृतमांसमस्तु, शर्वस्य = शर्वाख्यरुद्रस्य, वनिष्ठुः = स्थालान्त्रमस्तु, पशुपतेः = पशुपतिदेवस्य, पुरीतत् = पुरीतन्नाडी-गतं मांसमस्तु।

अर्थ – रक्त के द्वारा उग्रदेव को, शुभव्रतादि के द्वारा मित्रदेव को, कष्टसाध्यव्रतों द्वारा रुद्र को, क्रीड़ा कर्म द्वारा इंद्र को, बल द्वारा मरुत् को प्रसन्न करता हूँ, रुद्र को पार्श्वों के मध्य का, महादेव को यकृत का, शर्व को आँतों का और पशुपति को पुरीतत नाड़ी का मांस मिले।

लोमंभ्यः स्वाहा लोमंभ्यः स्वाहा त्वचे स्वाहां त्वचे स्वाहा लोहिंताय स्वाहा लोहिंताय स्वाहा मेदोंभ्यः स्वाहा मेदोंभ्यः स्वाहां। मा॒ꣳसेभ्यः स्वाहां मा॒ꣳसेभ्यः स्वाहा स्नावंभ्यः स्वाहा स्नावंभ्यः स्वाहास्थभ्यः स्वाहास्थभ्यः स्वाहां मज्जभ्यः स्वाहां मज्जभ्यः स्वाहां। रेतंसे स्वाहां पायवे स्वाहां ॥४॥

व्याख्या – लोमभ्यः = शरीरकेशेभ्यः, स्वाहा, त्वचे = सर्वशरीर-वर्तीन्द्रियाय, स्वाहा, लोहिताय = रक्ताय, स्वाहा, मेदोभ्यः =

मेदानामकधातुविशेषेभ्यः, स्वाहा, मांसेभ्यः = पलेभ्यः स्वाहा, स्नावभ्यः = नाडीभ्यः स्वाहा, अस्थभ्यः = अस्थिभ्यः स्वाहा, मज्जभ्यः = मज्जानामकधातुविशेषेभ्यः, स्वाहा, रेतसे = वीर्याय स्वाहा, पायवे = गुदायै स्वाहा।

अर्थ – रोम के लिए स्वाहा, त्वचा के लिए स्वाहा, रक्त के लिए स्वाहा, मेदा के लिए स्वाहा, मांस के लिए स्वाहा, नाडियों के लिए स्वाहा, हड्डियों के लिए स्वाहा, मज्जा के लिए स्वाहा, वीर्य के लिए स्वाहा, गुदा के लिए स्वाहा।

आयासाय स्वाहा प्रायासाय स्वाहा
सँय्यासाय स्वाहा वियासाय स्वाहोद्या-
साय स्वाहा। शुचे स्वाहा शोचते स्वाहा
शोचमानाय स्वाहा शोकाय स्वाहा ॥५॥

व्याख्या – **आयासादयः देवविशेषाः तेभ्यः सर्वेभ्यः क्रमशः – आयासाय स्वाहा, प्रायासाय स्वाहा, संयासाय स्वाहा, वियासाय स्वाहा, उद्यासाय स्वाहा, शुचे स्वाहा, शोचते स्वाहा, शोचमानाय स्वाहा, शोकाय स्वाहा।**

अर्थ – आयास देव को स्वाहा, प्रायस को स्वाहा, संयास को स्वाहा, वियास को स्वाहा, उद्यास को स्वाहा, शुच् को स्वाहा, शोचत् को स्वाहा, शोचमान् को स्वाहा, शोक को स्वाहा (आयास आदि देवों के नाम हैं)।

तपसे स्वाहा तप्प्यते स्वाहा तप्प्यमानाय स्वाहा
तप्ताय स्वाहा धर्म्माय स्वाहा। निष्कृत्यै स्वाहा
प्प्रायश्चित्त्यै स्वाहा भेषजाय स्वाहा ॥६॥

व्याख्या – **तपसे स्वाहा, तप्यते स्वाहा, तप्यमानाय स्वाहा, तप्ताय स्वाहा, धर्माय स्वाहा, निष्कृत्यै स्वाहा, प्रायश्चित्यै स्वाहा, भेषजाय स्वाहा।**

अर्थ – तप को स्वाहा, तप्यत् को स्वाहा, तप्यमान को स्वाहा, तप्त को स्वाहा, घर्म को स्वाहा, निष्कृति को स्वाहा, प्रायश्चित्त को स्वाहा, भेषज को स्वाहा (तप आदि क्रियाओं एवं संलग्न देवताओं को स्वाहा का विधान है)।

यमाय स्वाहान्तकाय स्वाहा मृत्यवे स्वाहा।
ब्रह्मणे स्वाहा ब्रह्महत्यायै स्वाहा विश्वेभ्यो
देवेभ्यः स्वाहा द्यावापृथिवीभ्याᳬं स्वाहा ॥७॥

व्याख्या – **यमाय स्वाहा, अन्तकाय स्वाहा, मृत्यवे स्वाहा, ब्रह्मणे स्वाहा, ब्रह्महत्यायै स्वाहा, विश्वेभ्यो देवेभ्यः स्वाहा, द्यावा-पृथिव्याम् स्वाहा।**

अर्थ – यम को स्वाहा, अंतक को स्वाहा, मृत्यु को स्वाहा, ब्रह्मा को स्वाहा, ब्रह्महत्या को स्वाहा, समस्त देवताओं को स्वाहा, स्वर्ग और पृथिवी को स्वाहा।

(इति सप्तमोऽध्यायः)

॥ अथाष्टमोऽध्यायः ॥

॥ हरिः ॐ ॥

वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रवश्च मे श्रुतिश्च मे ज्योतिश्च मे स्वश्च मे यज्ञेन कल्पन्ताम् ॥१॥

व्याख्या – **मे = मह्यम्, यज्ञेन = यजनकर्मणा देवेभ्यः वक्ष्यमाण-पदार्थाः कल्पन्ताम् = प्राप्ताः भवन्तु इति भावः, के के – वाजः = अन्नम्, प्रसवः = सन्ततिः, प्रयतिः = शुद्धिः, प्रसितिः = भोग्यौत्सुक्यम्, धीतिः = ध्यानम्, क्रतुः = यज्ञः सत्यसङ्कल्पो वा, स्वरः = साधुशब्दः, श्लोकः = पद्यम् यशो वा, श्रवः = शब्दः, श्रुतिः = वेदः, ज्योतिः = प्रकाशः, स्वः = स्वर्गः च। सर्वत्र समुच्चयार्थकश्चकारः योज्यः।**

अर्थ – मुझे यज्ञ के द्वारा देवों से अन्न, संतति, शुद्धि, भोगोत्सौक्य, ध्यान, यज्ञ, सत्यसंकल्प, शुद्धशब्द, पद्य-यश, शब्द, वेद, प्रकाश और स्वर्ग मिले।

प्राणश्च मेपानश्च मे व्यानश्च मेसुश्च मे चित्तञ्च मऽ आधीतञ्च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रञ्च मे दक्षश्च मे बलञ्च मे यज्ञेन कल्पन्ताम् ॥२॥

व्याख्या – **प्राणः = ऊर्ध्वसञ्चारी हृद्देशस्थो वायुः, अपानः = अधः-सञ्चारी पायुस्थो वायुः, व्यानः = सर्वशरीरभागी वायुः, असुः = प्रवृत्तिमद्वायुः, चित्तम् = मानसम्, आधीतम् = बाह्यज्ञानम्, वाक् = वागिन्द्रियम्, मनः = स्वान्तम्, चक्षुः = दर्शनेन्द्रियम्, श्रोत्रम् = श्रवणेन्द्रियम्, दक्षः = ज्ञानेन्द्रियचातुर्यम्, बलम् = कर्मेन्द्रियचा-तुर्यम्, च एतानि, मे = मह्यम्, यज्ञेन देवैः, कल्पन्ताम् = दीयन्ताम्।**

अर्थ – प्राणवायु, अपानवायु, व्यानवायु, प्रवृत्तिमानवायु, चित्त, बाह्यज्ञान, वागिंद्रिय, मन, चक्षु इंद्रिय, श्रोत्रेंद्रिय, ज्ञानेन्द्रियों की चतुरता और बल (कर्मेंद्रियों का सामर्थ्य) ये सब पदार्थ मुझे यज्ञ द्वारा देवताओं से मिलें।

ओजश्च मे सहश्च मऽआत्मा च मे तनूश्च मे शर्म्म च मे वर्म्म च मेऽङ्गानि च मेऽस्थीनि च मे परूꣳषि च मे शरीराणि च मऽआयुश्च मे जरा च मे यज्ञेन कल्पन्ताम् ॥३॥

व्याख्या – **ओजः = बलकारकोऽष्टमो धातुः, सहः = सामर्थ्यम्, आत्मा = शरीरी, तनूः = शरीरम्, शर्म = सुखम्, वर्म = कवचम्, अङ्गानि = अवयवाः, अस्थीनि, परूंषि = अङ्गुल्यादि पर्वाणि, शरीराणि = देहाः, आयुः = जीवनम्, जरा = वार्धक्यम्, च, एते पदार्थाः, मे = मह्यम् यज्ञेन देवैः कल्पन्ताम्।**

अर्थ – बलकारक अष्टम धातु ओज, सामर्थ्य, आत्मा, शरीर, सुख, कवच, अंग, हड्डियाँ, अंगुलियों के पर्व, देह, जीवन, वृद्धावस्था आदि

पदार्थ यज्ञ द्वारा देव मुझे उपलब्ध कराएँ।

ज्यैष्ठ्यं च मऽआधिपत्त्यं च मे मन्युश्च मे भामश्च मेमश्च मेम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धं च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥४॥

व्याख्या – ज्येष्ठम् = महत्त्वम्, आधिपत्यम् = स्वामित्वम्, मन्युः = क्रोधः, भामः = बाह्यक्रोधः, अमः = अपरिमेयत्वम्, अम्भः = जलम्, जेमा = विजयः, महिमा = महत्त्वम्, वरिमा = वरिष्ठता, प्रथिमा = पृथुलता, वर्षिमा = दीर्घजीवनत्वम्, द्राधिमाविस्तृतिः, वृद्धम् = धनधान्यादीनां वृद्धिः, वृद्धिः = विद्यादिगुणानामुत्कर्षः, एते पदार्थाः मह्यं यज्ञेन कल्पन्ताम्।

अर्थ – ज्येष्ठता, स्वामित्व, तीव्रक्रोध, सरलक्रोध, विशालता, जल, विजय, महत्त्व, वरिष्ठता, पृथुलता, दीर्घजीवन, द्राधिमा, धन-धान्य की वृद्धि, गुणों का उत्कर्ष आदि पदार्थ मुझे यज्ञ द्वारा देवों से मिलें।

सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे विश्वं च मे महश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे यज्ञेन कल्पन्ताम् ॥५॥

व्या. – **सत्यम् = यथार्थ, श्रद्धा = आस्था, जगत् = जङ्गमप्राणिनः, धनम् = स्वर्णादि, विश्वम् = स्थावरजगत्, महः = तेजः, क्रीडा = खेला, मोदः = हर्षः, जातम् = सन्तत्युत्पन्नमपत्यम्, जनिष्यमाणम् = जायमानमपत्यम्, सूक्तम् = शोभनावाक्, सुकृतम् = पुण्यः, च मे यज्ञेन कल्पन्ताम्।**

अर्थ – सत्य, श्रद्धा, जंगम – गाय आदि प्राणी, धन, स्थावर – गृहादि, तेज, क्रीडा, आनंद, उत्पन्न पुत्रादि, उत्पन्न होने वाली संतति, अच्छी वाणी और पुण्य मुझे यज्ञ द्वारा देवों से मिलें।

ऋतञ्च मेमृतञ्च मेयक्ष्मञ्च मेनामयच्च मे जीवातुश्च मे दीर्घायुत्वञ्च मेनमित्रञ्च मेभयञ्च मे सुखञ्च मे शयनञ्च मे सूषाश्च मे सुदिनञ्च मे यज्ञेन कल्पन्ताम् ॥६॥

व्याख्या – **ऋतम् = यज्ञादिकर्म, अमृतम् = मृत्योरभावः, स्वर्गः, अयक्ष्मः = राजयक्ष्मादिरोगाभावः, अनामयम् = सामान्यव्याध्याद्यभावः, जीवातुः = जीवनदायकमौषधम्, दीर्घायुत्वम् = दीर्घजीवनम्, अनमित्रम् = शत्रुराहित्यम्, अभयम् = भयराहित्यम्, सुखम् = आनन्दः, शयनम् = शैय्या, सूषा = शोभनप्रातःकाल, सुदिनम् = शोभनवासरः, च मे यज्ञेन कल्पन्ताम्।**

अर्थ – यज्ञादि सत्कर्म, अमृतत्व, यक्ष्मादि रोगाभाव, उदरपीड़ा आदि सामान्य रोगाभाव, जीवन-दायिनी औषधियाँ, दीर्घायु, शत्रुओं का अभाव, सुख और सुंदर शैय्या, सुंदर ऊषःकाल और सुंदर दिन, ये सब

पदार्थ मुझे यज्ञ द्वारा देवताओं से मिलें।

य॒न्ता च॑ मे ध॒र्त्ता च॑ मे॒ क्षेम॑श्च मे॒ धृति॑श्च मे॒ विश्व॑ञ्च मे॒ मह॑श्च मे स॒ँविच्च॑ मे॒ ज्ञात्र॑ञ्च मे॒ सूश्च॑ मे प्र॒सूश्च॑ मे॒ सीर॑ञ्च मे॒ लय॑श्च मे य॒ज्ञेन॑ कल्पन्ताम् ॥७॥

व्याख्या – **यन्ता = अश्वादिनायकाः, धर्ता = धारणकर्ता, पित्रादिः, क्षेमः = कल्याणम्, धृतिः = धैर्यम्, विश्वम् = जगत्, महः = तेजः, संवित् = वेदानुकूलज्ञानम्, ज्ञानम् = ज्ञानसामर्थ्यम्, सूः = पौरुषम्, प्रसूः = पुत्रोत्पादनसामर्थ्यम्, सीरम् = भूमिकर्षणाय हलम्, लयः = गृहम्, च मे यज्ञेन कल्पन्ताम्।**

अर्थ – घोड़ा आदि संवारियाँ, अभिभावक पिता आदि, कल्याण, धैर्य, जगत्, तेज, सद्ज्ञान, ज्ञान की शक्ति, उत्पादन-सामर्थ्य, पुत्रोत्पादन-सामर्थ्य, भूमि जोतने के लिए हल और घर, ये सब पदार्थ मुझे यज्ञ द्वारा देवताओं से मिलें।

शञ्च॑ मे॒ मय॑श्च मे प्रि॒यञ्च॑ मेनुका॒मश्च॑ मे॒ काम॑श्च मे सौमन॒सश्च॑ मे॒ भग॑श्च मे॒ द्रवि॑णञ्च मे भ॒द्रञ्च॑ मे॒ श्रेय॑श्च मे॒ वसी॑यश्च मे॒ यश॑श्च मे य॒ज्ञेन॑ कल्पन्ताम् ॥८॥

व्याख्या – **शम् = ऐहिकसुखम्, मयः = पारलौकिकं सुखम्, प्रियम् = अभीष्टम्, अनुकामः = अभिलषितपदार्थः, कामः = विषयजनितसुखम्, सौमनसः = सौजन्यम्, भगः = कल्याणम्,**

द्रविणम् = धनम्, भद्रम् = शिवम्, श्रेयः = महत्कल्याणम्, वसीयः = निवसनीयम्, गृहम्, यशः = कीर्तिः, च मे यज्ञेन कल्पन्ताम्।

अर्थ – लौकिक सुख, पारलौकिक सुख, अभीष्ट पदार्थ, प्रिय पदार्थ, विषयानंद, सुजनता, कल्याण, धन, शिवता, महाकल्याण, रहने योग्य घर और कीर्ति, ये सब पदार्थ मुझे यज्ञ के देवताओं द्वारा मिलें।

ऊर्क्चं मे सूनृतां च मे पयंश्च मे रसंश्च मे घृतञ्चं मे मधुं च मे सग्धिंश्च मे सपींतिश्च मे कृषिश्चं मे वृष्टिंश्च मे जैत्रंञ्च मऽऔद्भिंद्यञ्च मे यज्ञेनं कल्प्पन्ताम् ॥९॥

व्याख्या – ऊर्क् = अन्नम्, सूनृता = सत्यवादिता, पयः = दुग्धम्, रसः = उपयोगीपदार्थः, घृतम् = आज्यम्, मधुः = क्षौद्रम्, सग्धिः = सहभोजनम्, सपीति = सहपानम्, कृषिः = धान्यादिः, वृष्टिः = जलवर्षणम्, जैत्रम् = विजयसामर्थ्यम्, औद्भिदम् = आम्रादि उद्भिज्जवनम्, च मे यज्ञेन कल्पन्ताम्।

अर्थ – अन्न, सत्यवाणी, दूध, रस, घी, शहद, बंधुओं के साथ भोजन, बंधुओं के साथ पान-गोष्ठी, कृषि, वृष्टि, जीतने का सामर्थ्य और वृक्षादि संपत्तियाँ, ये सब पदार्थ मुझे यज्ञ द्वारा देवताओं से मिलें।

रयिश्चं मे रायंश्च मे पुष्टञ्चं मे पुष्टिंश्च मे विभु चं मे प्रभु चं मे पूर्णञ्चं मे पूर्णतंरञ्च मे

कुयंवञ्च मेक्षितञ्च मेन्नञ्च मे क्षुच्च मे यज्ञेनं कल्पन्ताम् ॥१०॥

व्याख्या – रयिः = स्वर्णम्, रायः = मुक्ताभरण्यादयः, पुष्टम् = धन-पोषणम्, पुष्टिः = शरीरपोषणम्, विभुः = व्यापनसामर्थ्यम्, प्रभुः = ऐश्वर्यम्, पूर्णम् = धनपुत्रादिपूर्णता, पूर्णतरम् = अत्यन्तपूर्णता, कुयवम् = कुत्सितयवधान्यम्, अक्षितम् = क्षयहीनम्, धान्यम्, अन्नम् = तण्डुलादिः, क्षुत् = क्षुधा, च मे यज्ञेन कल्पन्ताम्।

अर्थ – सोना, मोती-मणि आदि, धन-संरक्षण, शरीर-पोषण, व्यापकता, ऐश्वर्य, पुत्रादि की पूर्णता, अतिशयपूर्णता, क्षरणशील जौ, क्षयहीन धान्य, अंत और भूख, ये सब पदार्थ मुझे यज्ञ द्वारा देवताओं से मिलें।

वित्तञ्चं मे वेद्यंञ्च मे भूतञ्चं मे भविष्यच्चं मे सुगञ्चं मे सुपत्थ्यञ्च मऽऋद्धञ्चं मऽऋद्धिश्च मे क्लृप्तञ्चं मे क्लृप्तिंश्च में मतिश्चं मे सुमतिश्चं मे यज्ञेनं कल्पन्ताम् ॥११॥

व्याख्या – वित्तम् = धनम्, वेद्यम् = प्राप्तव्यधनम्, भूतम् = पूर्वसंपन्नम्, भविष्यत् = भविष्ये सम्पद्यमानम्, सुगम् = सुगम्यो देशः, सुपथ्यम् = शोभनं भक्ष्यम्, ऋद्धम् = समृद्धं यज्ञफलम्, ऋषिः = समृद्धिः, क्लृप्तम् = विख्यातम्, क्लृप्तिः = विख्यातिः, मतिः = बुद्धिः, सुमतिः = शोभनाबुद्धिः, च मे यज्ञेन कल्पन्ताम्।

अर्थ – प्राप्त धन, प्राप्तव्य धन, पूर्वसंपन्न कृत्य, भविष्यसंपाद्य कर्म, सुगम्यदेश, सुंदर भोज्य पदार्थ, समृद्ध यज्ञफल, समृद्धि, ख्याति, बुद्धि, अच्छी बुद्धि, ये सब पदार्थ मुझे यज्ञ द्वारा देवताओं से मिलें।

व्व्रीहयश्श्च मे यवाश्श्च मे माषाश्श्च मे तिलाश्श्च मे मुद्गाश्श्च मे खल्वाश्श्च मे प्प्रियङ्गवश्श्च मेणवश्श्च मे श्श्यामाकाश्श्च मे नीवाराश्श्च मे गोधूमाश्श्च मे मसूराश्श्च मे यज्ञेनं कल्प्पन्ताम् ॥१२॥

व्याख्या – **व्रीहयः = व्रीहिधान्यम्, यवाः = यवधान्यम्, माषाः, तिलाः, मुद्गाः, खल्याः, प्रियङ्गवः, अणवः, श्यामाकाः = तृण-धान्यम्, नीवाराः = वन्यधान्यम्, गोधूमाः, मसूराः, च मे यज्ञेन कल्पन्ताम्।**

अर्थ – धान, जौ, उरद, तिल, मूँग, चना, प्रियंगु (कँगनी), अणव (चीना), श्यामाक (जंगली धान), नीवार नामक वन्यधान्य, गेहूँ, मसूर आदि समस्त धान्य, ये सब पदार्थ मुझे यज्ञ द्वारा देवताओं से मिलें।

अश्म्मा च मे मृत्तिका च मे गिरयश्श्च मे पर्व्वताश्श्च मे सिकताश्श्च मे वनस्प्पतयश्श्च मे हिरण्ण्यञ्च मेयश्श्च मे श्श्यामञ्च मे लोहञ्च मे सीसञ्च मे त्रपु च मे यज्ञेनं कल्प्पन्ताम् ॥१३॥

व्याख्या – **अश्मा = पाषाणः मृत्तिका = मृत्स्ना, गिरयः = लघु-पर्वताः, पर्वताः = विशालपर्वताः, सिकताः = बालुकाः, वनस्पतयः = वृक्षाः, हिरण्यम् = स्वर्णम्, अयः = अयस्कम्, श्यामम् = ताम्रलोहम्, लोहम् = कालायसम्, सीसम्, त्रपु = रङ्गम्, च मे यज्ञेन कल्पन्ताम्।**

अर्थ – पत्थर, मिट्टी, पहाड़ियाँ, पहाड़, बालू, वृक्ष, सोना, अयस्क, ताँबा, लोहा, शीशा और राँगा, ये सब पदार्थ मुझे यज्ञ द्वारा देवताओं से मिलें।

अग्निश्च मऽआपश्च मे वीरुधश्च मऽओषधयश्च मे कृष्टपच्याश्च मेकृष्टपच्याश्च मे ग्राम्याश्च मे पशवऽआरण्याश्च मे वित्तञ्च मे वित्तिश्च मे भूतञ्च मे भूतिश्च मे यज्ञेन कल्पन्ताम् ॥१४॥

व्याख्या – **अग्निः = वह्निः, आपः = जलानि, वीरुधः = लता-गुल्माः, ओषधयः = रोगघ्नाः, कृष्टपच्याः = भूमिकर्षणानन्तरं वीजवपनेनोत्पन्नं धान्यम्, अकृष्टपच्याः = स्वयमेवोत्पन्नं नीवारादिधान्यम्, ग्राम्याः पशवः = ग्रामे भवाः गवादयः पशवः, आरण्यकाः = वन्याः गजादयः पशवः, वित्तम् = प्राप्तं धनम्, वित्तिः = भाविधनम्, भूतम् = जातम्, पुत्रादिकम्, भूतिः = ऐश्वर्यम्, च एतानि मे यज्ञेन कल्पन्ताम्।**

अर्थ – अग्नि, जल, लता-गुल्म, औषधियाँ, जोत-बोकर पैदा होने वाले

धान्य, अपने आप पैदा होने वाले धान्य, ग्राम्य गाय आदि पशु, जंगली हाथी-मृगादि पशु, प्राप्त धन, प्राप्तव्य धन, उत्पंन्न पुत्रादि और ऐश्वर्य, ये सब पदार्थ मुझे यज्ञ द्वारा देवताओं से मिलें।

वसुं च मे वसतिश्चं मे कर्म्मं च मे शक्किश्च मेर्त्थश्च मऽएमंश्च मऽइत्त्या चं मे गतिंश्च मे यज्ञेनं कल्प्पन्ताम् ॥१५॥

व्याख्या – **वसु = धनम्, वसतिः = निवासस्थानम्, कर्म = अग्निहोत्रादिनित्यकृत्यम्, शक्तिः = तदनुष्ठानसामर्थ्यम्, अर्थः = अभिलषितोऽर्थः, एमः = प्राप्तव्योऽर्थः, इत्या = तत्प्राप्त्युपायः, गतिः = गमनम्, च मे यज्ञेन कल्पन्ताम्।**

अर्थ – धन, निवासस्थान, अग्निहोत्रादि कर्म, उनको करने की शक्ति, अभिलाषित धन, प्राप्तव्य धन, उसको प्राप्त करने का उपाय और गमन, ये सब पदार्थ मुझे यज्ञ द्वारा देवताओं से मिलें।

अग्निश्चं मऽइन्द्रंश्च मे सोमंश्च मऽइन्द्रंश्च मे सविता चं मऽइन्द्रंश्च मे सरंस्वती च मऽइन्द्रंश्च मे पूषा चं मऽइन्द्रंश्च मे बृहस्प्पतिंश्च मऽइन्द्रंश्च मे यज्ञेनं कल्प्पन्ताम् ॥१६॥

व्याख्या – **अग्निः = अग्निदेवः, इन्द्रश्च = इन्द्रदेवोऽपि, एतत्सर्वत्र योज्यम्, सोमः = सोमदेवः, सविता = सूर्यः, सरस्वती = भारती-**

देवता, पूषा = पूषानामदेवता, बृहस्पतिः = देवगुरुः, च इन्द्रेण सह ऐते सर्वे देवाः मे यज्ञेन कल्पन्ताम्।

अर्थ—इंद्र के साथ अग्नि, सोम, सविता, सरस्वती, पूषा और बृहस्पति देवता यज्ञ को निर्विघ्न संपन्न कराकर प्रसन्न हों।

मित्रश्चं मुऽइन्द्रंश्च मे वरुणश्च मुऽइन्द्रंश्च मे धाता चं मुऽइन्द्रंश्च मे त्वष्टां च मुऽइन्द्रंश्च मे मुरुतंश्च मुऽइन्द्रंश्च मे विश्वें च मे देवाऽइन्द्रंश्च मे यज्ञेनं कल्प्पन्ताम् ॥१७॥

व्याख्या—**मित्रः, वरुणः, धाता, त्वष्टा, मरुतः, विश्वेदेवा च एभ्यः सर्वेभ्यः सह इन्द्रश्च मे यज्ञेन कल्पन्ताम्।**

अर्थ—इंद्र के साथ मित्र, वरुण, ब्रह्मा, त्वष्टा, मरुत् और समस्त देवता यज्ञ को निर्विघ्न संपन्न कराकर प्रसन्न हों।

पृथिवी चं मुऽइन्द्रंश्च मेन्तरिक्षञ्च मुऽइन्द्रंश्च मे द्यौश्चं मुऽइन्द्रंश्च मे समांश्च मुऽइन्द्रंश्च मे नक्षं-त्राणि च मुऽइन्द्रंश्च मे दिशंश्च मुऽइन्द्रंश्च मे यज्ञेनं कल्प्पन्ताम् ॥१८॥

व्याख्या—**पृथिवी = धारित्री, अन्तरिक्षम् = आकाशः, द्यौः = द्यु-लोकः, समाः—समः = वर्षः, तदधिष्ठातृदेवता, नक्षत्राणि =**

अश्विन्यादि नक्षत्राणि, दिशः = प्राच्यादयः, ऐते सर्वे इन्द्रश्च मे यज्ञेन कल्पन्ताम्।

अर्थ – इंद्र के साथ पृथिवी, आकाश, द्युलोक, वर्षाधिष्ठातृदेवता और नक्षत्रदेवता मेरे यज्ञ को सफल करें और प्रसन्न हो।

अ॒ꣳशुश्च॑ मे र॒श्मिश्च॒ मेदा॑भ्यश्च॒ मेधि॑पतिश्च मऽउपा॒ꣳशुश्च॑ मेन्तर्या॒मश्च॑ मऽऐन्द्रवाय॒वश्च॑ मे मैत्रावरु॒णश्च॑ मऽआश्वि॒नश्च॑ मे प्रतिप्र॒स्थान॑श्च मे शु॒क्रश्च॑ मे म॒न्थी च॑ मे य॒ज्ञेन॑ कल्पन्ताम् ॥११॥

व्याख्या – अंशुः = सूर्यांशवः, रश्मिः = किरणाः, अदाभ्यः, अधिपतिः = सूर्यः, उपांशुः = उपसमयः, अन्तर्यमः, ऐन्द्रवायवः, मैत्रावरुणः, अश्विनः, प्रतिप्रस्थानः, शुक्रः, मन्थी, एते प्रसिद्धाः अन्तरिक्षस्था ग्रहदेवाः, मम यज्ञेन कल्पन्ताम्।

अर्थ – सूर्यांशु, रश्मियाँ, अदाभ्य अधिपति, उपांशु, अंतर्यम, ऐंद्रवायव, मैत्रावरुण, प्रतिप्रस्थान, शुक्र और मन्थी आदि अंतरिक्ष में अवस्थित देवता मेरे यज्ञ को सफल करें और प्रसन्न हों।

आ॒ग्र॒य॒णश्च॑ मे वैश्वदे॒वश्च॑ मे ध्रु॒वश्च॑ मे वैश्वान॒रश्च॑ मऽऐन्द्रा॒ग्नश्च॑ मे म॒हावैश्वदेवश्च मे मरुत्व॒तीयाश्च मे॒ निष्केवल्यश्च मे सावि॒त्रश्च॑ मे

सारस्वतश्च मे पात्नीवतश्च मे हारियोजनश्च मे यज्ञेन कल्पन्ताम् ॥२०॥

व्याख्या – **आग्रयणः, वैश्वदेवः, ध्रुवः, वैश्वानरः, ऐन्द्राग्नः, महावैश्वदेवः, मरुत्वतीयाः, निष्केवल्यः, सावित्रः, सारस्वतः, पात्नीवतः, हारियोजनः च ऐते सर्वे देवाः मम यज्ञेन कल्पन्ताम्।**

अर्थ – आग्रहयण, वैश्वदेव, ध्रुव, वैश्वानर, ऐन्द्राग्न, महावैश्वदेव, मरुत्वतीय, निष्केवल्य, सावित्र, सारस्वत, पात्नीवत, हारियोजन आदि समस्त देवता मेरे यज्ञ को सफल करें और प्रसन्न हों।

स्रुचश्च मे चमसाश्च मे वायव्यानि च मे द्रोण-कलशश्च मे ग्रावाणश्च मेधिषवणे च मे पूतभृच्च मऽआधवनीयश्च मे वेदिश्च मे बर्हिश्च मेवभृथश्च मे स्वगाकारश्च मे यज्ञेन कल्पन्ताम् ॥२१॥

व्याख्या – **स्रुचः = यज्ञपात्रविशेषः, चमसा, वायव्यानि, द्रोण-कलशः, ग्रावाणः, अधिषवणे, पूतभृत्, आधवनीयः, वेदिः, बर्हिः, अवभृतः, स्वगाकारः, एतानि सर्वाणि यज्ञसम्भारजातानि मम यज्ञेन कल्पन्ताम्।**

अर्थ – स्रुच, चमसा, वायव्य, द्रोणकलश, ग्रावाण, अधिषवण, पूतभृत्, आधवनीय, वेदि, वर्हि, अवभृत और स्वगाकार, ये सब यज्ञपात्र और सामग्रियाँ मुझे यज्ञ के द्वारा देवताओं से प्राप्त हों।

अ॒ग्निश्च॑ मे घ॒र्म्मश्च॑ मे॒र्क्कश्च॑ मे॒ सूर्य॑श्च मे प्रा॒णश्च॑ मेश्वमे॒धश्च॑ मे पृथि॒वी च॒ मेदि॑तिश्च मे॒ दिति॑श्च मे॒ द्यौश्च॑ मेङ्गु॒लय॒ᳬ शक्क्व॑रयो॒ दिश॑श्च मे य॒ज्ञेन॑ कल्प्पन्ताम् ॥२२॥

व्याख्या – **अग्निः, धर्मः, अर्कः, सूर्यः, प्राणः, अश्वमेधः, पृथिवी, दितिः = दैत्यानां माता, अदितिः = देवमाता, द्यौ = दिवः, अङ्गुल्यः = विराट्पुरुषस्यावयवाः, शक्करयः = शक्तयः, देव्यः, दिशः = प्राच्यादयः, मे = मम यज्ञेन कल्पन्ताम्।**

अर्थ – अग्नि, घर्म, अर्क, सूर्य, प्राण, अश्वमेध, पृथिवी, दिति, अदिति, द्यौ, विराट्पुरुष के अवयव, शक्तियाँ और पूर्वादि दिशाएँ मेरे यज्ञ के द्वारा प्रसन्न हों।

व्र॒तञ्च॑ मऽऋ॒तव॑श्च मे॒ तप॑श्च मे सँव्वत्स॒रश्च॑ मेहोरा॒त्रेऽऊ॑र्व्वष्ठी॒वे बृ॑हद्रथन्त॒रे च॑ मे य॒ज्ञेन॑ कल्प्पन्ताम् ॥२३॥

व्याख्या – **व्रतम् = नियमः, ऋतवः = शरदादयः, तपः = यमनियमादि, संवत्सरः = तारणादिः, अहोरात्रे = दिवानिशे, ऊर्वष्ठीवे – ऊरू च अवष्ठीस्त्र तौ अङ्गविशेषौ, बृहद्रथन्तरे च मे = मम, यज्ञेन कल्पन्ताम्।**

अर्थ – व्रतादि नियम, ऋतुएँ, तप, संवत्सर, रात-दिन, ऊरू आदि अंग और बृहद्रथंतर आदि मेरे यज्ञ के द्वारा प्रसन्न हों।

एकां च मे तिस्रश्चं मे तिस्रश्चं मे पञ्चं च मे पञ्चं च मे सप्त चं मे सप्त चं मे नवं च मे नवं च मऽएकांदश च मऽएकांदश च मे त्रयोंदश च मे त्रयोंदश च मे पञ्चंदश च मे पञ्चंदश च मे सप्तदंश च मे सप्तदंश च मे नवंदश च मे नवंदश च मऽ एकंविंꣳशतिश्च मऽएकंविंꣳशतिश्च मे त्रयोंविंꣳशतिश्च मे त्रयोंविंꣳशतिश्च मे पञ्चंविंꣳशतिश्च मे पञ्चंविंꣳशतिश्च मे सप्तविंꣳशतिश्च मे सप्तविंꣳशतिश्च मे नवंविंꣳशतिश्च मे नवंविंꣳशतिश्च मऽ एकंत्रिꣳशच्च मऽएकंत्रिꣳशच्च मे त्रयंस्त्रिꣳशच्च मे यज्ञेनं कल्पन्ताम् ॥२४॥

व्याख्या – मन्त्रेऽस्मिन् एकतः आरभ्य त्रयस्त्रिंशत् यावद् विषम-सङ्ख्यानां यज्ञफलत्वेन याचनमस्ति। मन्त्रार्थः सुगमः। एका च...त्रयस्त्रिंशत् च मे यज्ञेन कल्पन्ताम्।

अर्थ – यज्ञफल के रूप में देवता मुझ १ से ३३ तक की विषम संख्याएँ दें।

चत॑स्रश्च मेृष्टौ च॑ मेृष्टौ च॑ मे द्वाद॑श च मे द्वाद॑श च मे षोड॑श च मे षोड॑श च मे विꣳशतिश्च॑ मे विꣳशतिश्च॑ मे चतु॑र्विꣳशतिश्च मे चतु॑र्विꣳशतिश्च मेृष्टावि॑ꣳशतिश्च मेृष्टावि॑ꣳशतिश्च मे द्वात्रि॑ꣳशच्च मे द्वात्रि॑ꣳशच्च मे षट्त्रि॑ꣳशच्च मे षट्त्रि॑ꣳशच्च मे चत्वारिꣳशच्च॑ मे चत्वारिꣳशच्च॑ मे चतु॑श्चत्वा-रिꣳशच्च मे चतु॑श्चत्वारिꣳशच्च मेृष्टाच॑त्वारिꣳशच्च मे यज्ञेन॑ कल्पन्ताम् ॥२५॥

व्याख्या—मन्त्रेस्मिन् चतुर्थसङ्ख्यातः आरभ्यः क्रमशः तस्यां चतुर्णां चतुर्णां सम्मेलनेन जायमानानां सङ्ख्यानां यज्ञफलत्वेन याचनम् वर्णितमस्ति। मन्त्रार्थः सुगमः। चतस्त्रः, अष्टौ, द्वादश, षोडष, विंशतिः, चतुर्विंशतिः, अष्टाविंशतिः, द्वात्रिंशत्, षट्त्रिंशत्, चत्वारिंशत्, चतुश्चत्वारिंशत्, अष्टाचत्वारिंशच्च मे यज्ञेन कल्पन्ताम्।

अर्थ—यज्ञफल के रूप में देवता मुझे चार से विभाज्य अड़तालीस तक की—४, ८, १२, १६, २०, २४, २८, ३२, ३६, ४०, ४४, ४८ संख्याएँ दें।

त्र्यवि॑श्च मे त्र्यवी च॑ मे दित्यवाट् च॑ मे दित्यौही च॑ मे पञ्चा॑विश्च मे पञ्चावी च॑ मे त्रिवत्सश्च॑ मे

त्रिवत्सा चं मे तुर्य्यवाट्टचं मे तुर्य्यौही चं मे यज्ञेनं कल्प्पन्ताम् ॥२६॥

व्याख्या – **त्र्यविः = त्रयोऽवयवयो यस्य सः त्र्यविः सार्धसंवत्सरात्मकः वृषः, तथैव त्र्यवी = सार्धवंवत्सरात्मिका गौः, दित्यवाट् = द्विसंवत्सरो वृषः, तथैव दित्यौही = द्विसंवत्सरात्मिका गौः, पञ्चाविः = सार्धद्विसंवत्सरो वृषः, तथैव पञ्चावी = गौः, त्रिवत्सः = त्रिसंवत्सरो वृषः, तथैव त्रिवत्सा = गौः, तुर्यवाट् = सार्धत्रिसंवत्सरो वृषः, तथैव तुर्यौही = गौः, ऐते मे यज्ञेन कल्पन्ताम्।**

अर्थ – देवता मुझे यज्ञफल के रूप में डेढ़ वर्ष का बछड़ा और डेढ़ वर्ष की बछिया, दो वर्ष का बैल और दो वर्ष की गाय, ढाई वर्ष का बैल और ढाई वर्ष की गाय, तीन वर्ष का बैल और तीन वर्ष की गाय, साढ़े तीन वर्ष का बैल और साढ़े तीन वर्ष की गाय दें।

पृष्ठवाट्टचं मे पष्ठौही चं मऽउक्षा चं मे वुशा चं मऽऋषभश्चं मे वेहच्चं मेनड्वाँश्चं मे धेनुश्चं मे यज्ञेनं कल्प्पन्ताम् ॥२७॥

व्याख्या – **पष्टवाट् = चतुर्वर्षो वृषः, तादृशी एव, पष्ठौही = गौः, उक्षा = सेचनक्षमो वृषः, वशाः = अवन्ध्या गौः, ऋषवः = अतियुवा वृषभः, वेहत् = गर्भवती गौः, अनड्वान् = शकटवाहनक्षमः वृषभः, धेनुः = नवप्रसूता गौः, ऐते मे यज्ञेन कल्पन्ताम्।**

अर्थ – देवता मुझे यज्ञ के फल के रूप में चार वर्ष का बैल और चार

वर्ष की गाय, सेचन में समर्थ बैल और अवंध्या गाय, अतियुवा बैल और गर्भवती गाय, वाहन खींचने में समर्थ बैल और नयी व्याई हुई गाय दें।

वाजाय स्वाहा प्रसवाय स्वाहापिजाय स्वाहा क्रतवे स्वाहा वसवे स्वाहाहर्प्पतये स्वाहाह्ने मुग्धाय स्वाहा मुग्धाय वैनꣳशिनाय स्वाहा विनꣳशिनऽआन्त्यायनाय स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहा प्रजापतये स्वाहा। इयन्ते राण्मित्राय यन्तासि यमनऽ ऊर्जे त्वा वृष्ट्यै त्वा प्रजानान्त्वाधिपत्याय ॥२८॥

व्याख्या – **वाजाय = चैत्राय स्वाहा, प्रसवाय = वैशाखाय स्वाहा, अपिजाय = ज्येष्ठाय स्वाहा, क्रतवे = आषाढाय स्वाहा, वसवे = श्रावणाय स्वाहा, अहर्पतये = भाद्रपदाय स्वाहा, मुग्धाय = आश्विनाय स्वाहा, अमुग्धाय, वैनेशिनाय = कार्तिकाय स्वाहा, अविनंशिने आन्त्यायनाय = मार्गशीर्षाय स्वाहा, आन्त्याय भौवनाय = पौषाय स्वाहा, भुवनस्पतये = माघाय स्वाहा, अधिपतये = फाल्गुनाय स्वाहा, प्रजापतये = द्वादशमासाधिष्ठात्रे प्रजापतिदेवाय, स्वाहा = सुहुतमस्तु। हे अग्ने! इयं ते राट् = राज्यम्, तव यागाधिष्ठातृत्वात्, अपि च हे अग्ने! त्वं मित्राय = मित्रस्य सख्युर्यजमानस्य, यन्ता = प्रकाशकः, असि, त्वं यमनः = निया-**

वृष्ट्यै = वर्षणाय त्वा = त्वामभिषिञ्चामि, तथा प्रजानाम् = जनानाम्, अधिपत्याय = स्वामित्वप्राप्तये त्वा = त्वामभिषिञ्चामि।

अर्थ – चैत्र को स्वाहा, वैशाख को स्वाहा, ज्येष्ठ को स्वाहा, आषाढ को स्वाहा, श्रावण को स्वाहा, भाद्रपद को स्वाहा, आश्विन को स्वाहा, कार्तिक को स्वाहा, मार्गशीर्ष को स्वाहा, पौष को स्वाहा, माघ को स्वाहा और फाल्गुन मास को स्वाहा, बारह मासों के अधिपति प्रजापति को स्वाहा। हे अग्नि यह यज्ञ तुम्हारा राज्य है, हे अग्नि, तुम मित्रदेव के सखा यजमान के प्रशासक हो, तुम नियामक हो, अतः बल के दाता अन्न के लिए, तुम्हारा अभिषिंचन करता हूँ तथा वृष्टि और प्रजाओं के स्वामित्व के लिए तुम्हारा अभिषिंचन करता हूँ।

आयुर्य्यज्ञेनं कल्प्पताम्प्राणो युज्ञेनं कल्प्पताञ्च-क्षुर्य्युज्ञेनं कल्प्पताᳬं श्रोत्रँय्युज्ञेनं कल्प्पताँवा-ग्ग्युज्ञेनं कल्प्पताम्मनों युज्ञेनं कल्प्पतामात्क्मा युज्ञेनं कल्प्पताम्ब्रुह्मा युज्ञेनं कल्प्पताञ्ज्योतिंर्य्यु-ज्ञेनं कल्प्पन्ताᳬं स्वर्य्युज्ञेनं कल्प्पताम्पृष्ठँय्युज्ञेनं कल्प्पताँय्युज्ञो युज्ञेनं कल्प्पताम्। स्तोमंश्च्च यजुंश्च्च ऽऋक्क्च सामं च बृहच्चं रथन्तुरञ्चं। स्वंर्द्देवाऽअग-न्मामृताऽअभूम प्प्रजापंतेः प्प्रजाऽअंभूम वेट्ट् स्वाहां ॥२९॥

व्याख्या – **यज्ञेन = निमित्तभूतेन यजनेन, आयुः = जीवनम्, कल्पताम् = प्राप्यताम्, तथैव निमित्तभूतेन यज्ञेनैव प्राणः, चक्षुः, श्रोत्रम्, वाक्, मनः, आत्मा, ब्रह्मा = वेदः, ज्योतिः = ज्ञानात्मकः प्रकाशः, स्वः = स्वर्गः, पृष्ठम्, यज्ञः, एते सर्वे पदार्थाः कल्पताम् = प्राप्यताम्। स्तोमः = स्तोमात्रिवृत्पञ्चदशादि, यजुः = यजुर्वेदः अनियतपादमन्त्रः, ऋक् = नियतपादमन्त्रात्मक ऋग्वेदः, सामः = गीतिप्रधानो सामवेदः, बृहद्रथन्तरम् च प्रसन्नाः स्युः। वयं यजमानाः त्वत्प्रसादात् देवाः = देवाः भूत्वा, स्वः = स्वर्गम्, अगन्म = गतवन्तः, गत्वा च, अमृताः = अमरणधर्मिणः अभूम, प्रजापतेः = हिरण्यगर्भस्य प्रजाः = पाल्याः अभूम, वेट् स्वाहा = वेडिति वषट्कारः।**

अर्थ – यज्ञ से आयु प्राप्त हो, यज्ञ से प्राण, नेत्र, कान, वाणी, मन, आत्मा, वेद ज्ञानात्मक प्रकाश, स्वर्ग पृष्ठ और यज्ञ प्राप्त हों। स्तोम, यजुर्वेद, ऋग्वेद, सामवेद और वृहद्रथंतर प्रसन्न हों। हम सब यज्ञकर्ता आपके प्रसाद से देवता होकर स्वर्ग जायें, स्वर्ग जाकर अमर हों और प्रजापति की संतान हों।

(इत्यष्टमोऽध्यायः)

॥ अथ शान्त्यध्यायः ॥

॥ हरिः ॐ ॥

ऋचँवाचम्प्रपद्ये मनो यजुः प्रपद्ये साम प्राणम्प्रपद्ये चक्षुः श्रोत्रम्प्रपद्ये। वागोजः सहौजो मयि प्राणापानौ ॥१॥

व्याख्या – **ऋचम् = ऋग्वेदरूपाम्, वाचम् = वाणीम्, प्रपद्ये = शरणं गच्छामि, यजुः = यजुर्वेदरूपम्, मनः = मानसम्, प्रपद्ये = शरणं गच्छामि, साम = सामवेदरूपम् प्राणम्, प्रपद्ये = शरणं गच्छामि, चक्षुः = नेत्रेन्द्रियम्, श्रोत्रम् = श्रवणेन्द्रियम् च प्रपद्ये = शरणं गच्छामि।**

अर्थ – ऋग्वेद रूपी वाणी का शरणागत होता हूँ, यजुर्वेद रूपी मन का शरणागत होता हूँ, सामवेद रूपी प्राण का शरणागत होता हूँ। वागिंद्रिय के बल के साथ शारीरिक बल और प्राण-अपान मेरे अंदर अवस्थित हों।

यन्मे च्छिद्रञ्चक्षुषो हृदयस्य मनसो वातितृण्णम्बृहस्पतिर्म्मे तद्दधातु। शन्नो भवतु भुवनस्य यस्पतिः ॥२॥

व्याख्या – **मे = मम, चक्षुषः = चक्षुरिन्द्रियस्य, यत्, छिद्रम् = दोषः**

जातः, हृदयस्य = अन्तःकरणस्य, मनसः मानसस्य वा, यत्, अतितृण्णम् = तृष्णाकृतमतिव्याकुलत्वं जातम्, बृहस्पतिः = देवगुरुः, मे = मम, तत् = छिद्रमतितृण्णम् च, दधातु = निर्वर्तयतु, दूरीकरोतु इति भावः। यः, भुवनस्य = मर्त्यलोकस्य, पतिः = स्वामी, यः प्रजापति अस्ति सः नः = अस्माकम्, शम् = कल्याणम्, भवतु = करोतु।

अर्थ – यज्ञ-संपादनकाल में जो मेरे नेत्रों में दृष्टि-दोष पैदा हुए तथा हृदय और मन में अतितृष्णा से व्याकुलता आयी, देवगुरु बृहस्पति मेरे उन दोषों को दूर करें। भुवनों के स्वामी प्राजपति हमारा कल्याण करें।

भूर्भुवः॒ स्वः॑। तत्स॑वि॒तुर्वरे॑ण्यम्भर्गो॑ देवस्य॑ धीमहि। धियो॒ यो नः॑ प्र चो॒दया॑त्॥३॥

व्याख्या – **भूः, भुवः, स्वः, एताः तिस्रः व्याहृतयः, देवस्य = द्योतमानस्य, सवितुः = सर्वान्तर्यामितया प्रेरकस्य जगत्स्रष्टुः परब्रह्मणः सूर्यस्य वा, वरेण्यम् = सर्वैरूपास्यतया ज्ञेयतया च वरिष्ठतमम्, भर्गः = अज्ञानान्धकारभर्जनात्, भर्गः परमप्रकाशः, धीमहि = ध्येयतया मनसा धारयेम। यः = सविता देवः, नः, अस्माकम्, धियः = बुद्धिः, प्रचोदयात् = सत्कर्मसु प्रेरयेत्।**

अर्थ – परमप्रकाशमान् सर्वांतर्यामी सबके रचयिता परब्रह्मस्वरूप सूर्य के सबके द्वारा उपास्य और ज्ञेय होने के कारण वरिष्ठतम, अज्ञानरूपी अंधकार के निवर्तक परमतेज को हम मन के द्वारा धारण करते हैं। वह सूर्यदेव हमारी बुद्धियों को सत्कर्म के प्रति प्रेरित करें।

कया॑ नश्चि॒त्रऽआभु॑वदू॒ती स॒दावृ॑ध॒ᳪ सखा॑।
कया॒ शचि॑ष्ठया वृ॒ता ॥४॥

व्याख्या – **सदावृधः = सदैव वृद्धिमापद्यमानः, चित्रः = चयनीयः, पूजनीयः, सखा = सखाभूतः इन्द्रः, कया ऊतीः = ऊत्या अवनेन तर्पणेन वा, नः = अस्माकम्, आभुवत् = सम्मुखो भवेत्। शचिष्ठया = प्रज्ञासहितमनुष्ठीयमानेन, कयावृता = केन क्रियमाणेन कर्मणा च अविमुखो भवेत्।**

अर्थ – सदैव वर्धनशील, पूजनीय, हमारे मित्रस्वरूप इंद्र किस तर्पण-पूजन से हमारे अभिमुख होंगे? विधिपूर्वक किये गये किस अनुष्ठान से वह हमारे अनुकूल होंगे?

कस्त्वा॑ स॒त्यो मदा॑ना॒म्मᳪहि॑ष्ठो मत्स॒दन्ध॑सः।
दृ॒ढा चि॑दा॒रुजे॒ वसु॑ ॥५॥

व्याख्या – **हे इन्द्र! मदानाम् = मदजनकानां हवीनां मध्ये, महिष्ठः = अत्यन्तश्रेष्ठः, तृप्तिदायकः, अन्धसः = अन्नस्य सोमरसस्य वा, कः = को अंशः, त्वा = त्वाम्, मत्सत् = माद्यति, हर्षयुक्तं करोति। येन त्वं दृढाचित् = एकचित्तो भूत्वा, वसु = वसूनि धनानि, आरुजे = विभज्य ददासि।**

अर्थ – **हे इंद्र, हर्षित करने वाली हवियों में से कौन सी अन्न या सोमरस की हवि तुमको अत्यंत हर्ष उत्पन्न कराती है? जिससे प्रसन्न होकर तुम हम लोगों को विभक्त कर धन देते हो।**

अभी षु णः सखीनामविता जरितॄणाम्।
शतम्भवास्यूतिभिः ॥६॥

व्या. – **हे इन्द्र! त्वम्, सखीनाम् = मित्रस्वरूपाणाम्, जरितृणाम् = यजमानानाम् स्तोतृणाम्, रक्षिता = पालकः असि, तथा शतेन = बह्वीभिः, ऊतिभिः = रक्षाभिः, सह, नः = अस्माकम्, सु = सुप्रकारेण, अभिभवासि = अभिभवनकर्ता पालनकर्ता असि।**

अर्थ – हे इंद्र! तुम मित्रस्वरूप, स्तुति करने वाले यजमानों के रक्षक हो, तथा सैकड़ों प्रकार से हम लोगों का पालन करते हो।

कया त्वन्नऽऊत्याभिप्रमन्दसे वृषन्।
कया स्तोतृभ्यऽआभर ॥७॥

व्याख्या – **वृषन् – वर्षति इति वृषा, तत्सम्बोधने – वृषन् = हे वर्षणशील इन्द्र! कया ऊत्या = केन हविर्दानेन, नः = अस्मान्, अभिप्रमन्दसे = अभितः आनन्दयसि, एवं कया ऊत्या, स्तोतृभ्यः = स्तवनकर्तृभ्यः यजमानेभ्यः, आभर = दानाय, धनमाहरसीति भावः। ज्ञापय तदेवाचरिष्यामि।**

अर्थ – हे वर्षा करने वाले इंद्र! तुम किस प्रकार के हविर्दान से हम लोगों को आनंदित करते हो? एवं किन स्तुतियों से स्तुति करने वालों को धन लाकर देते हो? बताओ, हम वही करें।

इन्द्रो विश्वस्य राजति।
शन्नोऽअस्तु द्विपदे शञ्चतुष्पदे ॥८॥

व्या. – **विश्वस्य = जगतः, इन्द्रः = शासकः, परमेश्वरः, आदित्यो वा, राजति = शोभितो भवति, नः = अस्माकम्, द्विपदे = द्विपादवतां पुत्रादीनाम्, चतुष्पदे = चतुष्पदानां गवादीनाम्, शम् = कल्याणम्, अस्तु = करोतु।**

अर्थ – संपूर्ण जगत् का शासक परमेश्वर इंद्र अथवा सूर्य शोभित होता है। वह हमारे दो पैर वाले पुत्रादि का एवं चार पैर वाले गाय आदि पशुओं का कल्याण करे।

शन्नो॑ मि॒त्रः शँवरु॑णः॒ शन्नो॑ भवत्त्वर्य्य॒मा।
शन्न॒ऽइन्द्रो॒ बृह॒स्प्पति॒ः शन्नो॒ विष्ण्णु॑रुरु॒क्क्रमः॒ ॥९॥

व्याख्या – **मित्रः = मित्राख्यो देवः, नः = अस्माकम्, शम् = कल्याणम् करोतु, कल्याणरूपो वा भवतु, वरुणः = वरुणदेवः, नः = अस्माकम्, शम् = कल्याणम् विदधातु, कल्याणरूपो वा भवतु, अर्यमा = अर्यमानामदेवः, नः, शम् सुखं करोतु, सुखरूपो वा भवतु, इन्द्रः = देवराजः, नः, शम् = भद्रं करोतु, भद्ररूपो वा भवतु, बृहस्पतिः = सुराचार्यः नः, शम् = कल्याणम् करोतु, कल्याणरूपो वा भवतु, उरुक्रमः = विस्तीर्णपादक्रमः, विष्णुः = उपेन्द्रः, नः, शम् = कल्याणकारी भवतु।**

अर्थ – मित्रदेव हमारा कल्याण करें, वरुणदेव हमारा कल्याण करें, अर्यमादेव हमारा कल्याण करें, इंद्रदेव हमारा कल्याण करें, बृहस्पति हमारा कल्याण करें, विस्तीर्ण पादक्रमवाले विष्णु हमारा कल्याण करें।

शन्नो वार्तः पवताᳬ शन्नस्तपतु सूर्य्यः।
शन्नः कनिक्रदद्देवः पुर्जन्योऽअभिवर्षतु ॥१०॥

व्याख्या – वातः = वायुदेवः, नः = अस्माकम्, शम् = सुखकारी सन्, पवताम् = प्रवहताम्, सूर्यः = आदित्यः, नः, शम् = सुखकारी, अदहन् सन्, तपतु = तापयतु, पर्जन्यः = वृष्टिकारकः पर्जन्याख्यो देवः, कनिक्रदत् = गर्जनरूपं क्रन्दनं कुर्वन्, नः = अस्माकम्, शम् = कल्याणकरं यथा स्यात्तथा, अभिवर्षतु = अभितः जलवर्षणं करोतु।

अर्थ – वायुदेव हमारा कल्याण करते हुए वहें, सूर्य हम को सुख देते हुए तपें, पर्जन्यदेव हमारा जैसे कल्याण हो, वैसे ही बरसें।

अहानि शम्भवन्तु नः शᳬ रात्रीः प्रतिधीयताम्। शन्नऽइन्द्राग्नी भवतामवोभिः शन्नऽइन्द्रावरुणा रातहव्या। शन्नऽइन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शँय्योः ॥११॥

व्याख्या – अहानि = दिनानि, नः = अस्माकम्, शम् = सुखकराणि भवन्तु, रात्रीः = निशाः शम् = सुखरूपाः, प्रविधीयताम् = प्रकर्षेण विदधातु देवः, इन्द्राग्नी = इन्द्रः, अग्निदेवश्च, अवोभिः = पालनात्मकैः कृत्यैः, नः, शम् = सुखकरौ भवताम्, रातहव्या = रातम् = दत्तम् हव्यं ययोस्तौ, इन्द्रवरुणौ, नः, शम् = सुखकरौ

भवताम्, वाजसातौ – वाजस्य = अन्नस्य, सातौ = निमित्तभूतौ, इन्द्रापूषणा = इन्द्रः पूषणाख्यश्च देवः, नः, शम् = सुखकरौ भवताम्, सुविताय = श्रेष्ठोत्पत्तये, इन्द्रसोमा = इन्द्रः सोमश्च, शं योः = रोगं, भयञ्च दूरीकृत्य, नः, शम् = सुखकरौ भवताम्।

अर्थ – इंद्र और अग्नि अपने पालनात्मक कर्मों द्वारा हमारे सुखकारी हों, जिनकी हवि दी जा चुकी है ऐसे इंद्र और वरुण हमारा कल्याण करें, अंत के उत्पादक इंद्र और पूषा हमें सुख दें, श्रेष्ठ संतान की उत्पत्ति के लिए और भय-रोगों को दूर करने के लिए इंद्र और सोम हमारे सुखकारी हों।

शन्नों देवीरभिष्टंय्ऽआपों भवन्तु पीतयें।
शँय्योरभिस्त्रंवन्तु नः ॥१२॥

व्याख्या – देवीः = दीप्यमानाः, आपः = जलानि, नः = अस्माकम्, अभिष्टये = स्नानाय अभीष्टसिद्धये वा, पीतये = पानाय च, शम् = सुखकराः भवन्तु, शंयोः = रोगशमनाय भवनाशाय च, अभिस्त्रवन्तु = अभितः स्त्रवन्तु = प्रवहन्तु वर्षन्तु च।

अर्थ – दीप्यमान जल हमारे स्नान और पीने के लिए सुखकारी हों, वह हमारे रोग-शमन और भयनाश के लिए हमारे चारोतरफ वर्षें और बढ़ें।

स्योना पृंथिवि नो भवानृक्षरा निवेशंनी।
यच्छां नः शर्म्मं सप्रथांः ॥१३॥

व्याख्या – **अनृक्षरा – न सन्ति ऋक्षराः कण्टकाः दुःखदायिनो जनाश्च यस्यां सा = निष्कण्टका, निवेशिनी – निवसन्ति जनाः यस्यां सा निवेशिनी = आवासयोग्या, सप्रथाः – प्रथेन = विस्तारेण सह वर्तमाना सप्रथा = विस्तारवती, पृथिवी = हे पृथिवीदेवि! नः = अस्माकम्, स्योना = सुखरूपा भव, अपि च, नः = अस्मभ्यम्, शर्म = सुखम्, यच्छ = देहि।**

अर्थ – काँटों एवं दुःखदायी जनों से रहित, निवास करने योग्य, विस्तारवती हे पृथ्वी देवि! हम लोगों के लिए सुखरूप होओ और हम लोगों को सुख भी दो।

आपो हि ष्ठा मयोभुवस्ता नऽऊर्जे दधातन।
महे रणाय चक्षसे॥१४॥

व्याख्या – **आपः = हे जलानि! यूयम्, आमयोभुवः = सुखस्य भावयित्रः, स्थ; अतः ताः यूयम्, नः = अस्माकम्, ऊर्जे = रसाय, बलाय, दधातन = स्थापयत, वयं यथा सर्वस्य भोग्यस्य रसस्य भोक्तारः भवेम अस्मान् तथा कुरुतेति भावः। अपि च, महेरणाय = परमानन्दाय, चक्षसे = दर्शनाय च अस्मान् दधातन।**

अर्थ – हे जल! तुम सुख के उत्पादक हो, अतः हमको ऐसा बनाओ कि हम समस्त रस और आनंद के भोक्ता और बलवान् बनें और हमें परमानंद के दर्शन के लिए भी वैसा ही बनाओ।

यो वः शिवतमो रसस्तस्य भाजयतेह नः।

उशतीरिव मातरः ॥१५॥

व्याख्या – **हे आपः! वः = युष्माकम्, यः, शिवतमः = अत्यन्त-पवित्रतमः, सुखमयः, रसः = रसोऽस्ति, इह = अस्मिन् लोके नः = अस्मान्, तस्य = शिवतमरसस्य, भाजयत = पात्रं कुरुत भोगिनः कुरुत इति भावः। किमिव? यथा, उशतीः = प्रीतियुक्ताः, मातरः = जनन्यः स्वपुत्रं स्वकीयस्तन्यरसम् पाययन्ति।**

अर्थ – हे जल! तुम्हारा जो यह अत्यंत पवित्र और कल्याणकारी रस है, आपके स्तवन में संलग्न हमलोगों को उस रस के पान का अधिकारी बनाओ, जैसे स्नेहवती माताएँ अपने पुत्र को अपना स्तन पिलाती हैं।

तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ।
आपो जनयथा च नः ॥१६॥

व्याख्या – **हे, आपः = हे जलानि! यूयम्, यस्य = पापस्य, क्षयाय = विनाशाय अस्मान्, जिन्वथ = प्रीणयथ, तस्मै = तादृशपापस्य क्षयाय, वयम्, वः = युष्मान्, अरम् = क्षिप्रम्, गमामः = शिरसि क्षिपामः। अपि च, हे आपः! नः = अस्मान्, जनयथा च = पुत्रपौत्रादिप्रजनने प्रयोजयतेति भावः।**

अर्थ – हे जल! तुम जिस पाप का विनाश करके हमलोगों को प्रसन्न करते हो, उसी पाप के विनाश के लिए हम तुमको सिरपर प्रक्षिप्त करते हैं। हे जल, हमें पुत्रपौत्रादि के प्रजनन का सामर्थ्य दो।

द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥१७॥

व्याख्या – **द्यौः = द्युलोकरूपा या शान्तिः, अन्तरिक्षम् = अन्तरिक्षरूपा या शान्तिः, पृथिवी = पृथिवीरूपा या शान्तिः, आपः = जलरूपा या शान्तिः, ओषधयः = ओषधिरूपा या शान्तिः, वनस्पतयः = लतागुल्मयुक्तवृक्षादिरूपा या शान्तिः, विश्वेदेवाः = सर्वदेवमयी या शान्तिः, ब्रह्मशान्तिः = परब्रह्मणि स्थिता शान्तिः, सर्वम् = सर्वसृष्टिरूपा शान्तिः, शान्तिरेव = शान्तिस्वरूपैव या शान्तिः, सैव शान्तिः, मा = माम् प्रति मयि वा एधि = वर्धस्व। वर्णितपदार्थस्थितां शान्तिं मह्यं प्रयच्छेति भावः।**

अर्थ – द्युलोकरूप शांति, अंतरिक्षरूप शांति, पृथिवीरूप शांति, जलरूप शांति, औषधिरूप शांति, वनस्पतिरूप शांति, सर्वदेवरूप शांति, ब्रह्मरूप शांति, संपूर्ण जगत्-रूप शांति तथा शांतिस्वरूप जो शांति है, वही शांति मेरे अंदर वृद्धि को प्राप्त हो अर्थात् वह शांति मुझे पदान करो।

दृते दृꣳह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्। मित्रस्याहञ्चक्षुषा सर्वाणि भूतानि समीक्षे। मित्रस्य चक्षुषा

समीक्षामहे ॥१८॥

व्याख्या – **दृते = हे महावीर! मा = माम्, दृंह = दृढीकुरु, तथा दृढी कुरु यथा माम्, सर्वाणि भूतानि = सर्वे प्राणिनः, मित्रस्य = सुहृदः, चक्षुषा = नेत्रेण, समीक्षन्ताम् = सम्यक्पश्यन्तु अर्थात् मित्रदृष्ट्या मां पश्यन्तु, न तु शत्रुदृष्ट्या। अहमपि, सर्वाणि भूतानि = सर्वान् प्राणिनः, मित्रस्य चक्षुषा = मित्रदृष्ट्या, समीक्षे = पश्यामि, मित्रस्य चक्षुषा = मित्रदृष्ट्यैव, समीक्षामहे = पश्यामहे च।**

अर्थ – हे देव! मुझे ऐसा दृढ़ करो जिससे कि सभी प्राणी मुझे मित्र की दृष्टि से देखें, शत्रु की दृष्टि से नहीं। मैं भी सभी प्राणियों को मित्र की दृष्टि से ही देखूँ। इस प्रकार हम सब एक-दूसरे को मित्र की दृष्टि से ही देखें।

दृते दृꣳह मा ज्योक्ते सन्दृशि जीव्यासञ्ज्योक्ते सन्दृशि जीव्यासम् ॥१९॥

व्याख्या – **दृते = हे महावीर! मा = माम्, दृंह = दृढी कुरु, हे महावीर! ते = तव, सन्दृशि = सद्दृष्टौ कृपादृष्टौ सत्याम्, अहम्, ज्योक् = चिरम्, जीव्यासम् = जीवेयम्। आदरार्थे पुनरुक्तिः – हे देव ते सन्दृषि ज्योक् जीव्यासम्।**

अर्थ – हे महावीर देव! तुम मुझे ऐसा दृढ़ करो कि तुम्हारी कृपादृष्टि से मैं चिरकाल तक जीवित रहूँ। आप की कृपादृष्टि से मैं चिरकाल तक जीवित रहूँ। (यहाँ पुनरुक्ति आदर के लिए है।)

नमस्ते हरसे शोचिषे नमस्तेऽअस्त्वर्च्चिषे।
अन्न्याँस्तेऽअस्म्मत्त्तपन्तु हेतयः पावकोऽ
अस्म्मब्भ्यं शिवो भव॥२०॥

व्याख्या – **हे अग्नि! ते = तव, हरसे = सर्वरसहरणशीलाय, शोचिषे नमः = नमोऽस्तु, ते = तव, अर्चिशे = ज्वालायै नमः, ते = तव, हेतयः = अस्त्ररूपाः, ज्वालाः, अस्मत् = अस्मदपेक्षया ये, अन्या = भिन्नाः अस्मद्विरोधिनः सन्ति तान्, तपन्तु = दहन्तु, तथा च त्वम्, पावकः = पवित्रयिता सन्, अस्मभ्यम् = अस्मत्कृते, शिवः = कल्याणकारी, भव।**

अर्थ – हे अग्नि! तुम्हारे सभी रसों को ग्रहण करने वाले तेज को नमस्कार; तुम्हारी ज्वालाओं को नमस्कार, तुम्हारी अस्त्ररूप ज्वालाएँ हमसे भिन्न हमारे शत्रुओं को जलाएँ तथा तुम पवित्र-कारक होते हुए हमारे कल्याणकारी होओ।

नमस्तेऽअस्तु विद्युते नमस्ते स्तनयित्क्नवे।
नमस्ते भगवन्नस्तु यतः स्वः समीहसे॥२१॥

व्याख्या – **भगवन् = हे ऐश्वर्यवान् महावीर! ते = तव, विद्युते = तडिते, नमः, ते स्तनयित्नवे = गर्जनशीलाय मेघाय नमः, हे भगवन् तेऽपि नमः अस्तु, यतः = यतो हि, त्वम् स्वः = स्वर्गम्, समीहसे = मह्यम् दातुमिच्छसि।**

अर्थ – हे भगवन्! आपकी विद्युत को नमस्कार, आपके गर्जन करने वाले मेघों को नमसकार, हे भगवन्, आपको भी नमस्कार, क्योंकि आप मेरे लिए स्वर्ग की कामना करते हैं।

यतोंयतः समीहसे ततों नोऽअभंयङ्कुरु।
शन्नंः कुरुप्प्रजाब्भ्योभंयन्नः पशुब्भ्यंः ॥२२॥

व्या. – **हे महावीर! यतः यतः = यस्मात् यस्मात् रूपात् अथवा यस्मात् यस्मात् स्थानात्, समीहसे = इच्छसि, ततः ततः, नः = अस्माकम्, अभयम् = निर्भयम् कुरु, अपि च, नः = अस्माकम्, प्रजाभ्यः = सन्ततिभ्यः परिजनेभ्यः, शम् = सुखम् कुरु, नः = अस्माकम्, पशुभ्यः = गवादिचतुष्पादेभ्यः, अभयम् = निर्भयताम् कुरु।**

अर्थ – हे महावीर देव! आप जिस-जिस रूप में तथा जिस-जिस स्थान से इच्छा करते हैं उसी-उसी रूप में तथा उसी-उसी स्थान से हम लोगों को निर्भय कीजिए। हमारी संतति एवं परिजनों का कल्याण कीजिए, हमारे गाय आदि पशुओं को भयरहित कीजिए।

सुमित्त्रिया नऽआपऽओषंधयः सन्तु दुर्म्मित्रिया-स्तस्म्मैं सन्तु योस्म्मान्द्वेष्टि यञ्चं व्वयन्द्विष्म्मः ॥२३॥

व्याख्या – **आपः = जलानि, ओषधयः च, नः = अस्माकम्, सुमित्रिया = सन्मित्र इव हितकर्तारः, सन्तु = भवन्तु, तथा, यः = शत्रुः, अस्मान् द्वेष्टि = द्वेषं करोति, वयम् च यं प्रति, द्विष्मः = द्वेषम् कुर्मः, तस्मै = द्वेषिणो आपः ओषधयश्च, दुर्मित्रियाः = दुर्मित्र इव अहितकर्तारः भवन्तु।**

अर्थ – जल और औषधियाँ हमारे अच्छे मित्र के समान हितकर्ता हों तथा जो हमसे द्वेष करता है और हम जिससे द्वेष करते हैं, उस द्वेषी के दुर्मित्र के समान अहितकर्ता हों।

तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतञ्जीवेम शरदः शतꣳ शृणुयाम शरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात् ॥२४॥

व्याख्या – तत् = प्रसिद्धम्, देवहितम् = देवानां हितकरम्, शुक्रम् = तेजः, जगताम् = जीवानाम्, चक्षुः = प्रकाशकत्वात् नेत्ररूपः सूर्यः, पुरस्तात् = पूर्वस्यां दिशि, उच्चरत् = उद्गच्छति उदेति, अस्य प्रसादात् शतम्, शरदः = वर्षाणि, पश्येम = अवलोकनशक्तिमान् भवेयम्, शतं शरदः, जीवेम = स्वावलम्बी सन् शरीरं धारयेयम्, शतं शरदः, शृणुयाम = शब्दसाक्षात्कारसमर्थः भवेयम्, शतं शरदः, प्रब्रवाम = वाक्सामर्थ्यवान्भवेयम्, शतं शरदः, अदीनाः = दैन्यरहिताः, स्याम, भूयः च = पुनरपि, शतात् शरदः = शतवर्षेभ्योऽप्यधिकं पश्येम।

अर्थ – यह विख्यात देवों का हितकारी, तेजोवान् प्राणियों के नेत्रों के समान सूर्य पूर्व दिशा में उदित हो रहे हैं। इनकी कृपा से मैं सौ वर्ष तक देखूँ, सौ वर्ष तक जीवनधारण करूँ, सौ वर्ष तक सुनूँ, सौ वर्ष तक बोलूँ और सौ वर्ष तक दीनता-रहित रहूँ, तथा पुनः सौ से अधिक वर्षों तक देखूँ।

(इति शान्त्यध्यायः)

॥ अथ स्वस्तिप्रार्थनामन्त्राध्यायः ॥

॥ हरिः ॐ ॥

स्वस्ति नऽइन्द्रो वृद्धश्श्रवाः स्वस्ति नः पूषा विश्श्ववेदाः । स्वस्ति नस्ताक्क्ष्र्योऽअरिष्टनेमिः स्वस्ति नो बृहस्प्पतिर्द्दधातु ॥१॥

व्याख्या – **वृद्धश्रवाः – वृद्धम् = प्रभूतम्, श्रवः = श्रवणं श्राव्यं यशो वा यस्य सः = प्रभूतयशस्कः, इन्द्रः, नः, स्वस्ति = अविनाशं कल्याणम्, दधातु = करोतु, विश्वदेवाः – विश्वम् = सम्पूर्णम् वेत्ति इति यः सः = सर्वज्ञः, पूषा = पूषाख्यो देवः, नः स्वस्ति करोतु, अरिष्टनेमिः – अरिष्ट = अहिंसितः, नेमिः = अस्त्रः यस्य सः अरिष्टनेमिः = अहिंसकशस्त्रवान्, तार्क्ष्यम् – तृक्षस्य पुत्रः, गरुडः, नः स्वस्ति दधातु, बृहस्पतिः = देवानां पतिः, देवगुरुः, नः स्वस्ति विदधातु।**

अर्थ – प्रभूत यश वाले इंद्र हमारा कल्याण करें, सर्वज्ञ पूषादेव हमारा कल्याण करें, अहिंसक अस्त्रधारी गरुड हमारा कल्याण करें, देवगुरु बृहस्पति हमारा कल्याण करें।

ॐ पयः पृथिव्व्याम्पयऽओषधीषु पयो दिव्व्यन्तरिक्क्षे पयो धाः । पयस्वतीः प्प्रदिशः सन्तु मह्यम् ॥२॥

व्याख्या – हे देव! त्वम् पृथिव्याम् = धरित्र्याम्, पयः = रसम्, धाः = धेहि स्थापय, अपि च, ओषधीषु = रोगघ्नवनस्पतिषु, पयः = रसम्, धाः = स्थापय, दिवि = स्वर्गे च पयः धाः, अन्तरिक्षे = आकाशे च पयः धाः, किञ्च मह्यम् = मत्कृते, प्रदिशः = समस्ताः, दिशः पयस्वतीः = रसवत्यः, सन्तु।

अर्थ – हे देव! तुम पृथ्वी में रस का आधान करो, औषधियों में रस का आधान करो, स्वर्ग और अंतरिक्ष (आकाश) में रस का आधान करो और मेरे लिए समस्त दिशाएँ रसयुक्त हों।

ॐ विष्णोर्रराटमसि विष्णोः श्नप्त्रे
स्त्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि।
वैष्णवमसि विष्णवे त्वा॥३॥

व्याख्या – यज्ञमण्डपस्थ दक्षिणोत्तरभागयोः द्वे शकटे हविर्धान्याख्ये स्थाप्येते, तदाच्छागत्वेन परितः हविर्धानाख्यं मण्डपं क्रियते। सः मण्डपः विष्णुदेवतास्वरूप इति विष्णुत्वेनोपवर्ण्यते। तस्य विष्णुस्वरूपस्य मण्डपस्य पूर्वद्वारस्तम्भयोर्मध्ये काचिद्दर्भमाला ग्रथ्यते, तां मालां तद्बन्धनाधारभूतं तिर्यग्वंशं सम्बोध्य उच्यते – हे दर्भमयमालाधारवंश! त्वम्, विष्णोः = विष्णुरूपत्वेन कल्पितस्य हविर्धानमण्डपस्य, रराटम् = ललाटस्वरूपः, असि, हे रराटाधारभूतस्तम्भद्वय! युवाम्, विष्णोः = विष्णुस्वरूपस्य हविर्धानमण्डपस्य, श्नप्त्रे = ओष्ठसन्धिरूपे स्थः, हे लस्यूजनि! त्वम्, विष्णोः = हविर्धानमण्डपस्य स्यूरसि – सीव्यते अनेनेति

स्यूः सूचिरसि, हे रज्जुग्रन्थे! त्वम् विष्णोः = हविर्धानस्य, ध्रुवः, ग्रन्थि असि, हे हविर्धान! त्वम् वैष्णवम् = विष्णुसम्बन्धि, विष्णुस्वरूप वा असि, अतः विष्णवे = विष्णोः प्रीत्यर्थम्, त्वा = त्वाम् स्पृशामि = पूजयामि।

अर्थ – यज्ञमंडप के दक्षिणोत्तरभाग में हविधान से भरे दो शकट स्थापित किये जाते हैं, उन्हें आच्छादित करने के लिए एक मंडप बनाया जाता है, उस मंडप का नाम भी हविधान होता है। वह मंडप विष्णुस्वरूप होता है। उस मंडप के पूर्वद्वार में स्तंभों के बीच में एक दर्भमाला बाँधी जाती है। यहाँ उस माला के आधारभूत बाँसों और स्तंभों की विष्णु के अंगों के रूप में प्रार्थना है –

हे दर्भमाला के आधार! तुम विष्णुस्वरूप इस हविर्धान-मंडप में विष्णु के ललाटस्वरूप हो, हे ललाटाधारभूत दोनों स्तंभ! तुम विष्णुस्वरूप मंडप के ओष्ठस्वरूप हो। हे लस्यूजनि! तुम इस मंडप की सूची हो। हे रज्जुग्रंथि, तुम इस मंडप की ग्रंथि हो, हे हविर्धानमंडप, तुम विष्णुस्वरूप हो, अतः विष्णु को प्रसन्न करने के लिए तुम्हारा स्पर्श और पूजन करता हूँ।

ॐ अग्निर्द्देवता वातो देवता सूर्य्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवतादित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्पतिर्द्देवतेन्द्रो देवता वरुणो देवता ॥४॥

व्याख्या – **इष्टकास्थापनात्पूर्वं विभिन्नदेवतास्वरूपत्वेन तस्याः**

स्तुतिः क्रियते–हे इष्टके! त्वम् अग्निः देवतास्वरूपासि, त्वामुपदधामि। तथैव त्वम् वातः देवतास्वरूपासि, त्वामुपदधामि। त्वम् सूर्यः देवतास्वरूपासि, त्वामुपदधामि। त्वम् चद्रमा देवतास्वरूपासि, त्वामुपदधामि। त्वम् वसुदेवतास्वरूपासि, त्वामुपदधामि। त्वम् रुद्रदेवतास्वरूपासि, त्वामुपदधामि। त्वमादित्यदेवतास्वरूपासि, त्वामुपदधामि। त्वम् मरुद्देवतास्वरूपासि, त्वामुपदधामि। त्वम् विश्वेदेवादेवतास्वरूपासि, त्वामुपदधामि। त्वम् बृहस्पतिदेवतास्वरूपासि, त्वामुपदधामि। त्वमिन्द्रदेवतास्वरूपासि, त्वामुपदधामि। त्वम् वरुणदेवतास्वरूपासि, त्वामुपदधामि।

अर्थ – यज्ञमंडप की ईंट का न्यास करने के पूर्व विभिन्न देवताओं के रूप में उसकी स्तुति है – हे ईंट, तुम अग्निदेव-स्वरूप हो, तुम वायुदेव-स्वरूप हो, तुम सूर्यदेव-स्वरूप हो, तुम चंद्रमादेव-स्वरूप हो, तुम आदित्यदेव-स्वरूप हो, तुम मरुतदेवस्वरूप हो, तुम विश्वेदेवदेव-स्वरूप हो, तुम बृहस्पतिदेव-स्वरूप हो, तुम इंद्रदेव-स्वरूप हो, तुम वरुणदेव-स्वरूप हो, तुम्हारी स्थापना करता हूँ।

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो
नमः। भवे भवे नातिभवे भवस्व मां
भवोद्भवाय नमः ॥५॥

व्याख्या – पञ्चमुखस्य शिवस्य पश्चिममुखं मुक्तये प्रार्थयति – सद्योजातम् = सद्योजातनामकं यच्छिवस्य पश्चिमवक्त्रम् तत् प्रपद्यामि तस्य शरणगतो भवामि, सद्योजाताय वै नमः = नमोऽस्तु।

हे सद्योजात! भवे भवे = पुनः पुनः जन्मनि, माम्, न भवस्व = मा प्रेरय, अपि तु अतिभवे = संसारभिन्ने मुक्तस्वरूपे, भवस्व = प्रेरय, भवोद्भवाय = संसारादुद्धारकर्त्रे सद्योजाताय नमः।

अर्थ – पंचमुख शिव के पश्चिम मुख से मुक्ति की प्रार्थना करते हुए कहते हैं – सद्योजात नामक शिव के पश्चिम मुख के शरण में जाता हूँ, सद्योजात को नमस्कार! हे प्रभो, मुझे बार-बार भवबंधन में मत डालिए, अपितु जन्म-मृत्यु से रहित मोक्ष को प्रदान कीजिए। संसार-बंधन से उद्धार करने वाले शिव को नमस्कार।

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलवि-करणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥६॥

व्याख्या – **शिवस्य उत्तरमुखं तस्य विग्रहानपि प्रार्थयति – वामदेवाय = वामदेवाख्याय शिवस्योत्तरमुखाय नमः, वामदेवस्य विग्रहविशेषरूपेभ्यः अपि नमः, ते च क्रमशः ज्येष्ठाय नमः, श्रेष्ठाय नमः, रुद्राय नमः, कालाय नमः, कलविकरणाय नमः, बलविकरणाय नमः, बलाय नमः, बलप्रमथनाय नमः, सर्वभूतदमनाय नमः, मनोन्मनाय नमः।**

अर्थ – शिव के उत्तरमुख की प्रार्थना करते हुए कहते हैं – वामदेव नामक शिव के उत्तरमुख को नमस्कार। वामदेव के विशेष विग्रहों को क्रमशः – ज्येष्ठ को नमस्कार, श्रेष्ठ को नमस्कार, रुद्र को -

नमस्कार, काल को नमस्कार, कलविकरण को नमस्कार, बलविकरण को नमस्कार, बल को नमस्कार, बलप्रमथन को नमस्कार, सर्वभूतदमनक को नमस्कार, मनोन्मन को नमस्कार।

अघोरेभ्योथ घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्यः
सर्वशर्वेभ्यो नमस्तेऽअस्तु रुद्ररूपेभ्यः ॥७॥

व्याख्या– शिवस्य दक्षिणमुखं तस्य विग्रहानपि प्रार्थयति– अघोरेभ्यः = शिवस्य दक्षिणमुखाधिष्ठातृभ्यः, अघोरविग्रहेभ्यः = सात्त्विकत्वात् शान्तस्वरूपेभ्यः, अपि च, घोरेभ्यः = राजस्त्वात् उग्रस्वरूपेभ्यः, एवम्, घोरतरेभ्यः = तामसत्वात् उग्रादपि उग्रेभ्यः नमः, शर्व = हे शिव! ते = तव सर्वेभ्यः = सम्पूर्णेभ्यः, रुद्रस्वरूपेभ्यः, सर्वतः = सर्वेषु देशेषु दिक्षु कालेषु च नमः, अस्तु।

अर्थ– शिव के दक्षिणमुख के विग्रहों की प्रार्थना करते हुए कहते हैं– शिव के दक्षिणमुख के अधिष्ठाता सत्त्वप्रधान शांत, अघोरस्वरूपों को नमस्कार, रजोप्रधान उग्रस्वरूपों को नमस्कार, तमप्रधान अत्यंत उग्रस्वरूपों को नमस्कार। हे शिव! आपके संपूर्ण रुद्ररूपों का सभी देशों, दिशाओं और कालों में नमस्कार।

तत्पुरुषाय विद्महे महादेवाय धीमहि।
तन्नो रुद्रः प्रचोदयात् ॥८॥

व्याख्या– शिवस्य पूर्वं मुखं प्रार्थयति– वयम् तत्पुरुषाय = तत्पुरुषाख्यं देवम्, अत्र द्वितीयार्थे चतुर्थी, विद्महे = गुरु-शास्त्रमुखात् सम्यग् जानीमः ज्ञात्वा च, महादेवाय = तमेव

महादेवम्, धीमहि = ध्यायेम, तत् = तस्मात् तद्ज्ञानध्यानरूप-कारणात्, रुद्रः = रुद्र-देवः, नः = अस्मान्, प्रचोदयात् = ज्ञान-ध्यानादिसत्कर्मसु प्रेरयतु।

अर्थ – शिव के पूर्वमुख की प्रार्थना करते हुए कहते हैं – हम तत्पुरुष नामक शिव को शास्त्र और गुरु के निर्देशानुसार अच्छीतरह से जानते हैं, उस महादेव का ध्यान करते हैं, इसलिए उनका ज्ञान और ध्यान करने के कारण वह रुद्रदेव हमें ज्ञानध्यानादि सत्कर्मों में प्रेरित करें।

ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम्।
ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो
मेऽअस्तु सदाशिवोम् ॥९॥

व्याख्या – शिवस्योर्ध्वमुखं प्रार्थयति – ऊर्ध्वमुखः शिवः, सर्वविद्यानाम् = सर्वाषाम् वेदशास्त्रादिकलापर्यन्तविद्यानाम्, ईशः, स्वामी, नियामकः, सर्वभूतानाम् = अखिलचेतनानाम्, ईश्वरः = प्रभुः, नियामकः, ब्रह्माधिपतिः = वेदस्य विशेषरूपेण पालकः, ब्रह्मणः = परमेष्ठिनः, आधिपतिः = आधीशः, ब्रह्मा = ब्रह्माभूतश्च, मे = यत्कृते, शिवः = कल्याणकरः, अस्तु = भवतु। सदाशिवोम् = स एव सदाशिवः ॐ अहं भवामि।

अर्थ – शिव के ऊर्ध्वमुख की प्रार्थना करते हैं – सभी विद्याओं के स्वामी, सभी प्राणियों के ईश्वर, वेदों के पालक, ब्रह्मा के अधिपति, ब्रह्मास्वरूप हे शिव, सदा मेरे लिये कल्याणकारी हों। मैं सदाशिव-स्वरूप हो जाऊँ।

ॐ शिवो नामांसि स्वधिंतिस्ते पिता नमंस्तेऽअस्तु मा मां हिꣳसीः। निवंर्त्तयाम्म्यायुंषेन्नाद्यांय प्प्रजनं-नाय रायस्प्पोषांय सुप्प्रजास्त्वायं सुवीर्य्यांय ॥१०॥

व्याख्या – हे रुद्र! त्वम् शिवोनामा = शिव इति कल्याणकारी-नामवान् असि, स्वधितिः = वज्रम्, ते = तव, पिता = पालकः, अस्ति, ते = तुभ्यम्, नमः = नमस्कारोऽस्तु। मा = माम्, मा, हिंसीः = मारय। त्वां वयं यजनानन्तरम् निवर्तयामः = स्वर्लोकगमनाय विसृजामः, किमर्थम् – आयुषे = जीवनाय, अन्नाद्याय = अन्न-भक्षणाय, प्रजननाय = सन्तानाय, रायस्पोषाय – रायः = धनम्, तस्य पोषाय = रक्षणाय, सुप्रजास्त्वाय = शोभनसन्तत्युत्पादनाय, सुवीर्याय = शोभनबलाय च।

अर्थ – हे इंद्र! तुम "शिव" इस कल्याणकारी नाम वाले हो, वज्र तुम्हारा रक्षक है, तुमको नमस्कार, हम लोगों को मत मारो। यज्ञ की समाप्ति के बाद हम दीर्घायुष्य प्राप्ति के लिए, भक्षणीय अन्न की प्राप्ति के लिए, प्रजनन के लिए, धन-रक्षण के लिए, शोभन संतति की प्राप्ति के लिए तथा सुंदर बल की प्राप्ति के लिए तुम्हें विसर्जित करते हैं।

ॐ विश्श्वांनि देव सवितर्दुरितानि परांसुव। यद्भद्रन्तन्नऽआसुंव ॥११॥

व्याख्या – देवसवितः = हे सूर्यदेव! विश्वानि = सम्पूर्णानि, दुरि-तानि = पापानि, परासुव = मत्तः दूरे गमय, एवञ्च, यत्, भद्रम् =

कल्याणम्, तत्, नः = अस्माकं कृते, आसुव = आगमय।

अर्थ – हे सवितादेव! आप संपूर्ण पापों को हम से दूर ले जाएँ और जो कल्याणकारी है उसे हम लोगों के लिए लाएँ।

ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥१७॥

व्याख्या – द्यौः = द्युलोकरूपा या शान्तिः, अन्तरिक्षम् = अन्तरिक्षरूपा या शान्तिः, पृथिवी = पृथिवीरूपा या शान्तिः, आपः = जलरूपा या शान्तिः, ओषधयः = ओषधिरूपा या शान्तिः, वनस्पतयः = वृक्षादिरूपा या शान्तिः, विश्वेदेवाः = सर्वदेवमयी या शान्तिः, ब्रह्मशान्तिः = परब्रह्मणि स्थिता शान्तिः, सर्वम् = सर्वसृष्टिरूपा शान्तिः, शान्तिरेव = शान्तिस्वरूपैव या शान्तिः, सैव शान्तिः, मा = माम् प्रति मयिवा एधि = वर्धस्व। वर्णितपदार्थस्थितां शान्तिं मह्यं प्रयच्छेति भावः।

अर्थ – द्युलोकरूप शांति, अंतरिक्षरूप शांति, पृथिवीरूप शांति, जलरूप शांति, औषधिरूप शांति, वनस्पतिरूप शांति, सर्वदेवरूप शांति, ब्रह्मरूप शांति, संपूर्ण जगत्-रूप शांति तथा शांतिस्वरूप जो शांति है, वही शांति मेरे अंदर वृद्धि को प्राप्त हो अर्थात् वह शांति मुझे प्रदान करो।

सर्व्वेषाँव्वाऽएष व्वेदानाᳬं रसो यत्साम
सर्व्वेषामेवैनमेतद्वेदानाᳬं रसेनाभिषिञ्चति ॥ १३॥

ॐ शान्तिः शान्तिः शान्तिः सुशान्तिर्भवतु ।
सर्वारिष्टशान्तिर्भवतु । अनेन रुद्राभिषेककर्मणा
श्रीभवानीशङ्करमहारुद्रः प्रीयतान्न मम ।
ॐ साम्बसदाशिवार्पणमस्तु ॥

अर्थ – ॐ शांति, शांति, शांति, सुंदर शांति हो, सभी पापों की शांति हो। किये गये इस रुद्राभिषेककर्म से भगवान् श्रीभवानी-शंकर महारुद्र प्रसन्न हों। मेरा इसमें कुछ भी नहीं है। यह कर्म सदाशिव को अर्पित हो।

(इति स्वस्तिप्रार्थनामन्त्राध्यायः)

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी।
देशोऽयं क्षोभरहितो ब्राह्मणास्सन्तु निर्भयाः॥

दुर्जनस्सज्जनो भूयात् सज्जनश्शान्तिमाप्नुयात्।
शान्तो मुच्येत बन्धेभ्यो मुक्तश्चान्यान् विमोचयेत्॥

स्वस्तिः प्रजाभ्यः परिपालयन्तां न्याय्येन मार्गेण महीं महीशाः।
गोब्राह्मणेभ्यश्शुभमस्तु नित्यं लोकास्समस्तास्सुखिनो भवन्तु॥

॥ इति रुद्राष्टाध्यायी ॥

***

शिव-पूजन विधि

प्रातः स्नानादि नित्यक्रिया कर पूर्वाभिमुख बैठें। श्वेतवस्त्र, रुद्राक्ष एवं भस्म धारण कर संध्या-वंदनादि करके शिवपूजन करना चाहिए। **केशवाय नमः, नारायणाय नमः, माधवाय नमः** – बोलकर तीन आचमन कर **अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा। यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥** से पवित्र हो संकल्प करें – **महामाङ्गल्यप्रदमासोत्तमे मासे अमुकमासे, अमुकपक्षे, अमुकतिथौ, अमुकवासरे, अमुकनामाहं मम कायिकवाचिकमानसिकज्ञाताज्ञातसकलदोषपरिहारार्थं समस्तकामनासिद्ध्यर्थं मम सकुटुम्बस्य सपरिवारस्य दीर्घायुरारोग्यैश्वर्यादिवृद्ध्यर्थं श्रीसाम्बसदाशिवप्रीत्यर्थं श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं यथोपचारैः गणपत्यादिसकलदेवतापूजनपूर्वक अमुकलिङ्गोपरि दुग्धधारया/जलधारया सकृद्रुद्रावर्तनेन अभिषेकपूर्वकं श्रीभवानीशङ्करपूजनं करिष्ये।**

आगे लिखे आवाहन मंत्रों से मूर्तियों के समीप पुष्प छोड़ें। मूर्ति न हो तो आवाहन करके पूजन करें।

गणपति-पूजन। **आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः। इहागत्य गृहाण त्वं पूजां यागं च रक्ष मे॥** पूजन करके आगे लिखी प्रार्थना करें – **ॐ गणानांत्वा गणपतिꣳ हवामहे प्रियाणांत्वा प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिꣳ हवामहे वसो मम। आहमजानि गर्भधमात्त्वमजासि गर्भधम्॥**

पार्वती-पूजन। **हेमाद्रितनयां देवीं वरदां शङ्करप्रियाम्। लम्बोदरस्य जननीं गौरीमावाहयाम्यहम्॥** पूजन करके नीचे लिखी प्रार्थना करें – **ॐ अम्बेऽअम्बिकेम्बालिके न मा नयति कश्चन। ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम्॥**

नंदीश्वर-पूजन। **ॐ आयङ्गौः पृश्निरक्रमीदसदन्मातरम्पुरः। पितरञ्च प्रयन्त्स्वः॥** पूजन कर आगे लिखी प्रार्थना करें – **ॐ प्रैतु वाजी कनिक्रदन्नानदद्रासभः पत्वा। भरन्नग्निम्पुरीष्यम्मा**

पाद्यायुषं पुरा ॥

वीरभद्र-पूजन। ॐ भद्रङ्कर्णेभिः शृणुयाम देवा भद्रम्पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाᳬसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ पूजन करके नीचे लिखी प्रार्थना करें – ॐ भद्रो नोऽअग्निराहुतो भद्रा रातिः सुभग भद्रोऽअध्वरः। भद्राऽउत प्रशस्तयः ॥

कार्तिकेय-पूजन। ॐ यदक्रन्दः प्रथमञ्जायमानऽउद्यन्त्समुद्रादुत वा पुरीषात्। श्येनस्य पक्षा हरिणस्य बाहूऽउपस्तुत्यम्महि जातन्तेऽअर्वन् ॥ पूजन करके नीचे लिखी प्रार्थना करें – ॐ यत्र बाणाः सम्पतन्ति कुमारा विशिखाऽइव। तन्नऽइन्द्रो बृहस्पतिरदितिः शर्म्म यच्छतु विश्वाहा शर्म्म यच्छतु ॥

कुबेर-पूजन। ॐ कुविदङ्गयवमन्तो यवञ्चिद्यथा दान्त्यनुपूर्वं वियूय। इहेहैषाङ्कृणुहि भोजनानि ये बर्हिषो नमऽउक्तिं यजन्ति ॥ पूजन करके आगे लिखी प्रार्थना करें – ॐ वयः सोम व्रते तव मनस्तनूषु बिभ्रतः। प्रजावन्तः सचेमहि ॥

कीर्तिमुख-पूजन। ॐ असवे स्वाहा वसवे स्वाहा विभुवे स्वाहा विवस्वते स्वाहा गणश्रिये स्वाहा गणपतये स्वाहाभिभुवे स्वाहाधिपतये स्वाहा शूषाय स्वाहा सᳬसर्प्पाय स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहा मलिम्लुचाय स्वाहा दिवा पतयते स्वाहा ॥ पूजन करके नीचे लिखी प्रार्थना करें – ॐ ओजश्च मे सहश्च मऽआत्मा च मे तनूश्च मे शर्म्म च मे वर्म्म च मेऽङ्गानि च मेस्थीनि च मे परूᳬषि च मे शरीराणि च मऽआयुश्च मे जरा च मे यज्ञेन कल्पन्ताम् ॥

जलहरी में सर्प का आकार हो तो सर्प का पूजन करें, पश्चात् **साम्बशिवाय नमः** से शिव का पूजन करें –

पाद्य – ॐ नमोस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे। अथो येऽ

अस्य सत्त्वांनोहन्तेब्भ्योंकरन्नमः ॥ पाद्यं समर्पयामि।

अर्घ्य – ॐ गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह। बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तु त्वा ॥ अर्घ्यं समर्पयामि।

आचमन – ॐ त्र्यम्बकँय्यजामहे सुगन्धिम्पुष्टिवर्द्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्म्मुक्षीय मामृतात् ॥ आचमनीयं जलं समर्प.।

स्नान – ॐ व्वरुणस्योत्तम्भनमसि व्वरुणस्य स्कम्भसर्ज्जनी स्त्थो व्वरुणस्यऽऋतसदन्न्यसि व्वरुणस्यऽऋतसदनमसि व्वरुणस्यऽऋतसदनमासीद ॥ स्नानं समर्पयामि।

दुग्धस्नान – गोक्षीरधामन् देवेश! गोक्षीरेण मया कृतम्। स्नपनं देव देवेश! गृहाण शिवशङ्कर ॥ दुग्धस्नानं समर्प., पुनर्जलस्नानं समर्प.।

दधिस्नान – दध्ना चैव मया देव! स्नपनं क्रियते तव। गृहाण भक्त्या दत्तं मे सुप्रसन्नो भवाव्यय ॥ दधिस्नानं समर्पयामि, पुनर्जलस्नानं समर्पयामि।

घृतस्नान – सर्पिषा देवदेवेश! स्नपनं क्रियते मया। उमाकान्त! गृहाणेदं श्रद्धया सुरसत्तम!। घृतस्नानं समर्पयामि, पुनर्जलस्नानं सम.।

मधुस्नान – इदं मधु मया दत्तं तव तुष्ट्यर्थमेव च। गृहाण शम्भो! मे भक्त्या मम शान्तिप्रदो भव ॥ मधुस्नानं समर्पयामि, पुनर्जलस्नानं सम.।

शर्करा – सितया देवदेवेश! स्नपनं क्रियते मया। गृहाण शम्भो! मे भक्त्या मम शान्तिप्रदो भव ॥ शर्करास्नानं सम., पुनर्जलस्नानं सम.।

पंचामृतस्नान – पञ्चामृतं मयानीतं पयोदधिघृतं मधु। शर्करा च समायुक्तं स्नानार्थं प्रतिगृह्यताम् ॥ पञ्चामृतस्नानं समर्पयामि।

शुद्धोदक – ॐ शुद्धवालः सर्वशुद्धवालो मणिवालस्तऽआश्विनाः श्येतः श्येताक्षोरुणस्ते रुद्राय पशुपतये कर्ण्णा यामाऽअवलिप्ता रौद्रा नभोरूपाः पार्जन्याः ॥ शुद्धोदकस्नानं समर्पयामि।

अभिषेक – (रुद्रसूक्त से जल-धारा छोड़ें –) अभिषेकं समर्पयामि।

विजया – ॐ विज्ज्यन्धनुः कपर्द्दिनो विशल्ल्यो बाणवाँ२॥ऽउत।

अनेशन्नस्य याऽइषंवऽआभुरस्य निषङ्गधिः ॥ विजयां समर्प.।

वस्त्र – ॐ प्रमुंञ्च धन्वंनुस्त्वमुभयोरात्न्योर्ज्याम्। याश्चं ते हस्तऽ इषंवुः परा ता भंगवो वप॥ वस्त्रं समर्पयामि।

यज्ञोपवीत – ॐ ब्रह्मंजज्ञानम्प्रंथमम्पुरस्ताद्वि सींमतः सुरुचों वेन ऽआंवः। स बुद्ध्याऽउपमाऽअंस्य विष्ठाः सतश्च योनिमसंतश्च विवंः॥ यज्ञोपवीतं समर्मयामि, यज्ञोपवीतान्ते आचमनीयं जलं समर्प.।

गंध – ॐ नमुः श्वभ्यः श्वपंतिभ्यश्च वो नमो नमों भवायं च रुद्रायं च नमंः शर्वायं च पशुपतंये च नमो नीलंग्रीवाय च शितिकण्ठांय च॥ गन्धं समर्पयामि।

अक्षत – ॐ नमंः शम्भवायं च मयोभवायं च नमंः शङ्करायं च मयस्करायं च नमंः शिवायं च शिवतंराय च॥ अक्षतं समर्प.।

पुष्प – ॐ नमुः पार्य्यांय चावार्य्याय च नमंः प्रतरंणाय चोत्तरंणाय च नमस्तीर्थ्यांय च कूल्यांय च नमुः शष्प्यांय च फेन्यांय च॥ पुष्पं समर्पयामि।

पुष्पमाला – नानापङ्कजपुष्पैश्च ग्रथितां पल्लवैरपि। बिल्वपत्रयुतां मालां गृहाण सुमनोहराम्॥ पुष्पमालां समर्पयामि।

बिल्वपत्र – ॐ नमों बिल्मिने च कवचिनें च नमों वर्म्मिणें च वरूथिनें च नमंः श्रुतायं च श्रुतसेनायं च नमों दुन्दुभ्याय चाहनन्याय च॥ काशीधामनिवासी च कालभैरवपूजनम्। प्रयागे माघमासे च बिल्वपत्रं शिवार्पणम्॥ दर्शनं बिल्वपत्रस्य स्पर्शनं पाप नाशनम्। अघोरपापसंहारं बिल्वपत्रं शिवार्पणम्॥ त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रिधायुधम्। त्रिजन्मपापसंहारं बिल्वपत्रं शिवार्पणम्॥ अखण्डैर्बिल्वपत्रैश्च पूजयेत् शिवशङ्करम्। कोटिकन्यामहादानं बिल्व पत्रं शिवार्पणम्॥ गृहाण बिल्वपत्राणि सपुष्पाणि महेश्वर। सुगन्धीनि भवानीश शिव! त्वं कुसुमप्रिय॥ बिल्वपत्राणि समर्पयामि।

तुलसी – ॐ शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः । मा द्यावापृथिवीऽअभिशोचीर्मान्तरिक्षम्मा वनस्पतीन् ॥
तुलसीपत्राणि समर्पयामि।

दूर्वा – ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि । एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥ दूर्वां समर्पयामि।

शमीपत्र – अमङ्गलानां शमनीं शमनीं दुष्कृतस्य च। दुःस्वप्ननाशिनीं धन्यां प्रपद्येऽहं शमीं शुभाम् ॥ शमीपत्रं समर्पयामि।

आभूषण – वज्रमाणिक्यवैदूर्यमुक्ताविद्रुममण्डितम्। पुष्परागसमायुक्तं भूषणं प्रतिगृह्यताम् ॥ आभूषणं समर्पयामि।

अतर – ॐ अहिरिव भोगैः पर्य्येति बाहुञ्ज्यायां हेतिम्परिबाधमानः । हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमांसम्परिपातु विश्वतः ॥ सुगन्धिततैलं समर्पयामि।

धूप – ॐ नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च ॥ धूपमाघ्रापयामि।

दीप – ॐ नमऽआशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय च नमऽऊर्म्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च ॥ दीपं दर्शयामि। *(हस्तप्रक्षालनम्)*

नैवेद्य – ॐ नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मद्ध्यमाय चापगल्भाय च नमो जघन्याय च बुद्ध्याय च ॥ नैवेद्यं निवेदयामि।

पानीय जल – ॐ नमः सोभ्याय च प्रतिसर्य्याय च नमो याम्म्याय च क्षेम्म्याय च नमः श्लोक्याय चावसान्याय च नमऽ उर्वर्य्याय च खल्याय च ॥ मध्ये पानीयं जलं समर्पयामि।

ऋतुफल – फलानि यानि रम्याणि स्थापितानि तवाग्रतः। तेन मे सफलावाप्तिर्भवेज्जन्मनिजन्मनि॥ ऋतुफलं समर्पयामि।

अ.ऋतुफल – कूष्माण्डं मातुलुङ्गं च नारिकेलफलानि च। रम्याणि पार्वतीकान्त सोमेश! प्रतिगृह्यताम्॥ अखण्डऋतुफलं समर्पयामि।

तांबूल पूगीफल – ॐ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः। यथा शमसद्द्विपदे चतुष्पदे विश्वम्पुष्टङ्ग्रामेऽ अस्मिन्ननातुरम्॥ ताम्बूलपूगीफलं समर्पयामि।

दक्षिणा – न्यूनातिरिक्तपूजायां संपूर्णफलहेतवे। दक्षिणां काञ्चनीं देव स्थापयामि तवाग्रतः॥ द्रव्यदक्षिणां समर्पयामि।

शिवजी की आरती

जय गङ्गाधर जय हर जय गिरिजाधीशा। शिव जय गिरिजाधीशा। त्वं मां पालय नित्यं कृपया जगदीशा॥ १॥ हर हर हर महादेव॥ कैलाशे गिरिशिखरे कल्पद्रुमविपिने। गुञ्जति मधुकरपुञ्जे कुञ्जवने गहने॥ कोकिलकूजति खेलत हंसावन ललिता। रचयति कलाकलापं नृत्यति मुदसहिता॥ २॥ हर.॥ सस्मिंल्ललितसुदेशे शाला मणिरचिता। तन्मध्ये हरनिकटे गौरी मुदसहिता॥ क्रीडा रचयति भूषारञ्जित निजमीशम्। इन्द्रादिक सुर सेवत नामयते शीशम्॥ ३॥ हर.॥ बिबुधबधू बहु नृत्यत हृदये मुदसहिता। किन्नर गायन कुरुते सप्त स्वर सहिता॥ धिनकत थै थै धिनकत मृदङ्ग वादयते। क्वण क्वण ललिता वेणुं मधुरं नाटयते॥ ४॥ हर.॥ रुण रुण चरणे रचयति नूपुरमुज्ज्वलिता। चक्रावर्ते भ्रमयति कुरुते तां धिक तां॥ तां तां लुप चुप तां तां डमरू वादयते। अङ्गुष्ठाङ्गुलिनादं लासकतां कुरुते॥ ५॥ हर.॥ कर्पूरद्युतिगौरं पञ्चानन सहितम्। त्रिनयनशशिधरमौलिं विषधरकण्ठयुतम्॥ सुन्दरजटाकलापं पावकयुतभालम्। डमरुत्रिशूलपिनाकं करधृतनृकपालम्॥ ६॥ हर.॥ मुण्डै रचयति माला मन्नगमुपवीतम्। वामविभागे गिरिजारूपं अति ललितम्॥ सुन्दरसकलशरीरे कृतभस्माभरणम्। इति वृषभध्वजरूपं तापत्रयहरणम्॥ ७॥ हर.॥ शङ्खनिनादं कृत्वा झल्लरि नादयते। नीरा-

जयते ब्रह्मा वेदरिचां पठते॥ अतिमृदुचरणसरोजं हृत्कमले धृत्वा। अवलोकयति महेशं ईशं अभिनत्वा॥ ८॥ हर.॥ ध्यानं आरति समये हृदये अति कृत्वा। रामस्त्रिजटानाथं ईशं अभिनत्वा॥ सङ्गतिमेवं प्रतिदिन पठनं यः कुरुते। शिवसायुज्यं गच्छति भक्त्या यः शृणुते॥ ९॥ हर.॥

पुष्पांजलि। ॐ राजाधिराजाय प्रसह्य साहिने। नमो वयं वैश्रवणाय कुर्महे। स मे कामान् कामकामाय मह्यम्। कामेश्वरो वैश्रवणो दधातु। कुबेराय वैश्रवणाय। महाराजाय नमः। ॐ स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौमः सार्व्वायुष आन्तादापरार्धात्। पृथिव्यै समुद्रपर्यन्ताया एकराडिति। तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्याऽवसन् गृहे। आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति॥ ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥ ॐ भूर्भुवः स्वः साम्बशिवाय नमः मन्त्रपुष्पाञ्जलिं समर्पयामि।

प्रार्थना। असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे सुरतरुवरशाखा लेखनी पत्रमुर्वी। लिखति यदि गृहीत्वा शारदा सर्वकालं तदपि तव गुणानामीश! पारं न याति॥ वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत् कारणम् वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनाम्पतिम्। वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियम् वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम्॥ शान्तं पद्मासनस्थं शशिधरमुकुटं पञ्चवक्त्रं त्रिनेत्रं शूलं बज्रं च खड्गं परशुमभयदं दक्षिणाङ्गे वहन्तम्। नागं पाशं च घण्टां डमरुकसहितं साङ्कुशं वामभागे नानालङ्कारयुक्तं स्फटिकमणिनिभं पार्वतीशं नमामि॥ श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचराश्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः। अमङ्गल्यं शीलं तव भवतु नामैवमखिलं तथापि स्मर्तॄणां वरद परमं मङ्गलमसि॥ त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव। त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देव देव॥ पापोऽहं पापकर्माहं पापात्मा पापसंभवः। त्राहि मां पार्वतीनाथ! सर्वपापहरो भव॥ कालहर! कण्टकहर! दुःखहर! दारिद्र्यहर!

आगे लिखे मंत्र से गाल बजाते हुए बम्-बम् बोल कर जलहरी का

जल नेत्रों पर लगाएँ – **निरावलम्बस्य ममावलम्बं विपाटिताशेषविपत्क-दम्बम्। मदीयपापाचलपापशम्बं प्रवर्ततां वाचि सदैव बम्-बम् ॥**

पंचांग-प्रणाम, मन में स्मरण, नेत्रों से दर्शन और वाणी से नामोच्चार करते हुए दोनों हाथ जोड़कर मस्तक झुकाकर प्रणाम करें।

प्रदक्षिणा (अर्धप्रदक्षिणा करें)। **यानि कानि च पापानि ज्ञाताज्ञातकृतानि च। तानि सर्वाणि नश्यन्ति प्रदक्षिण पदे पदे ॥**

प्रार्थना। **प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात्। आवाहनं न जानामि न जानामि विसर्जनम्। पूजां चैव न जानामि क्षमस्व परमेश्वर ॥ अन्यथा शरणं नास्ति त्वमेकं शरणं मम। तस्मात् कारुण्यभावेन रक्ष रक्ष महेश्वर ॥ अनेन पूजनेन श्रीसाम्बसदाशिवः प्रीयताम्।**

ॐ विष्णवे नमः, ॐ विष्णवे नमः, ॐ विष्णवे नमः।

पुनः ध्यान करें। जल या दुग्धधारा से रुद्राभिषेक करें। अभिषेक के पूर्व व पश्चात् षडंगन्यास करें। एवं संकल्प – **कृतस्य श्रीसाम्बसदाशिव-स्याभिषेककर्मणः साङ्गतासिद्ध्यर्थं तत्संपूर्णफलप्राप्त्यर्थं च श्रीसाम्ब-सदाशिवस्योत्तरपूजनमहं करिष्ये** – से उत्तर पूजन कर आवाहित देवताओं का विसर्जन करें – **यान्तु देवगणाः सर्वे पूजामादाय मामिकाम्। इष्टका-मसमृद्ध्यर्थं पुनरागमनाय च ॥ गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर। यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेता-ध्वरेषु यत्। स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं संपूर्णतां यातु सद्यो वन्दे तमच्युतम् ॥ ॐ विष्णवे नमः, ॐ विष्णवे नमः, ॐ विष्णवे नमः।**

***

पार्थिव-शिवपूजन

पूर्वमुख बैठें। भस्म-रुद्राक्ष धारण करें। आचमन-प्राणायामादि कर गणपति स्मरण कर संकल्प करें – **मम सर्वारिष्टनिरसनपूर्वकसर्वपापक्षयार्थं दीर्घायुरारोग्यैश्वर्यादिसमस्तसम्पत्प्रवृद्ध्यर्थं श्रुतिस्मृतिपुराणोक्तफल-प्राप्त्यर्थं श्रीसाम्बसदाशिवप्रीत्यर्थं पार्थिवलिङ्गपूजनमहं करिष्ये।**

भूमिप्रार्थना—**सर्वाहारे धरे देवि त्वद्रूपां मृत्तिकामिमाम्। ग्रहीष्यामि प्रसन्ना त्वं लिङ्गार्थं भव सुप्रभे॥ पृथिव्यै नमः।**

हराय नमः कहकर शुद्ध मिट्टी लें और उसे जल मिलाकर गूँथें। **महेश्वराय नमः**, लिंग का गठन करें (लिंग अंगूठे से छोटा और बित्ते से बड़ा न हो)। **शूलपाणये नमः, हे शिव! इह प्रतिष्ठितो भव**, अक्षत से प्रतिष्ठा कर प्रार्थना करें—**स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम्। तावत्त्वम्प्रीतिभवेन लिङ्गेऽस्मिन् सन्निधिं कुरु॥**

ध्यान—**ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्। पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्॥**

आवाहन—**पिनाकधृषे नमः, श्रीशाम्बसदाशिव पार्थिवेश्वर, इहागच्छ, इह प्रतिष्ठ, इह सन्निहितो भव। श्रीभगवते साम्बसदाशिवपार्थिवेश्वराय नमः, आवाहनार्थे पुष्पं समर्पयामि।** पुष्प चढ़ाएँ।

शिवाय नमः, आसनार्थे अक्षतान् समर्पयामि, अक्षत चढ़ाएँ। इसी तरह **शिवाय नमः** बोलकर उपलब्ध सामग्री द्वारा पूजन करें—**पादयोः पाद्यं समर्पयामि**, जल। **हस्तयोरर्घ्यं सम.**, जल। **आचमनीयं जलं सम.**, जल। **स्नानीयं जलं सम.**, स्नान। **पञ्चामृतस्नानं सम.**, पंचामृतस्नान। **शुद्धोदकस्नानं सम.**, जलस्नान। **शुद्धोदकस्नानान्ते आचमनीयं जलं सम.**, जल चढ़ाएँ। **वस्त्रकौपीनोपवीतार्थे अक्षतानि सम.**, अक्षत चढ़ाएँ। **चन्दनं सम.**, चंदन। **अक्षतान् सम.**, अक्षत। **पुष्पमालां सम.**, माला। **बिल्वपत्रं सम.**, बिल्वपत्र। **दूर्वां सम.**, दूब। **पुष्पं सम.**, फूल।

पुष्प से भगवान् शंकर की आठों मूर्तियों की आठों दिशाओं में पूजा करें—१ (पूर्व में) **शर्वाय क्षितिमूर्तये नमः।** २ (ईशानकोण में) **भवाय जलमूर्तये नमः।** ३ (उत्तर में) **रुद्राय अग्निमूर्तये नमः।** ४ (वायव्यकोण में) **उग्राय वायुमूर्तये नमः।** ५ (पश्चिम में) **भीमाय आकाशमूर्तये नमः।** ६ (नैर्ऋत्यकोण में) **पशुपतये यजमानमूर्तये नमः।** ७ (दक्षिण में) **महादेवाय सोममूर्तये नमः।** ८ (अग्निकोण में) **ईशानाय सूर्यमूर्तये नमः।**

लिंगपर **महिम्नःस्तोत्र** से अभिषेक करें। पुनः सविधि पूजन करें।

शिवाय नमः, **धूपमाघ्रापयामि**, धूप। **दीपं दर्शयामि**, दीप। **नैवेद्यं निवेदयामि**, नैवेद्य। **मध्ये पानीयं अन्ते आचमनीयं जल सम.**, जल। **ऋतुफलं सम.**, फल। **आरार्तिक्यं सम.**, आरती करें। जल गिरा दें। **मन्त्रपुष्पाञ्जलिं सम.**, पुष्पांजलि।

शिवाय नमः मंत्र का क़म-से-कम 10 बार जप कर भगवान् को समर्पित करें—**गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्। सिद्धिर्भवतु मे देव! त्वत्प्रसादान्महेश्वर॥**

प्रदक्षिणा कर स्तुति करें—**सर्वज्ञानप्रविज्ञानप्रदायैकमहात्मने। नमस्ते देव देवेश सर्वभूतहिते रतः॥ अनन्तकान्तिसंभोग परमेश नमोस्तु ते। अनन्तकान्तिसम्पन्न अनन्तासनसंस्थित॥ परापर परातीत उत्पत्तिस्थितिकारक। सर्वार्थसाधनोपाय विश्वेश्वर नमोस्तु ते॥ सर्वार्थनिर्मलाभोग सर्वव्याधिविनाशन। योगियोगि महायोगि योगीश्वर नमोस्तु ते॥ पूजयित्वा विधानेन स्तवमेतदुदीरयेत्। लिङ्गस्तवं महापुण्यं यः शृणोति सदा नरः॥ नोत्पद्यते च संसारे स्थानं प्राप्नोति शाश्वतम्। पापकञ्चुकनिर्मुक्तः प्राप्नोति परमं पदम्॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर। यत् पूजितं महादेव परिपूर्णं तदस्तु मे॥**

अक्षत चढ़ाकर विसर्जन करें—**गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर। मम पूजां गृहीत्वेमां पुनरागमनाय च॥ विष्णवे नमः-३। अनेन पार्थिवलिङ्गपूजनकर्मणा श्रीयज्ञस्वरूपः शिवः प्रीयताम् न मम।** जल छोड़ें।

***

श्रीशिवमहिम्नःस्तोत्र

श्रीगणेशाय नमः। (श्रीपुष्पदन्त उवाच) **महिम्नः पारं ते परमविदुषो यद्यसदृशी स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः। अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन् ममाप्येष स्तोत्रे हर निरपवादः परिकरः॥ १॥ अतीतः पन्थानं तव च महिमा वाङ्मनसयो-**

रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि। स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः पदे त्वर्वाचीने पततति न मनः कस्य न वचः ॥ २ ॥ मधुस्फीता वाचः परमममृतं निर्मितवतस्तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदम्। मम त्वेतां वाणीं गुणकथनपुण्येन भवतः पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता ॥ ३ ॥ तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत् त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु। अभव्यानामस्मिन् वरद रमणीयामरमणीं विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः ॥ ४ ॥ किमीहः किं कायः स खलु किमुपायस्त्रिभुवनं किमाधारो धाता सृजति किमुपादान इति च। अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः ॥ ५ ॥ अजन्मानो लोकाः किमवयववन्तोऽपि जगतामधिष्ठातारं किं भवविधिरनादृत्य भवति। अनीशो वा कुर्याद् भुवनजनने कः परिकरो यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे ॥ ६ ॥ त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च। रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥ ७ ॥ महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः कपालं चेतीयत्तव वरद तन्त्रोपकरणम्। सुरास्तां तामृद्धिं दधति च भवद्भ्रूप्रणिहितां न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥ ८ ॥ ध्रुवं कश्चित् सर्वं सकलमपरस्त्वध्रुवमिदं परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये। समस्तेऽप्येतस्मिन् पुरमथन तैर्विस्मित इव स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ॥ ९ ॥ तवैश्वर्यं यत्नाद् यदुपरि विरिञ्चो हरिरधः परिच्छेतुं यातावनलमनलस्कन्धवपुषः। ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत् स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥ १० ॥ अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं दशास्यो यद् बाहूनभृत रणकण्डूपरवशान्। शिरःपद्मश्रेणीरचितचरणाम्भोरुहबलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् ॥ ११ ॥ अमुष्य त्वत्सेवासमधिगतसारं भुजवनं बलात् कैलासेऽपि त्वदधिवसतौ विक्रमयतः। अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्यति खलः ॥ १२ ॥ यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सतीमधश्चक्रे बाणः परिजनविधेयस्त्रिभुवनः। न तच्चित्रं तस्मिन्

वरिवसितरि त्वच्चरणयोर्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः
॥ १३ ॥ अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपाविधेयस्याऽऽसीद्यस्त्रि-
नयन विषं संहृतवतः। स कल्माषः कण्ठे तव न कुरुते न श्रियमहो
विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः॥ १४॥ असिद्धार्था नैव
क्वचिदपि सदेवासुरनरे निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः।
स पश्यन्नीश त्वामितरसुरसाधारणमभूत् स्मरः स्मर्तव्यात्मा नहि वशिषु
पथ्यः परिभवः॥ १५॥ मही पादाघाताद् व्रजति सहसा संशयपदं पदं
विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम्। मुहुर्द्यौर्दौःस्थ्यं यात्यनिभृतजटा-
ताडिततटा जगद्रक्षायै त्वं नटसि ननु वामैव विभुता॥ १६॥ वियद्
व्यापी तारागणगुणितफेनोद्गमरुचिः प्रवाहो वारां यः पृषतलघुदृष्टः
शिरसि ते। जगद् द्वीपाकारं जलधिवलयं तेन कृतमित्यनेनैवोन्नेयं धृत
महिम दिव्यं तव वपुः॥ १७॥ रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति। दिधक्षोस्ते कोऽयं त्रिपुर-
तृणमाडम्बरविधिर्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः॥ १८॥
हरिस्ते साहस्रं कमलबलिमाधाय पदयोर्यदेकोने तस्मिन् निजमुदहर-
न्नेत्रकमलम्। गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा त्रयाणां रक्षायै
त्रिपुरहर जागर्ति जगताम्॥ १९॥ क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतु-
मतां क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते। अतस्त्वां संप्रेक्ष्य क्रतुषु
फलदानप्रतिभुवं श्रुतौ श्रद्धां बद्ध्वा दृढपरिकरः कर्मसु जनः॥ २०॥
क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृतामृषीणामार्त्विज्यं शरणद
सदस्याः सुरगणाः। क्रतुभ्रेषस्त्वत्तः क्रतुफलविधानव्यसनिनो ध्रुवं कर्तुः
श्रद्धाविधुरमभिचाराय हि मखाः॥ २१॥ प्रजानाथं नाथ प्रसभमभिकं
स्वां दुहितरं गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा। धनुष्पाणेर्यातं
दिवमपि सपत्राकृतममुं त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः
॥ २२॥ स्वलावण्याशंसाधृतधनुषमह्नाय तृणवत् पुरः प्लुष्टं दृष्ट्वा पुर-
मथन पुष्पायुधमपि। यदि स्त्रैणं देवी यमनिरत देहार्धघटना दवैति
त्वामद्धा बत वरद मुग्धा युवतयः॥ २३॥ श्मशानेष्वाक्रीडा स्मरहर
पिशाचाः सहचराश्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः। अमङ्गल्यं
शीलं तव भवतु नामैवमखिलं तथापि स्मर्तॄणां वरद परमं मङ्गलमसि

॥ २४ ॥ मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः प्रहृष्यद्रोमाणः प्रमद-
सलिलोत्सङ्गितदृशः। यदालोक्याह्लादं ह्रद इव निमज्यामृतमये दधत्य-
न्तस्तत्त्वं किमपि यमिनस्तत्किल भवान्॥ २५ ॥ त्वमर्कस्त्वं सोमस्त्व-
मसि पवनस्त्वं हुतवहस्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च।
परिच्छिन्नामेवं त्वयि परिणता बिभ्रतु गिरं न विद्मस्तत्तत्त्वं वयमिह तु
यत्त्वं न भवसि॥ २६ ॥ त्रयीं तिस्रो वृत्तिस्त्रिभुवनमथो त्रीनपि सुरा
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत् तीर्णविकृति। तुरीयं ते धाम ध्वनिभिर-
वरुन्धानमणुभिः समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदम्॥ २७ ॥
भवः शर्वो रुद्रः पशुपतिरथोग्रः सहमहां स्तथा भीमेशानाविति यदभि-
धानाष्टकमिदम्। अमुष्मिन् प्रत्येकं प्रविचरति देव श्रुतिरपि प्रियायास्मै
धाम्ने प्रण्रिहितनमस्योऽस्मि भवते॥ २८ ॥ नमो नेदिष्ठाय प्रियदव दवि-
ष्ठाय च नमो नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः। नमो वर्षिष्ठाय
त्रिनयन यविष्ठाय च नमो नमः सर्वस्मै ते तदिदमिति शर्वाय च नमः
॥ २९ ॥ बहुलरजसे विश्वोत्पत्तौ भवाय नमो नमः प्रबलतमसे तत्संहारे
हराय नमो नमः। जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः प्रमहसि
पदे निस्त्रैगुण्ये शिवाय नमो नमः॥ ३० ॥ कृशपरिणति चेतः क्लेशवश्यं
क्व चेदं क्व च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः। इति चकितममन्दी-
कृत्य मां भक्तिराधाद् वरद चरणयोस्ते वाक्यपुष्पोपहारम्॥ ३१ ॥
असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे सुरतरुवरशाखा लेखनी पत्र-
मुर्वी। लिखति यदि गृहीत्वा शारदा सर्वकालं तदपि तव गुणानामीश
पारं न याति॥ ३२ ॥ असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौलेर्ग्रथितगुणमहिम्नो
निर्गुणस्येश्वरस्य। सकलगुणवरिष्ठः पुष्पदन्ताभिधानो रुचिरमलघुवृत्तैः
स्तोत्रमेतच्चकार॥ ३३ ॥ अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत् पठति परम-
भक्त्या शुद्धचित्तः पुमान् यः। स भवति शिवलोके रुद्रतुल्यस्तथात्र
प्रचुरतरधनायुः पुत्रवान् कीर्तिमांश्च॥ ३४ ॥ महेशान्नापरो देवो महिम्नो
नापरा स्तुतिः। अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम्॥ ३५ ॥
दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः। महिम्नः स्तवपाठस्य
कलां नार्हन्ति षोडशीम्॥ ३६ ॥ कुसुमदशननामा सर्वगन्धर्वराजः शिशु
शशिधरमौलेर्देवदेवस्य दासः। स खलु निजमहिम्नो भ्रष्ट एवास्य रोषात्

स्तवनमिदमकार्षीद् दिव्यदिव्यं महिम्नः॥ ३७॥ सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः। व्रजति शिवसमीपं किन्नरैः स्तूयमानः स्तवनमिदममोघं पुष्पदन्तप्रणीतम्॥ ३८॥ आसमाप्तमिदं स्तोत्रं पुण्यं गन्धर्वभाषितम्। अनौपम्यं मनोहारि शिवमीश्वरवर्णनम्॥ ३९॥ इत्येषा वाङ्मयी पूजा श्रीमच्छङ्करपादयोः। अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः॥ ४०॥ तव तत्त्वं न जानामि कीदृशोऽसि महेश्वर। यादृशोऽसि महादेव तादृशाय नमो नमः॥ ४१॥ एककालं द्विकालं वा त्रिकालं यः पठेन्नरः। सर्वपापविनिर्मुक्तः शिवलोके महीयते॥ ४२॥ श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन स्तोत्रेण किल्बिषहरेण हरप्रियेण। कण्ठस्थितेन पठितेन समाहितेन सुप्रीणितो भवति भूतपतिर्महेशः॥ ४३॥

(श्रीशिवमहिम्नःस्तोत्रं संपूर्णम्)

श्रीशिवमानसपूजा-स्तोत्र

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं नानारत्नविभूषितं मृगमदामोदाङ्कितं चन्दनम्। जातीचम्पकबिल्वपत्ररचितं पुष्पं च धूपं तथा दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम्॥ १॥ सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम्। शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्ज्वलं ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु॥ २॥ छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं वीणाभेरिमृदङ्गकाहलकला गीतं च नृत्यं तथा। साष्टाङ्गं प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो॥ ३॥ आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः। सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम्॥ ४॥ करचरणकृतं वाक्कायजं कर्मजं वा श्रवणनयनजं वा मानसं वाऽपराधम्। विहितमविहितं वा सर्वमेतत्क्षमस्व जय जय करुणाब्धे श्रीमहादेव शम्भो॥ ५॥

(इति श्रीमच्छङ्कराचार्यविरचिता शिवमानसपूजा)

स्वप्रकाशित परीक्षोपयोगी पुस्तकें

श्रीगनेजसइसनामस्तीबमू - प्री.ब्रदुकनाय शाक्षी छित्ती	१२.५०
प्रभमा परिक्षा : बधुसिद्धान्तसीमुद्वी - पं.गातावसाद उपाध्याय	५०.००
सव्दथानुक्ष्पण्कन्दसां तालिका - डॉ.निनीदराव पाठक	१५.००
मीतिसंन्नदस्व मिनलामः- पं.गीरीनाम पाठक	२०.००
स्घुवंश-महाकाव्यम् (दिन्नीग सर्ग)- डॉ. घुननेस उपाध्याय	२०.००
तर्कसंव्रह (मात हिन्दी दोका)	१०.००
अय्कदहावकम् - डॉ.क्षमलाकान्त पाण्डेय	१५.००
उताप्दाध्यायी (हिन्दी दीका सहित) - डॉ.घर्नराव पाण्डेय	४०.००
पूर्वधथामा प्रथम वर्ष : रघुवंश महाकाव्यम् - (१-३ सर्ग) - डॉ.रामविसास पाण्डेद	३०.००
प्रतापदिबय (स.हि.जाखाा) - ब्री निशुद्धानन्द दिवेदी	३०.००
मव्हसिद्धान्त कीमुदी (प्रमम थाग) सं.हि.जाखाा	५०.००
कुमारसम्थवम् (१-२ सर्ग) - डॉ.नर्मदेश्वर त्रिपाती	३०.००
स्वुवंश-महाकाप्यम् (२-७ सर्ग) - डॉ.रामवितास पाण्डेय	३५.००
अग्टाव्यायी सुवपाट - डॉ.अवय कुमार सा	२०.००
मुवरामावणम् (सं.हि.जाख्या)- पं.गीरीनाय पाठक	२०.००
वत्रष्कंग विघर्स (रस-वन्द-अलकाराहि हेहू उपपीगी पुस्तक)	२५.००
पूर्वधधामा दितीय वर्ष : मम्मरिद्धान्त कीभुदी (द्रितीग भाग) सं.हि.जाख्या	५०.००
बन्दालीक- पं.गीरीनाम पाठक	६०.००
किरातालुंनीघम् - (१-२ सर्ग) - डॉ.नरेश बन्द दिवेदी	३०.००
हिन्दी साहिया था इतिहास (परीशीपयीगी)	४०.००
उत्तरयम्यमा प्रथम वर्ष : अयंकारसार भजरी - शानित्रित्र दिवेदी	१५.००
तकंसंवह-न्याय-पर-दिन्दी टीका (मुटका) - डॉ.गणेशवत शाखी	१५.००
रघुवंश-महाकाव्यम् (१३-१४ सर्ग) - डॉ.नर्मदेश्वर त्रिपाठी	४०.००
रखुवंश-महाकाप्पम् (१३-१४ सर्ग) - डॉ.नर्मदेश्वर त्रिपाती	३५.००
संस्कूल निकन्वनिथिः - डॉ.बमुनेश त्रिपाती “चातक”	४०.००
कारिकाबमी (व्रन्मराखन्द) डॉ.गभेरादत्त शाखी	३५.००
उत्तरयम्यमा दित्तीष पर्ष : स्वप्नवासववंबम् (सं.हि.व्याखाा)	३५.००
काव्यमीमाला (१-५) डॉ.बमुलेश त्रिपाती “चातक”	२५.००
वुत्तरस्नाकर - डॉ.सकदादेव पाण्डेव	४०.००
किराताजुंनीघम् - (३-६ सर्ग) - डॉ.नमंदेस्वर त्रिपाती	३०.००
औधचिक कवानिर्या - डॉ.डिबेन्द्रनाम शुवत्र “निर्यूण”	३०.००
अर्यसबद - डॉ.गणेशवतशाखी	२५.००
शाथ्री प्रभम पर्ष : सिन्युवादवुतम् - यो.बदुकनाम शाखी खिस्ते	३०.००
अभिज्ञान शाकुन्तलमु - पं.गोरीनाम पाठक	वनस्स्य
मेयदूतम् (पुर्पघयः) डॉ.निनीदराप पाठक	३०.००
मेयदूतम् (सम्पूर्ण सभिव)	वनस्स्य
भारतीय संस्कृति - श्रीनिमास शर्मा	३०.००
शिशुवालवय महाकाणम् (१-३) - डॉ.गणेशदलसाखी	८०.००
गोत्तपरिभामा - डॉ.कमलाकान्त पाण्डेव	०५.००
समरत्तार - डॉ.कमलाकान्त पाण्डेव	वनस्स्य
सरत्तक्किोभगिति (हिन्दी व्याख्मा) - डॉ.कमलाकान्त पाण्डेव	१५०.००
घटपसालिका - डॉ.कमलाकान्त पाण्डेव	२५.००
हल्पसचीनन - डॉ.कमलाकान्त पाण्डेव	२५.००
मीमांलामरिचामा (सं.हि.व्याख्मा) - पं.वन्दीवुष्ण त्रिपाठी	वनस्स्य
रसलोक - डॉ.श्रीव्रसाद	२०.००
शाश्यी दिशीय पर्थ : साय्यकारिका - डॉ.यमुनेश त्रिपाठी “चातक”	३५.००
तर्कभामा - डॉ.गणेशदल शाखी	२०.००
देदानासार (सं.हि.व्याख्मा) - डॉ.वनुनाराम त्रिपाठी	३०.००
सनन्सुवातीबन् (सं.हि.जाख्मा) डॉ.पनुनाराम त्रिपाठी	५०.००
वेथीशहार नाटक - पं.गीरीनाम पाटक	८०.००
कारिकाबबी (अनुयामाचि समापिपर्यन्त) - डॉ.गणेशदत्तराखी	६०.००
जातकालकार छ (सं.हि.व्याख्मा) - डॉ.कमलाकान्त पाण्डेव	३५.००
ज्योतिघनेवाबन् - डॉ.कमलाकान्त पाण्डेव	५०.००
रेखागगित - (पघ्च-पच्चाध्यान) - डॉ.कमलाकान्त पाण्डेव	२५.००
रेखागगित - (एकादशव्याय-दादश) - डॉ.कमलाकान्त पाण्डेव	२५.००

०००